# छन्दोभाषा - विषयाः


1) पाणिनीय शिक्षा ........ 2
2) निघण्टुः ........ 10
3) छन्दस्सूत्रम् ........ 32
4) ऋग्वेदप्रातिशाख्यम् - विषयसूचिका ........ 55
5) ऋक् प्रातिशाख्यम् ........ 62
6) हयग्रीव शिक्षा ........ 197
7) व्यालिशिक्षा ........ 200
8) व्यालिशिक्षा वृत्तिः ........ 201
9) यजुर्वेदीय लक्षण शास्त्र विषयसूचिका ........ 211
10) तैत्तिरीय प्रातिशाख्यम् ........ 227
11) व्यासशिक्षा ........ 280
12) शुक्लयजुःप्रातिशाख्यम् ........ 320
13) याज्ञवल्क्यशिक्षा ........ 378
14) नारदीया शिक्षा ........ 410
15) सामवेद प्रातिशाख्यम् (पुष्पसूत्रम्) ........ 444
16) अथर्ववेद प्रातिशाख्यम् ........ 672
17) अथर्ववेदीय माण्डूकी शिक्षा ........ 690
18) शौनकीया चतुराध्यायिका ........ 716

# 1) पाणिनीय शिक्षा

अथ शिक्षां प्रवक्ष्यामि पाणिनीय मतं यथा।

शास्त्रानुपूर्वं तद्विद्या - द्यथोक्तं लोकवेदयोः ।। 1

प्रसिद्धमपि शब्दार्थ - मविज्ञात मबुद्धिभिः।

पुन र्व्यक्तीकरिष्यामि वाच उच्चारणे विधिम्।। 2

त्रिषष्टि श्चतुष्षष्टिर्वा वर्णा श्शम्भुमते मताः ।

प्राकृते संस्कृते चापि स्वयं प्रोक्ता स्स्वयम्भुवा।। 3

स्वरा विंशति रेकश्च स्पर्शानां पञ्चविंशतिः।

यादयश्च स्मृता ह्यष्टौ चत्वारश्च यमा स्स्मृताः।। 4

अनुस्वारो विसर्गश्च ᳵक ᳶपौ चापि पराऽश्रितौ।

दुस्स्पृष्टश्चेति विज्ञेयो ऌकारः प्लुत एव च।। 5

---

2 आत्मा बुद्ध्या समेत्यार्था - न्मनो युङ्क्ते विवक्षया।

मनᳵ कायाग्नि माहन्ति स प्रेरयति मारुतम्।। 6

मारुत स्तूरसि चर न्मन्द्रं जनयति स्वरम्।

प्रात स्सवनयोगं तं छन्दो गायत्र माश्रितम्।। 7

कण्ठे माध्यन्दिन युगं मध्यमं त्रैष्टुभानुगम्।

तारं तार्तीयसवनं शीर्षण्यं जागतानुगम्।। 8

सोदीर्णो मूर्ध्न्यभिहतो वक्त्र मापद्य मारुतः।

वर्णा ञ्जनयते तेषां विभागः पञ्चधा स्मृतः।। 9

स्वरतꣳ कालत स्स्थानात् प्रयत्नानुप्रदानतः।

इति वर्णविदꣳ प्राहु - र्निपुणं तन्निबोधत।। 10

---

3 उदात्तश्चानुदात्तश्च स्वरितश्च स्वरा स्त्रयः।

ह्रस्वो दीर्घꣳ प्लुत इति कालतो नियमा अचि।। 11

उदात्ते निषाद गान्धारा वनुदात्त ऋषभ धैवतौ।

स्वरितप्रभवा ह्येते षड्ज मध्यम पञ्चमाः।। 12

अष्टौ स्थानानि वर्णाना मुरꣳ कण्ठ श्शिर स्तथा।

जिह्वामूलञ्च दन्ताश्च नासिकोष्ठौ च तालु च।। 13

ओभावश्च विवृत्तिश्च शषसा रेफ एव च।

जिह्वामूल मुपध्मा च गति रष्टविधोष्मणः।। 14

यद्योभाव प्रसन्धान मुकारादि परं पदम्।

स्वरान्तं तादृशं विद्या - द्यदन्यद्व्यक्त मूष्मणः।। 15

---

4 हकारं पञ्चमै र्युक्त मन्तस्स्थाभिश्च संयुतम्।

औरस्यं तं विजानीयात् कण्ठ्य माहु रसंयुतम्।। 16

कण्ठ्यावहा विचु यशा स्तालव्या ओष्ठजावुपू।

स्यु र्मूर्धन्या ऋटु रषा दन्त्या ऌतु लसा स्स्मृताः। 17

जिह्वामूले तु कुः प्रोक्तो दन्त्योष्ठ्यो व स्स्मृतो बुधैः।

ए ऐ तु कण्ठतालव्या ओ औ कण्ठोष्ठजौ स्मृतौ।। 18

अर्धमात्रा तु कण्ठ्य स्स्या देकारैकारयो र्भवेत्।

ओकारौकारयो र्मात्रा तयो र्विवृतसंवृतम्।। 19

संवृतं मात्रिकं ज्ञेयं विवृतं तु द्विमात्रिकम्।

घोषा वा संवृता स्सर्वे अघोषा विवृता स्स्मृताः।। 20

---

5 स्वराणा मूष्मणां चैव विवृतं करणं स्मृतम्।

तेभ्योऽपि विवृता वेङौ ताभ्या मैचौ तथैव च।। 21

अनुस्वार यमानां च नासिका स्थान मुच्यते।

अयोगवाहा विज्ञेया आश्रयस्थान भागिनः।। 22

अलाबु वीणा निर्घोषो दन्त्यमूल स्स्वराननु। (दन्त मूल्यः)
अनुस्वारस्तु कर्तव्यो नित्यं ह्नो श्शाषसेषु च।। 23

अनुस्वारे विवृत्त्यां तु विरामे चाक्षरद्वये।
द्विरोष्ठौ तु विगृह्णीया - द्यत्रोकारवकारयोः।। 24

व्याघ्री यथा हरेत्पुत्रान् दंष्ट्राभ्यां न च पीडयेत्।
भीता पतनभेदाभ्यां तद्वद्वर्णा न्प्रयोजयेत्।। 25

---

6 यथा सौराष्ट्रिका नारी तक्रँ3 इत्यभिभाषते।
एवं रङ्गाः प्रयोक्तव्याः खे अराँ3 इव खेदया।। 26

रङ्गवर्णं प्रयुञ्जीर - न्नो ग्रसे त्पूर्व मक्षरम्।
दीर्घं स्वरं प्रयुञ्जीयात् पश्चा न्नासिक्य माचरेत्। 27

हृदये चैकमात्रस्तु अर्धमात्रस्तु मूर्धनि ।
नासिकायां तथाऽर्धं च रङ्गस्यैवं द्विमात्रता।। 28

हृदया दुत्करे तिष्ठन् कांस्येन समनुस्वरन्।
मार्दवञ्च द्विमात्रं च जघन्वाँ3 इति दर्शनम्।। 29

मध्ये तु कम्पयेत् कम्प मुभौ पार्श्वौ समौ भवेत्।

सरङ्गं कम्पयेत् कम्पं रथीवेति निदर्शनम्। 30

एवं वर्णाः प्रयोक्तव्या नाव्यक्ता न च पीडिताः।

सम्यग्वर्ण प्रयोगेण ब्रह्म लोके महीयते।। 31

---

7 गीती शीघ्री शिरः कम्पी तथा लिखितपाठकः।

अनर्थज्ञोऽल्पकण्ठश्च षडेते पाठकाधमाः।। 32

माधुर्य मक्षरव्यक्तिः पदच्छेदस्तु सुस्वरः ।

धैर्यं लयसमर्थं च षडेते पाठका गुणाः।। 33

शङ्कितं भीत मुद्धृष्ट - मव्यक्त मनुनासिकम्।

काकस्वरं शिरसि गतं तथा स्थान विवर्जितम्।। 34

उपांशु दष्टं त्वरितं निरस्तं विलम्बितं गद्गदितं प्रगीतम्।

निष्पीडितं ग्रस्तपदाक्षरं च वदेन्न दीनं न तु सानुनास्यम्। 35

प्रातः पठे न्नित्य मुरस्स्थितेन स्वरेण शार्दूल रुतोपमेन।

मध्यन्दिने कण्ठगतेन चैव चक्राह्व संकूजित सन्निभेन।। 36

तारन्तु विद्यात् सवनं तृतीयं शिरोगतं तच्च सदा प्रयोज्यम्।

मयूर हंसान्यभृत स्वराणां तुल्येन नादेन शिरस्स्थितेन। 37

---

8 अचोऽस्पृष्टा यण स्त्वीष न्नेमस्पृष्टा श्शल स्स्मृताः।

शेषा स्स्पृष्टा हलः प्रोक्ता निबोधानुप्रदानतः।। 38

अमोऽनुनासिका न ह्रौ नादिनो ह झष स्स्मृताः।

ईषन्नादा यणो जश्च श्वासिनस्तु खफादयः।। 39

ईषच्छ्वासांश्चरो विद्याद् गोर्धामैत त्प्रचक्षते।

दाक्षीपुत्रः पाणिनिना येनेदं व्यापितं भुवि।। 40

छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते।

ज्योतिषा मयनं चक्षु र्निरुक्तं श्रोत्र मुच्यते।। 41

शिक्षा घ्राणन्तु वेदस्य मुखं व्याकरणं स्मृतम्।

तस्मात् साङ्ग मधीत्यैव ब्रह्मलोके महीयते।। 42

---

8उदात्त माख्याति वृषोऽङ्गुलीनां प्रदेशिनीमूल निविष्टमूर्धा।

उपान्त्य मध्ये स्वरितं धृतञ्च कनिष्ठिकाया मनुदात्तमेव।। 43

उदात्तं प्रदेशिनीं विद्यात् प्रचयं मध्यतोऽङ्गुलिम्।

निहतन्तु कनिष्ठिक्यां स्वरितोपकनिष्ठिकाम्।। 44

अन्तोदात्त माद्युदात्त मुदात्त मनुदात्तं नीचस्वरितम्।

मध्योदात्तं स्वरितं द्व्युदात्तं त्र्युदात्तमिति नवपदशय्या। 45

अग्नि स्सोमः प्र वो वीर्यं हविषां स्व र्बृहस्पति रिन्द्राबृहस्पती।

1) अग्निः – इत्यत्यन्तोदात्तं, 2) सोमः - इत्याद्युदात्तं,

3) प्र – इत्युदात्तं, 4) वः - इत्यनुदात्तम्। 46

5) वीर्यं – इति नीचस्वरितम्, 6) हविषां – इति मध्योदात्तं,

7) स्वः - इति स्वरितम्, 8) बृहस्पतिः - इति द्व्युदात्तं,

9) इन्द्राबृहस्पती - इति त्र्युदात्तम्।। 47

अनुदात्तो हृदि ज्ञेयो मूर्ध्न्युदात्त उदाहृतः।

स्वरितः कर्णमूलीय स्सर्वाऽऽस्ये प्रचय स्स्मृतः ।। 48

---

10 चाषस्तु वदते मात्रां द्विमात्रं त्वेव वायसः।

शिखी रौति त्रिमात्रन्तु नकुल स्त्वर्धमात्रकम्।। 49

कुतीर्था दागतं दग्ध मपवर्णञ्च भक्षितम्।

न तस्य पाठे मोक्षोऽस्ति पापाहे रिव किल्बिषात्।। 50

सुतीर्था दागतं व्यक्तं स्वाम्नाय्यं सुव्यवस्थितम्।

सुस्वरेण सुवक्त्रेण प्रयुक्तं ब्रह्म राजते।। 51

मन्त्रो हीन स्स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह।

स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुस्स्वरतोऽपराधात्। 52

अनक्षर मनायुष्यं विस्वरं व्याधिपीडितम्।

अक्षता शस्त्ररूपेण वज्रं पतति मस्तके।। 53

हस्तहीनन्तु योऽधीते स्वरवर्ण विवर्जितम्।

ऋग्यजु सामभि र्दग्धो वियोनि मधिगच्छति।। 54

हस्तेन वेदं योऽधीते स्वरवर्णार्थ संयुतम्।

ऋग्यजु सामभिः पूतो ब्रह्मलोके महीयते।। 55

---

।11। शङ्कर श्शाङ्करीं प्रादा - द्दाक्षीपुत्राय धीमते।

वाङ्मयेभ्य स्समाहृत्य देवीं वाच मिति स्थितिः।। 56

येनाक्षर समाम्नाय - मधिगम्य महेश्वरात्।

कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः ।। 57

येन धौता गिरः पुंसां विमलै श्शब्द वारिभिः।

तमश्चाज्ञानजं भिन्नं तस्मै पाणिनये नमः।। 58

अज्ञानान्धस्य लोकस्य ज्ञानाञ्जन शलाकया।

चक्षु रुन्मीलितं येन तस्मै पाणिनये नमः।। 59

त्रिनयन मभिमुख निस्सृतामिमां

य इह पठेत् प्रयतश्च सदा द्विजः।

स भवति धनधान्य पुत्र कीर्तिमान्

सुख मतुलञ्च समश्नुते दिवीति दिवीति।। 60

समाप्ता पाणिनीय शिक्षा

---

## 2) निघण्टुः

### अथ प्रथमः अध्यायः

गौः। ग्मा। ज्मा। क्ष्मा। क्षा। क्षमा। क्षोणी। क्षितिः। अवनिः। उर्वी। पृथ्वी। मही। रिपः। अदितिः। इळा। निर्ऋतिः। भू। भूमिः। पूषा। गातुः। गोत्रा। इति। पृथिव्याः। [गोत्रा इति एकविंशतिः। पृथिवीनामधेयानि]। ।। १। ।

हेम। चन्द्रम्। रुक्मम्। अयः। हिरण्यम्। पेशः। कृशनम्। लोहम्। कनकम्। काञ्चनम्। भर्म। अमृतम्। मरुतः। दत्रम्। जातरूपम्।

इति। हिरण्यस्य। [जातरूपम्। इति। पञ्चदश। हिरण्यनामानि]। ।। २। ।

अम्बरम्। विअत्। व्योम। बर्हिः। धन्व। अन्तरिक्षम्। आकाशम्। आपः। पृथिवी। भूः। स्वयम्भूः। अध्वा। पुष्करम्। सगरः। समुद्रः। अध्वरम्। इति। अन्तरिक्षस्य। [अध्वरम्। इति षोडश अन्तरिक्षनामानि]। ।। ३। ।

स्वः। पृश्निः। नाकः। गौः। विष्टप्। नभः। इति। साधारणानि। [नभः इति षट् साधारणानि]। ।। ४। ।

खेदयः। किरणाः। गावः। रश्मयः। अभीशवः। दीधितयः। गभस्तयः। वनम्। उस्राः। वसवः। मरीचिपा। मयूखाः। सप्त। ऋषयः। साध्याः। सुपर्णाः। इति। रश्मीनाम्। [सुपर्णाः इति पञ्चदश रश्मिनामानि]। ।। ५। ।

आताः। आशाः। उपराः। आष्ठाः। काष्ठाः। व्योम। ककुभः। हरितः। इति। दिशाम्। [हरितः। इति। अष्टौ। दिङ्नामानि]। ।। ६। ।

श्यावी। क्षपा। शर्वरी। अक्तुः। ऊर्म्या। राम्या। यम्या। नम्या। दोषा। नक्ता। तमः। रजः। असिक्नी। पयस्वती। तमस्वती। घृताची। शिरिणा। मोकी। शोकी। ऊधः। पयः। हिम। वस्वा। इति। रात्रेः। [वस्वी। इति। त्रयोविंशतिः रात्रिनामानि]। ।। ७। ।

विभावरी। सूनरी। भास्वती। ओदती। चित्रामघा। अर्जुनी। वाजिनी। वाजिनीवती। सुम्नावरी। अहना। द्योतना। श्वेत्या। अरुषी। सूनृता। सूनृतावती। सूनृतावरी। इति। उषसः। [सूनृतावरी इति षोडश उषोनामानि]। ।। ८। ।

वस्तोः। द्युः। भानुः। वासरम्। स्वसराणि। घ्रंस। घर्मः। घृणः। दिनम्। दिवा। दिवेदिवे। द्यविद्यवि। इति। अह्नः। [द्यविद्यवि इति द्वादश अहर्नामानि]। ।। ९। ।

अद्रिः। ग्रावा। गोत्रः। वल। अश्नः। पुरुभोजाः। वलिशानः। अश्मा। पर्वतः। गिरिः। व्रजः। चरुः। वराहः। शंबरह्। रौहिणः। रैवतः। फलिगः। उपरः। उपलः। चमसः। अहिः। अभ्रम्। वलाहकः।

मेघः। दृतिः। ओदनः। वृषन्धिः। वृत्रः। असुरः। कोशः। इति। मेघानाम्। [कोशः। इति। त्रिंशत् मेघनामानि]। ।। १०। ।

श्लोकः। धारा। इळआ। गौः। गौरी। गान्धर्वी। गभीरा। गम्भीर। मन्द्रा। मन्द्राजनी। वाशी। वाणी। वाणीची। वाणः। पविः। भारती। धमनिः। नाळईः। मेना। मेळइः। सूर्या। सरस्वती। निवित्। स्वाहा। वग्नु। उपब्दिः। मायुः। काकुत्। जिह्वा। घोषः। स्वरः। शब्दः। स्वनः। ऋक्। होत्रा। गीः। गाथा। गणः। धेना। ग्नाः। विपा। नन। कशा। धिषणा। नौः। अक्षरम्। मही। अदितिः। शची। वाक्। अनुष्टुप्। धेनुः। वल्गुः। गल्दा। सरः। सुपर्णी। बेकुरा। इति। वाचः। [बेकुरा। इति। सप्तपंचाशत्। वाङ्नामानि]। ।। ११। ।

अर्णः। क्षोदः। क्षद्म। नभः। अम्भः। कबन्धम्। सलिलम्। वाः। वनम्। घृतम्। मधु। पुरीषम्। पिप्पलम्। क्षीरम्। विषम्। रेतः। कशः। जन्म। बृबूकम। बुसम्। तुग्र्या। बुर्बुरम्। सुक्षेम। धरुणम्। सुरा। अररिन्दानि। ध्वस्मन्वत्। जामि। आयुधानि। क्षपः। अहिः। अक्षरम्। स्रोतः। तृप्तिः। रसः। उदकम्। पयः। सरः। भेषजम्।

सहः। शवः। यहः। ओजः। सुखम्। क्षत्रम्। आवयाः। शुभम्। यादुः। भूतम्। भुवनम्। भविष्यत्। आपः। महत्। [व्योम। यशः। महः। सर्णीकम्। स्वृतीकम्। सतीनम्। गहनम्। गभीरम्। गम्भरम्। ईम्। अन्नम्। हविः। सद्म। सदनम्। ऋतम्। योनिः। ऋतस्य। योनिः। सत्यम्। नीरम्। रयिः। सत्। पूर्णम्। सर्वम्। अक्षितम्। बर्हिः। नाम। सर्पिः। अपः। पवित्रम्। अमृतम्। इन्दुः। हेम। स्वः। सर्गाः। शम्बरम्। अभ्वम्। वपुः। अम्बु। तोयम्। तूयम्। कृपीटम्। शुक्रम्। तेजः। स्वधा। वारि। जलम्। जलाषम्। इदम्। इति। उदकस्य। [इदम्। इति। एकशतम्। उदकनामानि]]। ।। १२। ।

अवनयः। यव्याः। खा। सीराः। स्रोत्याः। एन्वः। धुनयः। रुजानाः। वक्षणाः। खादः। अर्णाः। रोधचक्राः। हरितः। सरितः। अग्रुवः। नभन्वः। वध्वः। हिरण्यवर्णाः। रोहितः। सस्रुतः। अर्णाः। सिन्धवः। कुल्याः। वर्यः। उर्व्यः। इरावत्यः। पार्वत्यः। स्रवन्त्यः। ऊर्जस्वत्यः। पयस्वत्यः। तरस्वत्यः। सरस्वत्यः। हरस्वत्यः। रोधस्वत्यः। भास्वत्यः। अजिराः। मातरः। नद्यः। इति। नदीनाम्। [नद्यः इति। सप्तत्रिंशत् नदीनामानि]। ।। १३। ।

अत्यः। हयः। अर्वा। वाजी। सप्तिः। वह्निः। दधिक्राः। दधिक्रावा। एतग्वः। एतशः। पैद्वः। दौर्गहः। औच्चैश्रवसः। ताक्ष्र्यः। आशुः। ब्रध्नः। अरुष। मांश्चत्वः। अव्यथयः। श्येनासः। सुपर्णाः। पतङ्गाः। नरः। ह्वार्याणाम्। हंसासः। अश्वाः। इति। अश्वानाम्। [अश्वाः इति षड्विंशतिः अश्वनामानि]। ।। १४। ।

जमत्। कल्मलीकिनम्। जञ्जणाभवन्। मल्मलाभवन। अर्चि। शोचि। तपः। तेजः। हरः। हृणिः। इति।

शृङ्गाणि। शृङ्गाणि। इति। ज्वलतः। [शृङ्गाणि। इति। एकादश। ज्वलतः। नामधेयानि]। ।। १७। ।

इति निघण्टौ प्रथमः अध्यायः।

## अथ निघण्टौ द्वितीयः अध्यायः

अपः। अप्नः। दंसः। वेषः। वेपः। वेपः। विष्वी। व्रतम। कर्वरम। करुणम। शक्म। क्रतुः। करणानि। करांसि। करिक्रत्। करन्ती। करन्ती। चक्रत्। कर्त्वम्। कर्त्वम्। कर्तोः। कर्तोः। कर्त्तवै। कृत्वी।

धीः। शची। शची॑। शमी। शमी॑। शिमी। शिमी॑। शक्तिः। शक्तिः॑।
शिल्पम्। इति। कर्मणः। [। शिल्पम्। इति। षड्विंशतिः। कर्मनामानि।
]। ।। १। ।।। तुक्। तोकम्। तनयः। तोक्म। तक्म। शेषः। अप्नः॑।
गयः। जाः। अपत्यम्। यहुः। सूनुः। नपात्। प्रजा। वीजम्। इति।
अपत्यस्य। [। वीजम्। इति। पञ्चदश। अपत्यनामानि। ]। ।। २। ।।।
मनुष्यः। नरः। धवाः। जन्तवः। विशः। क्षितयः। कृष्टयः। चर्षणयः।
नहुष। हरयः। मर्याः। मर्त्याः। मर्ताः। व्राताः। तुर्वशाः। द्रुह्यवः।
आयवः। यदवः। अनवः। पूरवः। जगतः। तस्थुषः। पञ्चजनाः।
विवस्वन्तः। पृतनाः। इति। मनुष्याणाम्। [। पृतनाः। इति।
पञ्चविंशतिः। मनुष्यनामानि[१]। ।। ३। ।।। आयत। च्यवाना।
अभीशू। अप्नवाना। विनङ्गृसौ। गभस्ती। करस्नौ। बाहू। भुरिजौ।
क्षिपस्ती। शक्करी। भरित्रे। इति। बाह्वोः। भरित्रे। इति। द्वादश।
बाहुनामानि। ]। ।। ४। ।।। अग्रुवः। अण्व्यः। क्षिपः। व्रिशः। शर्याः।
रशना। धीतयः। अथर्यः॑। विपः। कक्ष्यः। अवनयः। हरितः।
स्वसारः। जामयः। सनाभयः। योक्त्राणि। योजनानि। धुरः। शाखाः।
अभीशवः। दीधितयः। इति। अङ्गुलीनाम्। [। गभस्तयः। इति।

द्वाविंशतिः। अङ्गुलिनामानि]। ।। ५। ।।। वश्मि। उश्मसि। वेति। वेनति। वेसति। वाञ्छति। वष्टि। वनोति। जुषते। हर्यति। आ। चके। उशिक्। मन्यते। छन्त्सत्। चाकनत्। चकमानः। कनति। कानिषत्। इति। [। अष्टादश। ]। कान्तिकर्माणि। ।। ६। ।।। अन्धः। वाजः। पयः। श्रवः। पृक्षः। पितुः। सुतः। सिनम्। अवः। क्षु। धासिः। इरा। इळआ। इषम्। ऊर्क्। रसः। स्वधा। अर्क। क्षद्म। नेमः। ससम। नमः। आयुः। सूनृता। ब्रह्म। वर्चः। कीलालम्। इति। अन्नस्। [। कीलालम्। यशः। इति। अष्टाविंशतिः। अन्ननामानि]। ।। ७। ।।। आ। वयत। भर्वत। बभस्ति। वेति। वेवेष्ट। अविष्यन। बप्सत। भसथः। बब्धाम। ह्वयति। इति। अत्तिकर्माणि। [। ह्वरति। इति। दश। अत्तिकर्माणः]। ।। ८। ।।। ओजः। पाजः। शवः। तवह। तरः। त्वक्षः। शर्धः। बाधः। नृम्णम। तविष। शुष्मम। शुष्णम। दक्षः। वीळ। च्यौत्नम। शूषम। सहः। यहः। वधः। वर्गः। वृजनम। वृक। मज्मना। पौंस्यान। धर्णसि। द्रविणम। स्यन्द्रासः। शम्बरम्। इति। बलस्य। [। शम्बरम्। इति। अष्टाविंशतिः। बलनामानि। ]। ।। ९। ।।। मघम्। रेक्णः। रिक्थम। वेदः। वरिव। श्वात्रम। रत्नम। रयि।

क्षत्रम। भगः। मीळ्हुम। गयः। द्युम्नम। इन्द्रियम। वसु। राय। राधः। भोजनम। तना। नृम्णम। बन्धुः। मेध। यशः। ब्रह्म। द्रविणम। श्रवः। वृत्रम। ऋतम्। इति। धनस्य। [। वृतम्। इति। अष्टाविंशतिः। एव। धननामानि]। ।। १०। ।।। अघ्न्या। उस्र। उस्रिया। अह। मह। अदिति। इळआ। जगत। शक्करी। इति। गवाम्। [। शक्करी। इति। नव। गोनामानि]। ।। ११। ।।। रेळत। हेळत। भामत। भृणीयते। भ्रीणाति। भ्रेषत। दोधत। वनुष्यति। कम्पत। भोजते। इति। [। दश। ]। क्रुध्यतिकर्माणि। ।। १२। ।।। हेळः। हरः। हृणिः। त्यजः। भामः। एहः। ह्वरः। तपुष। जूर्णि। मन्यु। व्यथिः। इति। क्रोधस्य। [। व्यथिः। इति। एकादश। क्रोधनामानि। ]। ।। १३। ।।। वर्तत। अयत। लोटत। लोठत। स्यन्दत। कसत। सर्पत। स्यमत। स्रवत। स्रंसत। अवत। श्चोतत। ध्वंसत। वेनत। मार्ष्टि। भुरण्यति। शवत। कालयत। पेलयत। कण्टत। पिस्यत। बिस्यत। मिस्यत। प्रवत। प्लवत। च्यवत। कवत। गवत। नवत। क्षोदत। नक्षत। सक्षत। म्यक्षत। सचत। ऋच्छत। तुरीयति। चतत। अतत। गाति। इयक्षत। सश्चत। त्सरत। रंहत। यतत। भ्रमत। ध्रजत। रजत। लजत। क्षियत। धमत।

मिनाति। ऋण्वत। ऋणोति। स्वरत। सिसर्त। विषिष्ट। योषिष्ट। रिणाति। रीयत। रेजत। दध्यत(दध्यत। इति। पाठः)। दभ्नोति। युध्यत। धन्वत। अरुषत। आर्यत। डीयत। तकत। दीयत। ईषत। फणत। हनत। अर्दत। मर्दत। सर्सृत। नसत। हर्यत। इयर्त। ईर्तै। ईङ्खत। ज्रयत। श्वात्रत। गन्ति। आ। गनीगन्त। जङ्गन्त। जिन्वत। जसत। गमत। ध्रति। ध्राति। ध्रयत। वहत। रथर्यति। जेहत। ष्वःकत। क्षुम्पत। प्साति। वाति। याति। इषति। द्राति। द्रूळत। एजत। जमत। जवत। वञ्चत। अनित। पवत। हन्ति। सेधत। अगन। अजगन। जिगात। पतत। इन्वत। द्रमत। द्रवत। वेति। हयन्तात। एति। जगायात। अयुथुः। इति। द्वाविंशशतम्। गतिकर्माणि। ।। १४। ।।। नु। मक्षु। द्रवत्। ओषम्। जीराः। जूर्णिः। शूर्ताः। शूघनासः। शीभम। तृषु। तूयम्। तूर्णिः। अजिरम्। भुरण्युः। शु। आशु। प्राशुः। तूतुजिः। तूतुजानः। तुज्यमानासः। अज्राः। साचीवित्। द्युगत्। ताजत्। तरणिः। वातरंहाः। इति। क्षिप्रस्य। [। वातरंहाः। इति। षड्विंशतिः। क्षिप्रनामानि]। ।। १५। ।।। तळइत्। आसात्। अम्बरम्। तुर्वशे। अस्तमीके। आके। उपाके। अर्वाके। अन्तमानाम्। अवमे।

उपमे१। इति। अन्तिकस्य। [उपमे। इति। एकादश। अन्तिकनामानि। ]। ।। १६। ।।। रणः। विवाक्। विखादः। नदनुः। भरे। आक्रन्द्। आहवे। आजौ। पृतनाज्यम्। अभीके। समीके। ममसत्यम्। नेमधिता। सङ्काः। समितिः। समनम्। मीळ्हे। पृतनाः। स्पृधः। मृधः। पृत्सु। समत्सु। समर्य। समरणे। समोहे। समिथे। संख्य। सङ्गे। संयुग। सङ्गथे। सङ्गमे। वृत्रतूर्ये। पृक्षे। आणौ। शूरसातौ। वाजसातौ। समनीके। खले। खजे। पौंस्य। महाधने। वाजे। अज्म। सद्म। संयत। संवतः। इति। संग्रामस्य। [। संवतः। इति। षद्वत्वारिंशत्। सङ्ग्रामनामानि। ]। ।। १७। ।।। इन्वति। नक्षति। आक्षाणः। आनट्। आष्ट। आपानः। अशत्। नशत्। आनशे। अश्नुते। इति। [। दश। ]। व्याप्तिकर्माणः। ।। १८। ।।। दभ्नोति। श्नथति। ध्वरति। धूर्वति। वृणक्ति। वृश्चति। कृण्वति। कृन्तति। श्वसिति। नभते। अर्दयति। स्तृणाति। स्नेहयति। यातयति। स्फुरति। स्फुलति। निवपन्तु। अवतिरत। वियातः। आतिरत्। तळइत्। अखण्डल। द्रूणाति। रम्णाति। शृणाति। शम्नाति। तृणेळहि। ताळहि। नितोशते। निबर्हयति। मिनाति। मिनोति। धमति। इति। वधकर्माणः।

[धमति। इति। त्रयस्त्रिंशत्। वधकर्माणह्। ]। ।। १९। ।।। दिद्युत्। नेमि। हेतिः। नमः। पविः। सृकः। वधः। वज्रः। अर्कः। कुत्सः। कुलिशः। तुञ्जः। तिग्मः। मेनिः। स्वधितिः। सायकः। परशुः। इति। वज्रस्य। [परशुः। इति। अष्टादश। वज्रनामानि। ]। ।। २०। ।।। इरज्यति। पत्यत। क्षयति। राजति। इति। [। चत्वारः। ]। ऐश्वर्यकर्माणः। ।। २१। ।।। राष्ट्री। अर्यः। नियुत्वान्। इनः। इनः। इति। ईश्वरस्य। [। इनः। इनः। चत्वारि। ईश्वरनामानि। ]। ।। २२। ।। इति निघण्टौ द्वितीयः अध्यायः

## अथ निघण्टौ तृतीयः अध्यायः

उरु। तुवि। पुरु। भूरि। शश्वत्। विश्वम्। परीणस। व्यानशिः। शतम्। सहस्रम्। सलिलम्। कुवित्। इति। बहोः। [। कुवित्। इति। द्वादश। बहुनामानि। ]। ।। १। ।।। ऋहन्। ह्रस्वः। निघृष्वः। मायुकः। प्रतिष्ठा। कृधु। वम्रकः। दभ्रम्। अर्भकः। क्षुल्लकः। अल्पकम्। इति। ह्रस्वस्य। [। अल्पः। इति। एकादश। ह्रस्वनामानि। ]। ।। २। ।।। महत। ब्रध्नः। ऋष्वः। बृहत्। उक्षितः। तवसः। तविषः। महिषः।

अभ्वः। ऋभुक्षाः। उक्षा। विहायाः। यह्वः। ववक्षिथ। विवक्षसे। अम्भृणः। माहिनः। गभीर। ककुहः। रभसः। व्राधन्। विरप्शी। अद्भुतम्। बंहिष्ठः। बर्हिषि। इति। महतः। [। बर्हिषत्। इति। पञ्चविंशतिः। महन्नामानि। ]। ।। ३। ।।। गयः। कृदरः। गर्तः। हर्म्यम्। अस्तम्। पस्त्यम्। दुरोणे। नीळम। दुर्याः। स्वसराण। अमा। दमे। कृत्तिः। योनिः। सद्म। शरणम्। वरूथम्। छर्दिः। छदिः। धाया। शर्म। अज्म। इति। गृहाणाम्। [। अज्म। इति। द्वाविंशतिः। गृहनामानि। ]। ।। ४। ।। *।। इरज्यति। विधेम। सपर्यति। नमस्यति। दुवस्यतिऽ। ऋध्नोति। ऋणद्धि। ऋच्छति। सपति। विवासति। इति। [। दश। ]। परिचरणकर्माणः। ।। ५। ।।। शिम्बाता। शतरा। शातपन्ता। शिल्गुः। स्यूमकम्। शेवृधम्। मयः। सुग्म्यम्। सुदिनम्। शूषम्। शुनम्। शग्मम। भेषजम्। जलाषम्। स्योनम्। सुम्नम्। शेवम्। शिवम्। शम्। कत्। इति। सुखस्य। [। कम्। इति। विंशतिः। सुखनामानि। ]। ।। ६। ।।। निर्णिक्। वव्रिः। वर्पः। वपुः। अमतिः। अप्सः। प्सुः। अप्नः। पिष्टम। पेशः। कृशनम्। मरुत्। अर्जुनम्। ताम्रम्। अरुषम्। शष्यम्। इति। रूपस्य। [।

शिल्पम्। इति। षोडश। रूपनामानि। ]। ।। ७। ।।। अस्त्रेमा। अनेमा। अनेद्यः। अनवद्यः। अनभिशस्त्यः। उक्थ्यःठ। सुनीथः। पाकः। वामः। वयुनम्। इति। प्रशस्यस्य। [। वयुनम्। इति। दश। प्रशस्यनामानि]। ।। ८। ।।। केतुः। केतः। चेतः। चित्तम्। क्रतुः। असुः। धीः। शची। माया। वयुनम्। अभिख्या। इति। प्रज्ञायाः। [। अभिख्या। इति। एकादश। प्रज्ञानामानि। ]। ।। ९। ।।। बट्। श्रत्। सत्रा। अद्धा। इत्था। ऋतम्। इति। सत्यस्य। [। ऋतम्। इति। षट्। सत्यनामानि]। ।। १०। ।।। चिक्यत्। चाकनत्। अचक्ष्म। चष्टे। वि। चष्टे। विचर्षणिः। विश्वचर्षणिः। अवचाकशत्। इति। [। अष्टौ। ]। पश्यतिकर्माणः। ।। ११। ।।। हिकम्। नुकम्। सुकम्। आहिकम्। आकीम्। नकिः। माकिः। नकीम्। आकृतम्। इति। आमिश्राणि। [। आकृतम्। इति। नव। उत्तराणि। पदानि। सर्वपदसमाम्नानाय]। ।। १२। ।।। इदम्। इव। इदम्। यथा। अग्निः। न। ये। चतुरः। चित्। ददमानात्। ब्राह्मणाः। व्रतचारिणः। वृक्षस्य। नु। ते। पुरुहूत। वयाः। जारः। आ। भगम्। मेषः। भूतः। अभि। यन्। अयः। तद्रूपः। तद्वर्णह्। तद्वत्। तथा। इति। उपमाः।। १३। ।।। अर्चति। गायति।

रेभति। स्तोभति। गूर्धयत। गृणाति। जरते। ह्वयते। नदति। पृच्छति। रिहति। धमति। कृपायति। कृपण्यति। पनस्यति। पनायते। वल्गूयति। मन्दते। भन्दते। छन्दति। छदयते। शशमान। रञ्जयति। रजयति। शंसति। स्तौति। यौति। रौति। नौति। भनति। पणायति। पणते। सपति। पपृक्षाः। महयति। वाजयति। पूजयति। मन्यते। मदत। रसति। स्वरति। वेनति। मन्द्रयते।। जल्पति। इति। चतुश्चत्वारिंशत्। अर्चतिकर्माणः।। १४। ।।। । भन्दते। भणति। भणायते। स्वपिति। पिपृक्षाः। महयति। वाजयति। पूजयति। स्वदति। मदति। रसति। वेनत। कल्पते। जल्पति। मन्त्रयते। वन्दते। इति। अर्चतिकर्माणः।। १८। ।।। विप्रः। विग्रः। गृत्सः। धीरः। वेनः। वेधाः। कण्वः। ऋभुः। नवेदाः। कविः। मनीषी। मन्धाता। विधात। विपः। मनश्चित्। विपश्चित्। विपन्यवः। आकेनिपः। उशिजः। कीस्तासः। अद्धातयः। मतयः। मतुथाः। मेधाविनः। इति। मेधाविनाम्। [। वाघतः। इति। चतुर्विंशतिः। मेधाविनामानि। ]।। १५। ।।। रेभः। जरिता। कारुः। नदः। स्तामुः। कीरि। गौः। सूरिः। नादः। छन्दः। स्तुप्। रुद्रः। कृपण्युः। इति। त्रयोदश।

स्तोतृनामानि।। १६। ।।। यज्ञः। वेनः। अध्वरः। मेधः। विदथः। नार्यः। सवनम्। होत्रा। इष्टिः। देवताता। मखः। विष्णुः। इन्दुः। प्रजापतिः। घर्मः। इति। यज्ञस्य। [। घर्मः। इति। पञ्चदश। यज्ञनामानि]।। १७। ।।। भरताः। कुरवः। वाघतः। वृक्तबर्हिषः। यतस्रुचः। मरुतः। सबाधः। देवयवः। इति। ऋत्विजाम्। [। देवयवः। इति। अष्टौ। ऋत्विङ्नामानि। ]।। १८। ।।। ईमहे। यामि। मन्महे। दद्धि। शग्धि। पूर्धि। मिमिढ्ढि५। मिमीहि। रिरिढ्ढ। रिरीहि। पीपरत्। यन्तारः। यन्धि। इषुध्यति। मदेमहि। मनामहे। मायते। इति। [सप्तदश। ]। याञ्चाकर्माणः।। १९। ।।। दाति। दाशति। दासति। राति। रासति। पृणक्षि। पृणाति। शिक्षति। तुञ्जत। मंहते। इति। [। दश। ]। दानकर्माणः।। २०। ।।। परि। स्त्रव। पवस्व। अभ्यर्ष। आशिषः। इति। [। चत्वारः। ]। अध्येषणाकर्माणः।। २१। ।।। स्वपिति। सस्ति। इति। द्वौ। स्वपितिकर्माणौ।। २२। ।।। कूपः। कातुः। कर्तः। वव्रः। काटः। खातः। अवतः। क्रिविः। सूदः। उत्सः। ऋश्यदात। कारोतरात्। [१]कुशयः। केवटः। इति। कूपस्य। [। केवटः। इति। चतुर्दश। कूपनामानि। ]।। २३। ।।। तृपुः। तक्का।

रिम्वा। रिपुः। रिक्वा। रिहायाः। तायुः। तस्करः। वनर्गुः। हुरश्चित्। मुषीवान्। मलिम्लुचः। अघशंस। वृकः। इति। स्तेनस्य। [। वृकः। इति। चतुर्दश। एव। स्तेननामानि। ]।। २४। ।।। निण्यम्। सस्वः। सनुतः। हिरुक्। प्रतीच्यम्। अपीच्यम्। इति। [। षट्। ]। निर्णीतान्तर्हितनामधेयानि।। २५। ।।। आके। पराके। पराचइः। आरे। परावतः। इति। दूरस्य। [। परावतः। इति। पञ्च। दूरनामानि। ]।। २६। ।।। प्रत्नम्। प्रदिवः। प्रवयाः। सनेम। पूर्व्यम्। अह्नाय। इति। पुराणस्य। [। अह्नाय। इति। षट्। पुराणनामानि। ]।। २७। ।।। नवम्। नूत्नम्। नूतनम्। नव्यम्। इदा। इदानीम्। इति। नवस्य। [। इदानीम्। इति। षट्। एव। नवनामानि। ]।। २८। ।।। । प्रपित्वे। अभीके। दभ्रम्। अर्भकम्। तिरः। सतः। त्वः। नेमः। ऋक्षाःꣳ। स्तृभिः। वभ्रीभिः। उपजिह्विका। ऊर्दरम्। कृदरम्। रम्भः। पिनाकम्। मेना। ग्नाः। शेपः। वैतसः। अया। एना। सिषक्तु। सचते। भ्यसते। रेजते। इति। द्विशः। [। रेजते। इति। षड्विंशतिः। द्विशः। उत्तराणि। नामानि]।। २९। ।।। स्वधे। पुरन्धी। धिषणे। रोदसी। क्षोणी। अम्भसी। नभसी। रजसी। सदसी। सद्मनी। घृतवती। बहुले। गभीरे।

गम्भीरे। ओण्यउ। चम्वउ। पार्श्वे। मही। उर्वी। पृथ्वी। अदिती। अही। दूरे। अन्ते। अपारे। अपारे। इति। द्यावापृथिव्योः। [। अपारे। अपारे। इति। चतुर्विंशतिः। द्यावापृथिवीनामधेयानि। नामधेयानि। ]।। ३०। ।। इति निघण्टौ तृतीयः अध्यायः

## अथ चतुर्थः अध्यायः

जहा। निधा। शिताम। मेहना। दमूनाः। मूषः। इषिरेण। कुरुतनं। जठरे। तितौ। शिप्रे। मध्या। मन्दू। ईर्मान्तासः। कायमानः। लोधम्। शीरम्। विद्रधे। द्रुपदे। तुग्वनि। नंसन्ते। नसन्त। आहनसः। अद्मसत्। इष्मिणः। वाहः। परितक्म्या। सुविते। दयते। नूचित्। नूच। दावने। अकूपारस्य। शिशीते। सुतुकः। सुप्रायणाः। अप्रायुवः। च्यवनः। रजः। हरः। जुहुरे। व्यन्तः। क्राणाः। वाशी। विषुणः। जामिः। पिता। शंयो। अदितिः। एरिरे। जसुरिः। जरते। मन्दिने। गौः। गातुः। दंसयः। तूताव। चयसे। वियुत। ऋधक्। अस्याः। अस्य। [। अस्य। इति। द्विषष्टिः। पदानि। ]। ।। १। ।।। सस्निम्। वाहिष्ठः। दूतः। वावशानः। वार्यम्। अन्धः। असश्चन्ती। वनुष्यति।

तरुष्यति। भन्दनाः। आहनः। नदः। सोमः। अक्षाः। श्वात्रम। ऊतिः। हासमाने। पङ्क्तिः। ससम्। द्विता। व्राः। वराहः। स्वसराणि। शर्याः। अर्कः। पविः। वक्षः। धन्व। सिनम्। इत्था। सचा। चित। आ। द्युम्नम्। पवित्रम्। तोदः। स्वञ्चाः। शिपिविष्टः। विष्णुः। आघृणिः। पृथुज्रयाः। अथर्युम्। काणुका। अध्रिगुः। आङ्गूषः। आपान्तमन्युः। श्मशा। उर्वशी। वयुनम। वाजपस्त्यम्। वाजगन्ध्यम्। गध्यम्। गधिता। कौरयाणः। तौरयाणः। अह्रयाणः। हरयाणः। आरितः। व्रन्दी। निष्षपी। तूर्णाशम्। क्षुम्पम्। निचुम्पुणः। पदिम्। पादुः। वृकः। जोषवाकम्। कृत्तिः। श्वघ्नी। समस्य। कुटस्य। चर्षणिः। शम्बः। केपयः। तूतुमाकृषे। अंसत्रम्। काकुदम्। बीरिटे। अच्छ। परि। ईम्। सीम्। एनम। एनाम्। सृणिः। [सृणिः। इति। चतुरुत्तरम्। अशतीतिः। पदानि]। ।। २। ।।। आशुशुक्षणिः। आशाभ्यः। काशिः। कुणारुम्। अलातृणः। सललूकम्। कत्पयम्। विस्रुहः। वीरुधः। नक्षद्दाभम्। अस्कृधोयुः। निश्रम्भाः। बृबदुक्थम्। ऋदूदरः। ऋदूपे। पुलुकामः। असिन्वती। कपना। भाऋजीकः। रुजानाः। जूर्णिः। ओमना। उपलप्रक्षिणी। उपसि। प्रकलवित्। अभ्यर्धयज्वा। ईक्षे।

क्षोणस्य। अस्मे। पाथः। सवीमनि। सप्रथाः। विदथान। श्रायन्तः। आशीः। अजीगः। अमूरः। शशमानः। देवः। देवाच्या। कृपा७। विजामातुः। ओमासः। सोमानम्। अनवायम्। किमीदिने। अमवान्। अमीवा। दुरितम्। अप्वा। अमतिः। श्रुष्ट। पुरन्धिः। रुशत्। रिशादसः। सुदत्रः। आनुषक्। तुर्वणिः। गिर्वणसे। असूर्त्ते। सूर्त्ते। अम्यक्। यादृश्मिन्। जारयायि। अग्रिया। चनः। पचता। शुरुधः। अमिनः। जज्झती। अप्रतिष्कुतः। शाशदानः। सृप्रः। सुशिप्रः। शिप्रे। रंसु। द्विबर्हाः। अक्रः। उराणः। स्तियानाम्। स्तिपाः। जबारु। जरूथम्। कुलिशाः। तुञ्जः। बर्हणा। ततनुष्टिम। इलीबिशः। कियेधाः। भृमिः। विष्पितः। तुरीपम्। रास्पिनः। ऋञ्जतिः। ऋजुनीती। प्रतद्वसू। हिनोत। चोष्कूयमाणः। चोष्कूयते। सुमत्। दिविष्टिषु। दूतः। जिन्वति। अमत्र। ऋचीषमः। अनर्शरातिम्। अनर्वा। असामि। गल्दया। जळहवः। बकुरः। बेकनाटान्। अभिधेतन। अंहुर। बतः। बाताप्यम्। चाकन्। रथर्यति। असक्राम्। आधवः। अनवब्रव। सदान्वे। शिरिम्बिठः। पराशरः। क्रिविर्दती। करूलती। दनः। शरारुः। इदंयु। कीकटेषु। बुन्दः। वृन्दम्। किः।

उल्बम्। ऋबीसम्। ऋबीसम्। [ऋबीसम्। ऋबीसम्। इति। त्रयस्त्रिंशच्छतम्। पदानि]। ।। ३। ।। इति निघण्टौ चतुर्थः अध्यायः।

## अथ निघण्टौ पञ्चमः अध्यायः

अग्निः। जातवेदाः। वैश्वानरः। इति। त्रीणि। पदानि। ]। ।। १। ।।। द्रविणोदाः। इध्मः। तनूनपात्। नराशंसः। इळ। बर्हिः। द्वारः। उषासानक्ता। देव्या। होतारा। तिस्रः। देवीः। त्वष्टा। वनस्पतिःਠ। स्वाहाकृतयः। [। इति। त्रयोदशपदानि। ]। ।। २। ।।। अश्वः। शकुनिः। मण्डूकाः। अक्षाः। ग्रावाणः। नाराशंस। रथः। दुन्दुभिः। इषुधिः। हस्तघ्नः। अभीशवः। धनुः। ज्या। इषुः। अश्वाजनी। उलूखलम। वृषभः। द्रुघणः। पितुः। नद्यःਠ। आपः। ओषधयः। रात्रिः। अरण्यानी। श्रद्धा। पृथिवी। अप्वा। अग्नायी। उलूखलमुसले। हविर्धाने। द्यावापृथिवी। विपाट्छुतुद्री। आर्त्नीਠ। शुनासीरौ। देवी। जोष्ट्री। देवी। ऊर्जाहुती। [। इति। षट्त्रिंशत्। पदानि। ]। ।। ३। ।।। वायुः। वरुणः। रुद्रः। इन्द्रः। पर्जन्यः। बृहस्पतिः। ब्रह्मणस्पतिः। क्षेत्रस्य। पतिः। वास्तोष्पतिः। वाचस्पतिः। अपां। नपात्। यमः।

मित्रः। कः। सरस्वान्। विश्वकर्मा। तार्क्ष्यः। मन्युः। दधिक्राः। सविता। त्वष्टा। वातः। अग्निः। वेनः। असुनीतिः। ऋतः। इन्दुः। प्रजापतिः। अहिः। अहिर्बुध्न्यः। सुपर्ण। पुरूरवाः। [। इति। द्वात्रिंशत्। पदानि। ]। ।। ४। ।।। श्येनः। सोमः। चन्द्रमाः। मृत्युः। विश्वानरः। धाता। विधाता। मरुतः। रुद्राः। ऋभवः। अङ्गिरसः। पितरः। अथर्वाणः। भृगवः। आप्त्याः। अदिति। सरमा। सरस्वती। वाक्। अनुमतिः। राका। सिनीवाली। कुहूः। यमी। उर्वशी। पृथिवी। इन्द्राणी। गौरी। गौः। धेनुः। अघ्न्या। पथ्य। स्वस्ति। उषाः। इळआ। रोदसी। [। इति। षड्विंशत्। पदानि। ]। ।। ५। ।।। अश्विनौ। उषाः। सूर्या। वृषाकपायी। सरण्यूः। त्वष्टा। सविता। भगः। सूर्यः। पूषा। विष्णुः। विश्वानरः। वरुणः। केश। केशिनः। वृषाकपिः। यमः। अजः। एकपात्। पृथिवी। समुद्रः। अथर्वा। मनुः। दध्यङ्। आदित्याः। सप्तऋषयः। देवाः। विश्वेदेवाः। साध्याः। वसवः। वाजिनः। देवपत्न्यः। देवपत्न्यः। [। इति। एकत्रिंशत्। पदानि। ]। ।। ६।

## 3) छन्दस्सूत्रम्

- मयरसत जभनलगसंमितं भ्रमति वाङ्मयं जगति यस्य। स जयति पिङ्गलनागः शिवप्रसादा.द्विशुद्धमतिः॥
- त्रिगुरुं विद्धि मकारं लघ्वादि.समन्वितं यकाराख्यम्। लघुमध्यम.न्तु रेफं सकार.मन्ते गुरुनिबद्धम्॥
- लघ्वन्त्यं हि तकारं जकार.मुभयोर्लघुं विजानीयात्। आदिगुरुं च भकारं नकारमिह पैङ्गले त्रिलघुम्॥
- दीर्घं संयोगपरं तथा प्लुतं व्यञ्जनान्त.मूष्मान्तम्। सानुस्वार.ञ्च गुरुं क्वचि.दवसानेऽपि लघ्वन्त्यम्॥
- आदिमध्यावसानेषु यरता यान्ति लाघवम्। भजसा गौरवं यान्ति मनौ तु गुरुलाघवम्॥
- त्रिविरामं दशवर्णं षण्मात्र.मुवाच पिङ्गल.स्सूत्रम्। छन्दोवर्ग पदार्थ.प्रत्ययहेतोश्च शास्त्राऽऽदौ॥। १.१
- धीश्रीस्त्री म्। १.१।

- वरासा य्। १.२।
- कागुहा र्। १.३।
- वसुधा स्। १.४।
- सातेक्व त्। १.५।
- कदास ज्। १.६।
- किंवद् भ्। १.७।
- नहस न्। १.८।
- गृ ल्। १.९।
- गन्ते। १.१०।
- ध्रादिपरः। १.११।
- हे। १.१२।
- लौ सः। १.१३।
- ग्लौ। १.१४।
- अष्टौ वसव इति॥। १.१५।

- छन्दः। २.१।
- गायत्री। २.२।
- दैव्येकम्। २.3।
- आसुरी पञ्चदश। २.४।
- प्राजापत्याऽष्टौ। २.५।
- यजुषां षट्। २.६।
- साम्नां द्विः। २.७।
- ऋचां त्रिः। २.८।
- द्वौ द्वौ साम्नां वर्धेत। २.९।
- त्रींस्त्री.नृचाम्। २.१०।
- चतुरश्चतुरः प्राजापत्यायाः। २.११।
- एकैकं शेषे। २.१२।
- जह्या.दासुरी। २.१3।

- तान्युष्णि.गनुष्टु.ब्बृहती पङ्क्ति त्रिष्टु.ब्जगत्यः। २.१४।
- तिस्रस्तिस्र.स्सनाम्न्य एकैका ब्राह्म्यः। २.१५।
- प्राग्यजुषा.मार्ष्य इति।। २.१६।
- पादः। ३.१।
- इयादिपूरणः। ३.२।
- गायत्र्या वसवः। ३.३।
- जगत्या आदित्याः। ३.४।
- विराजो दिशः। ३.५।
- त्रिष्टुभो रुद्राः। ३.६।
- एक.द्वि.त्रि.चतुष्पा.दुक्तपादम्। ३.७।
- आद्यं चतुष्पा.दृतुभिः। ३.८।
- क्वचित् त्रिपा.दृषिभिः। ३.९।
- सा पादनिचृत्। ३.१०।

- षड्क.सप्तकयो.र्मध्येऽष्टा.वतिपादनिचृत्। ३.११।
- द्वौ नवकौ षड्कश्च नागी।३.१२
- विपरीता वाराही। ३.१३।
- षड्क.सप्तकाऽष्टकै.र्वर्धमाना। ३.१३।
- विपरीता प्रतिष्ठा। ३.१५।
- तृतीयं द्विपा.ज्जागतगायत्राभ्याम्। ३.१६।
- त्रिपा.त्त्रैष्टुभैः। ३.१७।
- उष्णि.ग्गायत्रौ जागतश्च। ३.१८।
- ककुम्मध्ये चे.दन्त्यः। ३.१९।
- पुरउष्णिक् पुरः।। ३.२०।
- परोष्णिक् परः। ३.२१।
- चतुष्पा.दृषिभिः। ३.२२।
- अनुष्टुब् गायत्रैः। ३.२३।

- त्रिपा.त्क्वचि.ज्जागताभ्याञ्च। ३.२४।
- मध्येऽन्ते च। ३.२५।
- बृहती जागत.स्त्रयश्च गायत्राः। ३.२६।
- पथ्या पूर्वश्चे.त्तृतीयः। ३.२७।
- न्यङ्कुसारिणी द्वितीयः। ३.२८।
- स्कन्धोग्रीवी क्रौष्टुकेः। ३.२९।
- उरोबृहती यास्कस्य। ३.३०।
- उपरिष्टा.द्बृहत्यन्ते। ३.३१।
- पुरस्ता.द्बृहती पुरः। ३.३२।
- क्वचि.न्नवका.श्चत्वारः। ३.३३।
- वैराजौ गायत्रौ च। ३.३४।
- त्रिभि.र्जागतै.र्महाबृहती। ३.३५।
- सतोबृहती ताण्डिनः। ३.३६।

- पङ्क्ति.र्जागतौ गायत्रौ च। ३.३७।
- पूर्वौ चे.दयुजौ सतःपङ्क्तिः। ३.३८।
- विपरीतौ च॥। ३.३९।
- आस्तारपङ्क्तिः परतः। ३.४०।
- प्रस्तारपङ्क्तिः पुरतः। ३.४१।
- विष्टारपङ्क्ति.रन्तः। ३.४२।
- संस्तारपङ्क्ति.र्बहिः। ३.४३।
- अक्षरपङ्क्तिः पञ्चका.श्चत्वारः। ३.४४।
- द्वा.वप्यल्पशः। ३.४५।
- पदपङ्क्तिः पञ्च। ३.४६।
- चतुष्क.षट्कौ त्रयश्च। ३.४७।
- पथ्या पञ्चभि.र्गायत्रैः। ३.४८।
- जगती षड्भिः। ३.४९।

- एकेन त्रिष्टुब् ज्योतिष्मती। ३.५०।
- तथा जगती। ३.५१।
- पुरस्ताज्ज्योतिः प्रथमेन। ३.५२।
- मध्येज्योति.र्मध्यमेन। ३.५३।
- उपरिष्टाज्ज्योति.रन्त्येन। ३.५४।
- एकस्मिन् पञ्चके छन्द.श्शङ्कुमती। ३.५५।
- षट्के ककुद्मती। ३.५६। (ककुम्मती)
- त्रिपा.दणिष्ठमध्या पिपीलिकमध्या। ३.५७।
- विपरीता यवमध्या। ३.५८।
- ऊनाऽधिकेनैकेन निचृ.द्भुरिजौ। ३.५९।
- द्वाभ्यां विराट् स्वराजौ। ३.६०।
- आदित.स्सन्दिग्धे॥। ३.६१।
- देवतादितश्च। ३.६२।

- अग्नि.स्सविता सोमो बृहस्पति.र्मित्रावरुणा.विन्द्रो विश्वे देवा देवताः। ३.६३।
- स्वरा.ष्षड्जादयः। (स्वरा. ष्षड्ज ऋषभ गान्धार मध्यम पञ्चम धैवत निषादाः। ३.६४।
- सित सारङ्ग पिशङ्ग कृष्ण नील लोहित गौरा वर्णाः। ३.६५।
- आग्निवेश्य काश्यप गौतमाऽऽङ्गिरस भार्गव कौशिक वासिष्ठानि गोत्राणीति। ३.६६। (अग्निवेश्म)
- श्यामा.न्यतिच्छन्दांसि। ३.६७। (नास्ति)
- रोचनाऽऽभाः कृतयः। ३.६८। (नास्ति)
- अनुक्तानां कामतो वर्णा इति। ३.६९। (नास्ति)
- चतुश्शत.मुत्कृतिः। ४.१। (104)
- चतुरश्चतुर.स्त्यजे.दुत्कृतेः। ४.२।
- तान्यभिसँव्याप्रेभ्यः कृतिः। ४.३।

- प्रकृत्या चोपसर्गवर्जितः। ४.४।
- धृत्यष्टिशक्करी जगत्यः। ४.५।
- पृथक्पृथक्पूर्वत एता.न्येवैषाम्। ४.६।
- द्वितीयं द्वितीयमतितः। ४.७।

---

- अथ लौकिकम्। ४.८। (अत्र)
- आ त्रैष्टुभाच्च यदार्षम्। ४.९।
- पाद.श्चतुर्भागः। ४.१०।
- यथावृत्तसमाप्ति.र्वा। ४.११।
- ल.स्समुद्रा गणः। ४.१२।
- गौगन्तमध्यादि.र्लश्च। ४.१३।
- स्वरा अर्धं चार्यार्धम्। ४.१४।
- अत्रायुङ्ङ ज्। ४.१५।

- षष्ठो ज्। ४.१६।
- न्लौ वा। ४.१७।
- न्लौचे.त्पदं द्वितीयादि। ४.१८।
- सप्तमः प्रथमाऽऽदि। ४.१९।
- अन्त्ये पञ्चमः। ४.२०।
- षष्ठ.श्च ल्। ४.२१।
- त्रिषु गणेषु पादः पथ्याद्ये च। ४.२२।
- विपुलाऽन्या। ४.२३।
- चपला द्वितीय चतुर्थौ ग् मध्ये जौ। ४.२४।
- पूर्वे मुखपूर्वा। ४.२५।
- जघनपूर्वेतरत्र। ४.२६।
- उभयो.र्महाचपला। ४.२७।
- आद्यर्धसमा गीतिः। ४.२८।

- अन्त्ये नोपगीतिः। ४.२९।
- उत्क्रमेणोद्गीतिः। ४.३०।
- अर्धे वसुगण आर्यागीतिः। ४.३१।
- वैतालीयं द्विस्स्वरा अयुक्पादे युग्वसवोऽन्तेग्र्लः। ४.३२।
- गौ पच्छन्दसिकम्। ४.३३।
- आपातलिका भ्गौग्। ४.३४।
- शेषे परेण युङ् न साकम्। ४.३५।
- षट् चाऽमिश्रायुजि। ४.३६।
- पञ्चमेन पूर्व.स्साकं प्राच्यवृत्तिः। ४.३७।
- अयुक् तृतीयेनोदीच्यवृत्तिः। ४.३८।
- आभ्यां युगप.त्प्रवृत्तकम्। ४.३९।
- अयुक् चारुहासिनी ॥। ४.४०।
- युगपराऽन्तिका। ४.४१।

- गन्ता द्विर्वसवो मात्रा समकं ल् नवमः। ४.४२।
- द्वादशश्च वानवासिका। ४.४३।
- विश्लोकः पञ्चमाष्टमौ। ४.४४।
- चित्रा नवमश्च। ४.४५।
- परयुक्तेनोपचित्रा। ४.४६।
- एभिः पादाकुलकम्। ४.४७।
- गीत्यार्या लः। ४.४८।
- शिखा विपर्यस्तार्धा। ४.४९।
- लः पूर्वश्चे.ज्ज्योतिः। ४.५०।
- गश्चेत् सौम्या। ४.५१।
- चूलिकैकान्नत्रिंश.देकत्रिंशदन्ते ग्। ४.५२।
- सा ग् येन न समा लां ग्ल इति।। ४.५३।
- वृत्तम्। ५.१।

- सममर्धसमं विषमं च। ५.२।
- समं तावत्कृत्वः कृत.मर्धसमं विषमञ्च। ५.३।
- राश्यूनम्। ५.४।
- ग्लिति समानी। ५.५।
- ल्गिति प्रमाणी। ५.६।
- वितान.मन्यत्। ५.७।
- पादस्याऽनुष्टुप् वकाम्। ५.८।
- न प्रथमात्स्नौ। ५.९।
- द्वितीय चतुर्थयो.रश्च। ५.१०।
- वाऽन्यत्। ५.११।
- य.च्चतुर्थात्। ५.१२।
- पथ्या युजोज्। ५.१३।
- विपरीतैकीयम्। ५.१४।

- चपला युजोन्। ५.१५।
- विपुलायुग्ल.स्सप्तमः। ५.१६।
- सर्वत.स्सैतवस्य। ५.१७।
- भ्रौन्तौ च। ५.१८।
- प्रतिपादं चतुर्वृध्द्यापदचतुरूर्ध्वम्। ५.१९।
- गावन्त आपीडः।। ५.२०।
- गावादौ चेत्प्रत्यापीडः। ५.२१।
- प्रत्यापीडो गावादौ च। ५.२२।
- प्रथमस्य विपर्यासे मञ्जरीलवल्यमृतधाराः। ५.२३।
- उद्गतामेकतसजौ स्लौ न्सौ ज्गौ भ्नौ ज्लौ ग्स्जौ स्जौग्। ५.२४।
- तृतीयस्य सौरभकं नौभ्गौ। ५.२५।
- ललितं नौसौ। ५.२६।
- उपस्थितप्रचुपितं पृथगाद्यं सौज्भौगौ स्नौज्रौग्नौस्नौन्जौय्। ५.२७।

- वर्धमानं तृतीये नौस्नौन्सौ। ५.२८।
- शुद्धविरा.ळृषभं तज्राः। ५.२९।
- अर्धे। ५.३०।
- उपचित्रकं सोस्लोग् भौग् भ्गौग्। ५.३१।
- द्रुतमध्या भौभ् गौग् जौज्यौ। ५.३२।
- वेगवती सौ स्गौ भौभ् गौग्। ५.३३।
- भद्रविराट् त्जौ गौंम् सौज् गौग्। ५.३४।
- केतुमती स्जौ स्गौ भ्रौन् गौग्। ५.३५।
- आख्यानकी तौज् गौग् ज्तौ ज्गौग्। ५.३६।
- विपरीताख्यानकी ज्तौ ज्गौग् तौज् गौग्। ५.३७।
- हरिणप्लुता सौ स्लौग् न्भौ भ्रौ। ५.३८।
- अपरवक्रं नौलौंग् न्जौ ज्रौ। ५.३९।
- पुष्पिताग्रा नौयौंन् जौज् रौग्।। ५.४०।

- यवमती जौंजौं ज्रौज्रौग्। ५.४१।
- शिखैकान्नत्रिंश.देकत्रिंश.दन्तेग्। ५.४२।
- खञ्जा महत्ययुजीति।। ५.४३।
- यति.र्विच्छेदः। ६.१।
- तनुमध्या त्यौ। ६.२।
- कुमारललिता ज्सौग्। ६.३।
- माणवकाक्रीडितकं भ्तौल् गौ। ६.४।
- चित्रपदा भौगौ। ६.५।
- विद्युन्माला मौगौ। ६.६।
- भुजगशिशुभृता नौम्। ६.७।
- हलमुखी नौंस्। ६.८।
- शुद्ध विराण्-म्सौज् गौ। ६.९।
- पणवो म्नौ य्गौ। ६.१०।

- रुक्मवती भ्मौस् गौ। ६.११।
- मयूरसारिणी जौंर् गौ। ६.१२।
- मत्ता म्भौस्गौ। ६.१३।
- उपस्थिता त्जौज् गौ। ६.१४।
- एकरूपं सौज् गौग्। ६.१५।
- इन्द्रवज्रा तौज् गौग्। ६.१६।
- उपेन्द्रवज्रा ज्तौज् गौग्। ६.१७।
- वाद्यन्ता उपजातयः। ६.१८।
- दोधकं भौभ्गौग्। ६.१९।
- शालिनी म्तौत्  गौग् समुद्र ऋषयः।। ६.२०।
- वातोर्मी म्भौत् गौग्च। ६.२१।
- भ्रमरविलसितं म्भौन् लौग्। ६.२२।
- रथोद्धता नौंर् लौग्। ६.२३।

- स्वागता नौंभ् गौग्। ६.२४।
- वृत्ता नौस्नौग्। ६.२५।
- श्येनी जौंर् लौग्। ६.२६।
- जगती। ६.२७।
- वंशस्था ज्तौ ज्रौ। ६.२८।
- इन्द्रवंशा तौज्रौ। ६.२९।
- द्रुतविलम्बितं न्भौभ्रौ। ६.३०।
- तोटकं सः। ६.३१।
- पुटो नौम्यौ वसुसमुद्राः। ६.३२।
- जलोद्धतगतिर्ज् सौज्सौ रसर्तवः। ६.३३।
- भुजङ्ग प्रयातं यः। ६.३४।
- स्रग्विणी रः। ६.३५।
- प्रमिताक्षरा स्जौसौ। ६.३६।

- वैश्वदेवी मौ याविन्द्रिय ऋषयः। ६.३७।
- नवमालिनी न्जौभ्या.विति ॥। ६.३८।
- प्रहर्षिणी म्नौ ज्रौग् त्रिक दशकौ। ७.१।
- रुचिरा ज्भौस् जौग् समुद्रनवकौ। ७.२।
- मत्तमयूरा म्तौय् सौग्। ७.३।
- असम्बाधा म्तौ न्सौ गा.विन्द्रिय नवकौ। ७.४।
- अपराजिता नौर्सौल् गौ स्वर ऋषयः। ७.५।
- प्रहरणकलिता नौ भ्नौल् गौ च। ७.६।
- वसन्ततिलका त्भौ जौ गौ। ७.७।
- सिंहोन्नता काश्यपस्य। ७.८।
- उद्धर्षिणी सैतवस्य। ७.९।
- चन्द्राऽऽवर्ता नौनौस्। ७.१०।
- मालर्तुनवकौ चेत्। ७.११।

- मणिगुणनिकरो वस्वृषयः। ७.१२।
- मालिनी नौम्यौय् च। ७.१३।
- ऋषभगजविलसितं भ्रौ नौन्गौ स्वर नवकौ। ७.१४।
- हरिणी न्सौम्रौस् लौग्.रस समुद्र ऋषयः। ७.१५।
- पृथ्वी ज्सौ ज्सौय् लौग् वसु नवकौ। ७.१६।
- वंशपत्रपतितं भ्रौन् भौन् लौग् दि.गृषयः। ७.१७।
- मन्दाक्रान्ता म्भौ न्तौत् गौग् समुद्रर्तु स्वराः। ७.१८।
- शिखरिणी य्मौभ् लौगृतु रुद्राः। ७.१९।
- कुसुमितलतावेल्लिता म्तौन् यौ या.विन्द्रियर्तु स्वराः।। ७.२०।
- शार्दूलविक्रीडितं म्सौ ज्सौ तौगादित्य ऋषयः। ७.२१।
- सुवदना म्रौ भ्नौय् भौ ल्गौ स्वर ऋषि रसाः। ७.२२।
- ग्लिति वृत्तम्। ७.२३।
- स्रग्धरा म्रौ भ्नौ यौय् त्रिस्सप्तकाः। ७.२४।

- मद्रकं भ्रौन्रौ न्रौन्गौ दि.गादित्याः। ७.२५।
- अश्वललितं न्जौभ् जौभ् जौभ् सौग्रुद्राऽऽदित्याः। ७.२६।
- मत्ताक्रीडा मौ त्नौ नौन् लौग्वसु पञ्चदशकौ। ७.२७।
- तन्वी भ्तौन् सौ भौन्यौ द्वि.रादित्याः। ७.२८।
- क्रौञ्चपदा भ्मौस् भौ नौनौग् भूतेन्द्रिय वस्वृषयः। ७.२९।
- भुजङ्गविजृम्भितं मौ त्नौ नौर् सौ ल्गौ वसु रुद्र ऋषयः। ७.३०।
- अपवाहको म्नौनौनौन् सौ गौ नवकर्तु रसेन्द्रियाणि। ७.३१।
- दण्डको नौरः। ७.३२।
- प्रथमश्चण्डवृष्टिप्रयातः। ७.३३।
- अन्यत्राऽरातमाण्डव्याभ्याम्। ७.३४।
- शेषः प्रचित इति।। ७.३५।
- अत्राऽनुक्तं गाथा। ८.१।
- द्विकौ ग्लौ। ८.२।

- मिश्रौ च। ८.३।
- पृथग्लामिश्राः। ८.४।
- वसव.स्त्रिकाः। ८.५।
- लर्धे। ८.६।
- सैकेग्। ८.७।
- प्रतिलोमगुणं द्विर्लाद्यम्। ८.८।
- ततोग्येकं जह्यात्। ८.९।
- द्वि.रर्धे। ८.१०।
- रूपं शून्यम्। ८.११।
- द्वि.श्शून्ये। ८.१२।
- ताव.दर्धे तद्गुणितम्। ८.१३।
- द्वि.र्द्व्यूनम्। ८.१४।
- तदन्तानाम्। ८.१५।

- एकोनेद्धा। ८.१६।
- परे पूर्णं परे पूर्णमिति।। ८.१७।

## 4) ऋग्वेदप्रातिशाख्यम् - विषयसूचिका

1. वृत्तिकारकृतं मङ्गलाचरणम्
2. शास्त्रावतारः
3. शास्त्रस्य सम्बन्धः विषयश्च
4. सूत्रकारकृतं मङ्गलाचरणम्
5. सूत्रकारस्य प्रतिज्ञा
6. शास्त्रस्य प्रयोजनम्
7. संहिता-पद-क्रम-स्वरूपम्
8. वर्णमाला

----------

संज्ञा- परिभाषा पटलम्

1. भाष्यकारकृतं मङ्गलाचारणम्,
2. प्रातिशाख्यप्रयोजनम्,
3. समानाक्षरसंज्ञा,
4. सन्ध्यक्षरसंज्ञा,
5. स्वरसंज्ञा,
6. इतर प्लुतस्य दीर्घत्वम्,
7. अनुस्वारस्य स्वरूपम्,
8. व्यञ्जनसंज्ञा,
9. स्पर्शसंज्ञा,
10. वर्गसंज्ञा,
11. अन्तस्थासंज्ञा,
12. ऊष्मसंज्ञा,
13. अघोषसंज्ञा,
14. सोष्मसंज्ञा,
15. अनुनासिकसंज्ञा,
16. पदावसाने प्रथमतृतीयस्पर्शयोर्विकल्पः,
17. ह्रस्वसंज्ञा,

18. दीर्घसंज्ञा,

19. अक्षरसंज्ञा,

20. गुरुसंज्ञा,

21. अनुस्वारव्यञ्जनयोरङ्गत्वविचारः,

22. ह्रस्वस्वरस्य उच्चारणकालः,

23. दीर्घस्वरस्य उच्चारणकालः,

24. प्लुतस्य स्वरसंज्ञा उच्चारणकालश्च,

25. प्लुतोदाहरणानि,

26. स्वरभक्तेः पूर्वभात्त्वं पूर्वाक्षराङ्गत्वञ्च,

27. दीर्घस्वरभक्तेः कालः,

28. व्यञ्जनानां कालः,

29. ह्रस्वस्वरभक्तेः कालः,

30. रक्तसंज्ञा,

31. संयोगसंज्ञा,

32. वर्णानां स्थानानि,

33. डकारस्थाने ळकारः,

34. ढकारस्थाने ळ्हकारश्च,

35. परिभाषासूत्राणि,

36. प्रैषाणां प्रैषवत्त्वम्,

37. पदान्तलक्षणम्,

38. सामवशसन्धेरुल्लेखः,

39. पद्यानां पदवद्भावः,

40. पद्यानां पदवद्भावप्रतिषेधस्थलानि,

41. अवसाने अष्टस्वराणामनुनासिकसंज्ञा,

42. एकस्यैव प्लुतस्याऽनुनासिकसंज्ञा,

43. नामिसंज्ञा,

44. नतिषु नन्तृनम्ययोः पौर्वापर्यम्,

45. अरिफितविसर्जनीयस्य सोपधस्यैकवर्णत्वम्,

46. प्रगृह्यसंज्ञा,

47. रेफिसंज्ञा।

-----------

1. संहिताधिकारः -
2. संहितास्वरूपम्- विवृत्तिस्वरूपम् -उद्ग्राहाः संधयः

3. विवृत्तिकालः-उद्ग्राहपदवृत्तयः संधयः

4. संधिविषये परिभाषाः -भुग्नाः संधयः

5. (स्वरव्यञ्जनसंधयः) -उद्ग्राहवन्तः संधयः

6. अनुलोमाः अन्वक्षरसंधयः- प्राच्यपदवृत्तयः पञ्चालपदवृत्तयश्च

7. (व्यञ्जनस्वरसंधयः)- अभिनिहिताः संधयः

8. प्रतिलोमा अन्वक्षरसंधयः- प्रकृतिभावः

9. प्रतिलोमान्वक्षरसंधिषु प्रथमस्पर्शस्य तृतीयभावः- कानिचिन्निपातनानि

10. -अनानुपूर्व्यसंहिताः अनुलोमान्वक्षरसंधिषु ऊष्मलोपः

11. दीर्घा विवृत्तयः

12. अन्तःपदं विवृत्तयः,

13. तदन्याश्च विवृत्तयः

14. द्विषंधयो विवृत्तयः

15. (स्वरसंधयः)-

16. प्राच्यपञ्चालपदवृत्तिविषये -मतद्वयम्

17. प्रश्लिष्टाः संधयः

18. क्षैप्राः संधयः

## 19. पदवृत्तयः संधयः

# वर्गद्वय वृत्तिः (ऋक् प्रातिशाख्यस्य अङ्गम्)

1. परावरे ब्रह्मणि यं सदाहु, र्वेदात्मानं वेदनिधिं मुनीन्द्राः।

तं पद्मगर्भं परमं त्वादिदेवं, प्रणम्यर्चां लक्षणमाह शौनकः ।।

2. माण्डूकेय स्संहितां वायुमाह तथाऽऽकाशञ्चास्य माक्षव्य एव।

समानताऽनिले चाम्बरे च मत्वाऽगस्त्योऽविपरिहारं तदेव।।

3. अध्यात्मक्लृप्तौ शूरवीर स्सुतश्च वाङ्मनसयो र्विविदन्त्यानुपूर्व्यें।

(संहिता पदक्रम लक्षणम्)

सन्धे र्विवर्तनं निर्भुजं वदन्ति शौद्धाक्षरोच्चारणञ्च प्रतृण्णम्।

4. उभयं व्याप्त मुभयमन्तरेण तथा परे कामा अन्ननाकोभयाख्याः।

प्राण ष्षकारो यच्च बलं नकारः, वाक्प्राणयो र्यश्च होमः।

5. गुरुत्वं लघुता साम्यं ह्रस्वदीर्घप्लुतानि च।

लोपाऽऽगम विकाराश्च प्रकृति र्विक्रमः क्रमः।।

6. स्वरितोदात्त नीचत्वं श्वासो नाद स्तथोभयम्।

एतत् सर्वन्तु विज्ञेयं छन्दोभाषा मधीयता।।

7. छन्दोज्ञान माकारं भूतज्ञानं छन्दसां व्याप्तिं स्वर्गामृतप्राप्तिम्।

अस्य ज्ञानार्थमिद मुत्तरत्र वक्ष्ये शास्त्रमखिलं शैशिरीये।।

8. पदक्रम विभागज्ञो वर्णक्रम विचक्षणः।

स्वरमात्रा विशेषज्ञो गच्छे दाचार्य सम्पदम्।।

## वर्णमाला

9. अकारर्कारादि उ ए ओ ऐ औ, पदाद्यन्तयोर्न ऌकार स्स्वरेषु।

आकारादीन् दीर्घरूपान् द्वितीयान् ह्रस्वेषु, पञ्चस्वपि तानि सन्ति।

10. कखौ गघौ ङ चछौ जझौ ञ - टठौ डढौ ण तथौ दधौ न।

पफौ बभौ म यरलवाः, हशषसाः, अः ᳲक ᳲप अं इति वर्णराशिः क्रमश्च।।

## 5) ऋक् प्रातिशाख्यम्

1. संज्ञा परिभाषा पटलम्

समानाक्षर संज्ञा

1. अष्टौ समानाक्षराण्यादितः।

सन्ध्यक्षर संज्ञा

2. तत श्चत्वारि सन्ध्यक्षराण्युत्तराणि।

स्वरसंज्ञा

3. एते स्वराः।

इपर प्लुतस्य दीर्घवत्त्वम्

4. इपरो दीर्घवत् प्लुतः।

अनुस्वार स्वरूपम्

5. अनुस्वारो व्यञ्जनं वा स्वरो वा।

व्यञ्जन संज्ञा

6. सर्व श्शेषो व्यञ्जनान्येव।

स्पर्श संज्ञा

7. तेषा माद्यास्स्पर्शाः।

वर्ग संज्ञा

8. पञ्च ते पञ्च वर्गाः।

अन्तस्था संज्ञा

9. चतस्त्रोऽन्तस्था स्ततः।

ऊष्म संज्ञा

10. उत्तरेऽष्टा ऊष्माणः।

अघोष संज्ञा

11. अन्त्या स्सप्त तेषा मघोषाः।

12. वर्गे वर्गे च प्रथमावघोषौ।

सोष्म संज्ञा

13. युग्मौ सोष्माणौ।

अनुनासिक संज्ञा

14. अनुनासिकोऽन्त्यः।

पदावसाने प्रथम तृतीय स्पर्शयो र्विकल्पः

15. तस्मादन्य मवसाने तृतीयं गार्ग्य स्स्पर्शम्।

16. प्रथमं शाकटायनः।

ह्रस्व संज्ञा

17. ओजा ह्रस्वा स्सप्तमान्ता स्स्वराणाम्।

दीर्घ संज्ञा

18. अन्ये दीर्घाः।

अक्षर संज्ञा

19. उभये त्वक्षराणि।

गुरु संज्ञा

20. गुरूणि दीर्घाणि।

21. तथेतरेषां संयोगानुस्वारपराणि यानि।

अनुस्वार व्यञ्जनयोरङ्गत्व विचारः

22. अनुस्वारो व्यञ्जन ञ्चाक्षराङ्गम्।

23. स्वरान्तरे व्यञ्जना न्युत्तरस्य।

24. पूर्वस्यानुस्वार विसर्जनीयौ।

25. संयोगादि र्वा।

26. च परक्रमे द्वे।

ह्रस्व स्वरस्य उच्चारण कालः

27. मात्रा ह्रस्वः।

अवग्रहस्य उच्चारण कालः

28. ताव दवग्रहान्तरम्।

दीर्घस्वरस्य उच्चारण कालः

29. द्वे दीर्घः।

प्लुतस्य स्वरसंज्ञा, उच्चारणकालश्च

30. तिस्रः प्लुत उच्यते स्वरः।

प्लुतोदाहरणानि

31. अ॒ध स्वि॑द॒सी 3 दु॒परि॑स्विदा 3सी दर्थे प्लुति, भीँरि॑व विन्दतीँ 3 त्रिः।

स्वरभक्तेः पूर्वभात्त्वं पूर्वाक्षराङ्गत्वञ्च

32. स्वरभक्तिः पूर्वभा गक्षराङ्गम्।

दीर्घस्वरभक्तेः कालः

33. द्राघीयसी सार्धमात्रा।

व्यञ्जनानां कालः

34. इतरे च।

ह्रस्व स्वरभक्तेः कालः

35. अर्धो नान्या।

रक्त संज्ञा

36. रक्तसंज्ञोऽनुनासिकः।

संयोग संज्ञा

37. संयोगस्तु व्यञ्जन सन्निपातः।

वर्णानां स्थानानि

38. कण्ठ्योऽकारः।

39. प्रथमपञ्चमौ च द्वा ऊष्मणाम्।

40. केचिदेता उरस्यौ।

41. ऋकारल्कारावथ षष्ठ ऊष्मा जिह्वामूलीयाः प्रथमश्च वर्गः।

42. तालव्या वेकार चकारवर्गा विकारैकारौ यकार श्शाकारः।

43. मूर्धन्यौ षकार टकारवर्गौ।

44. दन्तमूलीयस्तु तकारवर्गः।

45. सकाररेफ लकाराश्च।

46. रेफं बस्र्व्य मेके।

47. शेष ओष्ठयोऽपवाद्य नासिक्यान्।

48. नासिक्य यमानुस्वारान्।

49. इति स्थानानि।

50. अत्र यमोपदेशः।

51. जिह्वामूलं तालु चाचार्य आह स्थानं डकारस्य तु वेदमित्रः।

डकारस्थाने ळकारः, ढकारस्थाने ळ्हकारश्च

52. द्वयोश्चास्य स्वरयो र्मध्य मेत्य संपद्यते स डकारो ळकारः।

ळ्हकारता मेति स एव चास्य ढकार स्सन्नूष्मणा संप्रयुक्तः।।

इळा॑, सा॒ळ्हा॑ चात्र निदर्शनानि वीड्वङ्ग इत्येत दवग्रहेण।।

परिभाषा सूत्राणि

53. न्यायै र्मिश्रा नपवादान् प्रतीयात्।

54. सर्वशास्त्रार्थं प्रतिकण्ठमुक्तम्।

55. स्थान प्रश्लेषोपदेशे स्वराणां ह्रस्वादेशे ह्रस्वदीर्घौ सवर्णौ।

56. असावमुमिति तद्भावमुक्तं यथाऽन्तरम्।

प्रैषाणां पादवत्त्वम्

57. पादवच्चैव प्रैषान्।

पदान्त लक्षणम्

58. प्राक्कानार्षा दितिकरणात् पदान्तांस्तद्युक्तानाम्।

59. तेन येऽसंहितानाम्।

सामवश सन्धेरुल्लेखः

60. सामवशा इति चैवापवादान् कुर्वन्ति ये सम्पदं पादवृत्तयोः।

पद्यानां पदवद्भावः

61. अप्रत्याम्नाये पदवच्च पद्यान्।

पद्यानां पदवद्भाव प्रतिषेध स्थलानि

62. ऋते नतोपाचरित क्रमस्वरान्।

अवसाने अष्टस्वराणां - अनुनासिक संज्ञा

63. अष्टावाद्या नवसानेऽप्रगृह्या नाचार्या आहु रनुनासिकान् स्वरान्।

एकस्यैव प्लुतस्यानुनासिक संज्ञा

64. तत् त्रिमात्रे शाकला दर्शय न्त्याचार्य शास्त्र परिलोप हेतवः।

नामि संज्ञा

65. ऋकाराऽऽदयो दश नामिन स्स्वराः।

नतिषु नन्तृ नम्ययोः पौर्वापर्यम्

66. पूर्वो नन्ता नतिषु नम्यमुत्तरम्।

अरिफित विसर्जनीयस्य सोपधस्यैकवर्णवत्त्वम्

67. सहोपधोऽरिफित एकवर्णवद्विसर्जनीय स्स्वरघोषवत् परः।

प्रगृह्यसंज्ञा

68. ओकार आमन्त्रितजः प्रगृह्यः।

69. पदश्चान्यः।

70. अपूर्वपदान्तगश्च।

71. षष्ठाऽऽदयश्च द्विवचोऽन्तभाज स्त्रयो दीर्घाः।

72. साप्तमिकौ च पूर्वौ।

73. अस्मे युष्मे त्वे अमी च प्रगृह्याः।

74. उपोत्तमं नानुदात्तं न पद्यम्।

75. उकारश्चेतिकरणेन युक्तो रक्तोऽपृक्तो द्राघित श्शाकलेन।

रेफि संज्ञा

76. ऊष्मा रेफी पञ्चमो नामि पूर्वः।

77. महोऽपोवर्ज मितरो यथोक्तम्।

78. अन्तोदात्त मन्तः।

79. अक्षा र्विपर्यये।

80. स्पर्शो चोषः प्रत्यये पूर्वपद्यः।

81. प्रातः।

82. देवं भाः।

83. वध राद्युदात्तम्।

84. करनुदात्तम्।

85. अबिभः।

86. तदादः।

87. स्तः प्रागाथम्।

88. एतशो कः।

89. दिवे कः।

90. अपस्कः।

91. अत्साः।

92. अविपूर्व मस्तः।

93. स्वस्स्वरितम्।

94. न समासाङ्ग मुत्तरम्।

95. स्वरादेशोऽपूर्वपदेषु।

96. अवर्महः।

97. अनर्धर्चान्ते स्वरघोषवत् परमूधः।

98. न रेफेऽरुषासोऽतृण्मही।

99. वरवरावरिति चैकपादे व्यपपूर्वाण्यसमासाङ्गयोगे।

100. पथ्या मघोनी दिवि चक्षसा मदे पूर्वोऽर्चिषा तीतृषामोत्तरेषु न।

101. होतस्सनितः पोत र्नेष्ट स्सोत स्सवित र्नेत स्त्वष्टः।

मात र्जनित भ्रात स्न्रात स्स्थात र्जरित र्धात र्धर्तः।

102. जामात र्दुहित र्दर्तः प्रशास्त रवितः पितः।

दोषावस्त रवस्पर्तः प्रयन्त श्चेङ्ख मुत्तमम्।

103. दीध रभा रवरीव रदर्द र्दर्द रदर्ध रजाग रजीगः।

104. वा रपुनःपुन रस्प रक स्स्प स्सस्व रह स्सनुत स्सब रस्वाः।।

2. संहिता-पटलम्

संहिताऽधिकारः

2.1 संहिता पदप्रकृतिः।

संहिता स्वरूपम्

2.2 पदान्ता न्पदाऽऽदिभि स्सन्दध देति यत्सा कालाव्यवायेन।

विवृत्ति स्वरूपम्

2.3 स्वरान्तरं तु विवृत्तिः।

विवृत्ति कालः

2.4 सा वा स्वरभक्तिकाला।

सन्धि विषये परिभाषाः

2.5 पदान्तादिष्वेव विकारशास्त्रं पदे दृष्टेषु वचनात् प्रतीयात्।

2.6 पदं पदान्तादिवदेकवर्णं प्रश्लिष्टमपि।

2.7 आनुपूर्व्येण सन्धीन्।

स्वरव्यञ्जन सन्धयः (अनुलोम- अन्वक्षर सन्धयः)

2.8 एष स्य स च स्वराश्च पूर्वे भवन्ति व्यञ्जन मुत्तरं यदैभ्यः।

तेऽन्वक्षर सन्धयोऽनुलोमाः।

व्यञ्जन स्वरसन्धयः (प्रतिलोम – अन्वक्षर सन्धयः)

2.9 प्रतिलोमास्तु विपर्यये त एव।

प्रतिलोमान्वक्षर सन्धिषु प्रथम स्पर्शस्य तृतीयभावः

2.10 तत्र प्रथमा स्तृतीयभावं प्रतिलोमेषु नियन्ति।

अनुलोमान्वक्षर सन्धिषु - ऊष्मलोपः

2.11 अथेतरेषु। ऊष्मा परिलुप्यते त्रयाणां स्वरवर्जम्।

2.12 न तु यत्र तानि पद्याः।

अन्तःपदं विवृत्तयः – तदन्याश्च विवृत्तयः

2.13 पुरएता तितउना प्रउगं नमउक्तिभिः। अन्तःपदं विवृत्तयः।

2.14 अतोऽन्याः पदसन्धिषु।

स्वसन्धयः – प्राश्लिष्टा स्सन्धयः

2.15 समानाक्षरे सस्थाने दीर्घमेक मुभे स्वरम्।

2.16 इकारोदय एकार मकार स्सोदयः।

2.17 तथा। उकारोदय ओकारम्।

2.18 परेष्वैकार मोजयोः।

2.19 औकारं युग्मयोः।

2.20 एते प्रश्लिष्टा नाम सन्धयः।

क्षैप्रा स्सन्धयः

2.21 समानाक्षर मन्तस्थान् स्वा मकण्ठ्यं स्वरोदयम्।

2.22 न समानाक्षरे स्वे स्वे।

2.23 ते क्षैप्राः प्राकृतोदयाः।

पदवृत्तय स्सन्धयः

2.24 विसर्जनीयोऽरिफितो दीर्घपूर्व स्स्वरोदयः। आकारम्।

2.25 उत्तमौ च द्वौ स्वरौ।

2.26 ताः पदवृत्तयः।

उद्ग्राहा स्सन्धयः।

2.27 ह्रस्वपूर्वस्तु सोऽकारम्।

2.28 पूर्वौ चोपोत्तमात् स्वरौ।

2.29 त उद्ग्राहाः।

उद्ग्राह पदवृत्तय स्सन्धयः।

2.30 दीर्घपरा उद्ग्राह पदवृत्तयः।

भुग्ना स्सन्धयः।

2.31 ओष्ठ्य योन्यो भुग्न मनोष्ठ्ये वकारोऽत्रान्तरागमः।

उद्ग्राहवन्त स्सन्धयः।

2.32 ऋकार उदये कण्ठ्यावकारं तदुद्ग्राहवत्।

प्राच्यवृत्तयः – पञ्चाल पदवृत्तयश्च

2.33 उद्ग्राहाणां पूर्वरूपाण्यकारे प्रकृत्या द्वे ओ भवत्येकमाद्यम्।

प्राच्यपञ्चाल पदवृत्तयस्ताः पञ्चालाना मोष्ठ्यपूर्वा भवन्ति।।

अभिनिहिता स्सन्धयः

2.34 अथाभिनिहित स्सन्धि रेतैः प्राकृत वैकृतैः।

एकीभवति पादादि – रकारस्तेऽत्र सन्धिजाः।।

2.35 अन्तःपाद मकाराच्चेत् संहितायां लघो र्लघु।

यकाराद्यक्षरं परं वकाराद्यपि वा भवेत्।।

2.36 अन्याद्यपि तथायुक्त मावोऽन्तोपहितात् सतः।

2.37 अयेऽयोऽवेऽव इत्यन्तै- रकार स्सर्वथा भवन्न्।

2.38 व इत्येतेन चा न प्र क्क चित्र स्सवितैव कः।

पदै रुपहितेनैतैः।

2.39 सर्वै रेवोदयाः परे।

2.40 अदादवत्रौऽजनयन्ताव्यत्या अभेदयोऽपाष्टि रवन्त्ववीरता।

अमुमुक्त ममतयेऽनशामहा अव त्वचो ऽवीरतेऽवांस्यवोऽरथाः।।

2.41 वासो वायोऽभिभुवे कवष्य स्सङ्क्रन्दनो धीजवन स्स्वधाव।

उत्सादत ऋताव स्सगर्भ्यो हिरण्यश्रृङ्ग इति चोपधाभिः।

2.42 येऽरा रायोऽध मेऽधायि नोऽहि रग्नेऽभिदासति।

जायमानो ऽभवो ऽग्ने ऽयं नृतो ऽपो ऽंहोऽति पिप्रति।।

2.43 जम्भयतोऽहिं मरुतोऽनु भर्त्री यवसेऽविष्यन् वयुने जनिष्ट।

वृत्रहत्येऽवी स्समरे ऽतमाना मरुतो ऽमद न्नभितोऽनवन्त।।

2.44 ब्रुवतेऽध्वंस्तवसेऽवाचि मेऽरपद् दधिरेऽग्ना नहुषो

ऽस्मत्पुरोऽभिनत्। उप तेऽधां वहतेऽयं यमोऽदिति र्जनुषोऽया

सुवितोऽनु श्रियोऽधित।।

2.45 वपुषेऽनु विशोऽयन्त सन्तोऽवद्यानि खेऽनशः।

भरन्तोऽवस्यवोऽवोऽस्तु बुध्न्योऽजो मायिनोऽधमः।।

2.46 देवोऽनयत् पुरूवसोऽसुरघ्नो भूतोऽभि श्वेतोऽरुष स्तेन नोऽद्य।

येऽजामय स्तेऽरदन्नोऽधिवक्ता तेऽवर्धन्त तेऽरुणेभि स्सदोऽधि।।

2.47 स्वाध्योऽजनयन् धन्वनोऽभिमाती रग्नेऽप दह मनसोऽधि योऽध्वनः। यो ऽह्यस्तेऽविन्दंस्पपसोऽधि न योऽधि पादोऽस्य योऽति ब्राह्मणोऽस्य योऽनयत्।।

2.48 सोऽस्माकं यो द्वेषोभ्योऽन्यकृतेभ्य स्तेभ्योऽकरं पयस्वन्तो ऽमृताश्च।

2.49 अन्योऽर्वाकेऽथो इति नोदयेषु पुत्रः पराके च परावतश्च।

2.50 अन्तःपादश्च वयो अन्तरिक्षे वयो अस्याश्रथयो हेतय स्त्रयः।

वो अन्धस श्शायवे अश्विनोभये श्रवो अदि सार्ज्ञयो जामयः पयः।

प्रकृति भावः

2.51 प्रकृत्येति करणादौ प्रगृह्याः।

2.52 स्वरेषु चार्ष्याम्।

2.53 प्रथमो यथोक्तम्।

2.54 सहोदयास्ताः प्रगृहीतपदा स्सर्वत्रैव।

2.55 त्र्यक्षरान्तास्तु नेवे।

2.56 आर्ष्यामेव सन्ध्य यकारपूर्वौ विवृत्तेश्च प्रत्ययस्सन्नुकारः।

2.57 ऊकारादौ स्विति।

2.58 पूषेत्यकारे न चेत् तदेकाक्षरतत्र पूर्वम्।

2.59 श्रद्धा सम्राज्ञी सुशमो स्वधोती पृथुज्रयी पृथिवीषा मनीषा।

अया निद्रा ज्या प्रपेति स्वराणां मुख्ये परे पञ्चम षष्ठयोश्च।।

2.60 स्वरे पादादा उदये सचेति।

2.61 ष्वन्तं जोषं चर्षणी श्चर्षणिभ्यः। एकारान्तं मित्रयो रस्मदीवत्।

नमस्यु रित्युपधं चेत्यपृक्तम्।

2.62 एकारौकारपरौ च कण्ठ्यौ लुशा दर्वाक्।

2.63 गोतमे चामिनन्त।

2.64 विभ्वा विधर्ता विपन्या कदा या

मातेत्यृकारे ऽप्यपादादिभाजि।

2.65 परुच्छेपे भीषा पथेत्यकारे।

2.66 एवाँ अग्निमत्रिषु सा प्लुतोपधा।

2.67 सचादयो या विहिता विवृत्तयः। प्लुतोपधान्ता अनुनासिकोपधाः।

कानिचि न्निपातनानि

2.68 सेदु साऽस्मिन् सेमभि साभिवेगः सेद्दभव स्सोपमा सौषधीरनु।

साऽस्मा अरं सोत न स्सेन्द्र विश्वा सेति साऽस्माक मनवद्य साऽसि।।

2.69 सेदग्ने सेदग्नि र्वासिष्ठं साऽस्माकेभि स्सेदुग्र स्सेमे।

सैना सैनं सेमं सोदञ्चं सेमां सोषां सेषे सेदीषे।

2.70 नू इत्था ते सानो अव्ये वा अस्मे वासौ वेद्यस्याम्।

धिष्ण्येमे नू अन्यत्रा चित् पादादौ नू इन्द्रोत्यर्वाक्।।

2.71 उदू अयान् रजेषितं धनर्चं शतर्चसं दशोणये दशोण्ये।

यथोहिषे यथोचिषे दशोणिं स्वरोदयं पिबा इमं रथोळ्हा।

2.72 वीरास एतन तमू अकृण्वं स्ततारेव प्रैषयू रोदसी मे।

धन्वर्णस स्सरपस स्सचोत प्रधीव वीळू उत सर्तवाजौ।

2.73 अश्वनेव पीवोपवसनानां महो आदित्याँ उषसामिवेतयः।

स्तोतव अम्ब्यञ्च सृजा इयध्यै सचेन्द्र सानो अव्यये स्वधामिता।

2.74 गोओपशा गोऋजीक प्रवादौ मनीषा आ त्वा पृथिवी उत द्यौः।

मनीषावस्यू रणया इहाव बृहती इवेति च यथागृहीतम्।।

2.75 योनिमारै गगादारैग् दुर्योण आवृणक्। हन्त्यास द्रुप आरुपित मनायुधास आसता।

2.76 अस्त्वासतो निराविध्य दभ्यादेवं क आसतः।

न्यावृणङ् नकिरादेवो न्याविध्यदेन मायुनक्।

2.77 अहिह न्नारिणक् पथ आयुक्षाता मुदावता।

रिक्थमारैग् य आयुक्त कुरु श्रवण मावृणि।

अनानुपूर्व्य संहिताः

2.78 शुनश्चिच्छेपं निदितं नरा वा शंसं पूषणम्।

नरा च शंसं दैव्यं ता अनानुपूर्व्यसंहिताः।

दीर्घा विवृत्तयः

2.79 यतो दीर्घ स्ततो दीर्घा विवृत्तयः।

द्विषन्धयो विवृत्तयः

2.80 द्विषन्धय स्तूभयत स्स्वरस्स्वराः।

2.81 प्राच्यपञ्चाल उपधानिभोदया श्शाकल्यस्य स्थविरस्य।

2.82 इतरा स्थितिः।

3 स्वर पटलम्

स्वराणां संख्या, उच्चारण प्रकारश्च

3.1 उदात्त श्चानुदात्तश्च स्वरितश्च त्रय स्स्वराः।

आयाम विश्रम्भाक्षेपै स्त उच्यन्ते।

स्वराक्षरयो र्धर्मधर्मि सम्बन्धः

3.2 अक्षराऽऽश्रयाः।

सन्धौ स्वरित निष्पत्तिः।

3.3 एकाक्षर समावेशे पूर्वयो स्स्वरित स्स्वरः।

स्वरितस्य उच्चारण प्रकारः

3.4 तस्योदात्ततरोदात्ता दर्धमात्रार्धमेव वा।

3.5 अनुदात्तः परश्शेष स्स उदात्तश्रुतिः।

3.6 न चेत्। उदात्तं वोच्यते किञ्चित् स्वरितं वाऽक्षरं परम्।

पदे उदात्तपूर्वं स्वरितम्

3.7 उदात्तपूर्वं स्वरित मनुदात्तं पदेऽक्षरम्।

पदे जात्यस्वरितम्

3.8 अतोऽन्यत् स्वरितं स्वारं जात्य माचक्षते पदे।

पदे प्रचयस्वरस्य उच्चारण प्रकारः

3.9 उभाभ्यान्तु परं विद्यात् ताभ्या मुदात्तमक्षरम्।

अनेक मप्यनुदात्तम्।

3.10 न चेत् पूर्वं तथागतात्।

उदात्तादि स्वराणां सन्धिः

3.11 उदात्तवत्येकीभाव उदात्तं सन्ध्यमक्षरम्।

3.12 अनुदात्तोदये पुन स्स्वरितं स्वरितोपधे।

3.13 इकारयोश्च प्रश्लेषे क्षैप्राभिनिहितेषु च।

उदात्तपूर्वरूपेषु शाकल्यस्यैव माचरेत्।।

3.14 माण्डूकेयस्य सर्वेषु प्रश्लिष्टेषु तथा स्मरेत्।

3.15 इत्येकीभाविनां धर्माः।

3.16 परैः प्रथमभाविनः।

विवृत्ति व्यञ्जन व्यवधानेऽपि स्वरित निष्पत्तिः

3.17 उदात्तपूर्वं नियतं विवृत्त्या व्यञ्जनेन वा।

स्वर्यतेऽन्तर्हितं न चेदुदात्तस्वरितोदयम्।।

सन्धिज स्वरितानां संज्ञासूत्रम्

3.18 वैवृत्त तैरोव्यञ्जनौ क्षैप्राभिनिहितौ च तान्।

प्रश्लिष्टञ्च यथासन्धि स्वारा नाचक्षते पृथक्।।

संहितायां प्रचय स्वरः, तस्य उच्चारण प्रकारश्च

3.19 स्वरिता दनुदात्तानां परेषां प्रचयस्वरः।

उदात्तश्रुतितां यान्त्येकं द्वे वा बहूनि वा।।

3.20 केचित्त्वेक मनेकं वा नियच्छ न्त्यन्ततोऽक्षरम्।

आ वा शेषात्।

3.21 नियुक्तं तूदात्त स्वरितोदयम्।

3.22 नियमं कारणादेके प्रचयस्वर धर्मवत्।

प्रचयस्वर आचार श्शाकल्यान्यतरेययोः।

परिग्रहे स्वर निरूपणम्।

3.23 परिग्रहे त्वनार्षान्तात् तेन वैकाक्षरीकृतात्।

परेषां न्यास माचारं व्याळि स्तौ चेत् स्वरौ परौ।

अवग्रहे स्वर विचारः

3.24 यथा सन्धीयमानाना मनेकीभवतां स्वरः।

उपदिष्ट स्तथा विद्या दक्षराणा मवग्रहे।

3.25 पद्यादींस्तु ह्युदात्ताना मसंहितव दुत्तरान्।

3.26 जात्यवद्वा तथा वान्तौ तनू शचीति पूर्वयोः।

उत्तरयो स्त्रिमात्रयो रन्त्यमात्रोच्चारण विषये मतद्वयम्

3.27 त्रिमात्रयो रुत्तरयो रन्त्याऽपि प्रचयस्वरे।

मात्रा न्यस्ततरैकेषाम्।

3.28 उभे व्याळि स्समस्वरे।

स्वरोच्चारणे केचिद्दोषाः

3.29 असन्दिग्धान् स्वरान् ब्रूयात्।

3.30 अविकृष्टान्।

3.31 अकम्पितान्।

3.32 स्वरितं नातिनिर्हण्यात्।

3.33 पूर्वौ नातिविवर्तयेत्।

स्वरित विशेषेषु कम्पविधानम्

3.34 जात्योऽभिनिहितश्चैव क्षैप्रः प्रश्लिष्ट एव च।

एते स्वराः प्रकम्पन्ते यत्रोच्च स्वरितोदयाः।।

सन्धि पटलम्

अवशंगम आस्थापित स्सन्धिः

4.1 स्पर्शाः पूर्वे व्यञ्जनान्युत्तरा– ण्यास्थापिताना मवशंगमं तत्।

वशंगम आस्थापित स्सन्धिः

4.2 घोषवत्पराः प्रथमा स्तृतीयान् स्वान्।

4.3 उत्तमानुत्तमेषूदयेषु।

4.4 सर्वैः प्रथमै रुपधीयमान श्शकार श्शाकल्यपितु श्छकारम्।

4.5 पदान्तैस्तैरेव तृतीयभूतै स्तेषां चतुर्थानुदयो हकारः।

4.6 विस्थाने स्पर्श उदये मकार स्सर्वेषा मेवोदयस्योत्तमं स्वम्।

4.7 अन्तस्थासु रेफवर्जं परासु तां तां पदादिष्वनुनासिकां तु।

4.8 तथा नकार उदये लकारे।

4.9 ञकारं शकार चकारवर्गयोः।

4.10 तकारो जकार लकारयोस्तौ।

4.11 तालव्येऽघोष उदये चकारम्।

4.12 छकारं तयो रुदय श्शकारः।

4.13 न शाकल्यस्य।

4.14 ता वशाङ्गमानि।

परिपन्नः (वशाङ्गमः) सन्धिः

4.15 रेफोष्मणो रुदययो र्मकारो ऽनुस्वारं तत् परिपन्नमाहुः।

अन्तःपात संज्ञा स्सन्धयः

4.16 ङकारेऽघोषोष्मपरे ऽन्तरैके ककारम्।

4.17 टकार नकारयोस्तु। आहु स्सकारोदययो स्तकारम्।

4.18 ञकारे शकारपरे चकारम्।

4.19 तेऽन्तःपाताः।

ऊष्म विसर्जनीय सन्धेरधिकार सूत्रम्

4.20 अकृतसंहिताना मूष्मान्तानां पटलेऽस्मिन् विधानम्।

कानिचि न्निपातनानि

4.21 चित्कम्भनेनोष्मलोपः।

4.22 ककुद्मान्।

4.23 सम्राड्ब्दः परिपन्नापवादः।

नियत प्रश्रित संज्ञौ विसर्जनीय सन्धी

4.24 विसर्जनीय आकार मरेफी घोषवत्परः।

4.25 ओकारं ह्रस्वपूर्वः।

4.26 तौ सन्धी नियत प्रश्रितौ।

रेफ सन्धयः (विसर्जनीयस्य रेफः)

4.27 सर्वोपधस्तु स्वरघोषवत्परो रेफं रेफी ते पुना रेफसन्धयः।

अकामनियतसंज्ञौ विसर्जनीयसन्धी

4.28 रेफोदयो लुप्यते।

4.29 द्राघितोपधा ह्रस्वस्य।

4.30 अकामनियता उभाविमौ।

व्यापन्न विक्रान्त संज्ञौ विसर्जनीय सन्धी

4.31 अघोषे रेफ्यरेफी चोष्माणं स्पर्श उत्तरे। तत् सस्थान मनूष्मपरे।

4.32 तमेवोष्माण मूष्मणि।

4.33 प्रथमोत्तमवर्गीये स्पर्शे वा।

4.34 ऊष्मणि चाऽनते।

4.35 व्यापन्न ऊष्मसन्धि स्स विक्रान्तः प्राकृतोपधः।

अन्वक्षर वक्र संज्ञो विसर्जनीय सन्धिः

4.36 ऊष्मण्यघोषोदये लुप्यते परे नतेऽपि।

4.37 सोऽन्वक्षर सन्धि र्वक्रः।

विसर्जनीयस्य - अव्यापत्तिः

4.38 अव्यापत्तिः कखपफेषु वृत्तिः।

विसर्जनीयस्य रेफः

4.39 रेफं स्वर्धूः पूरघोषेष्वविग्रहे।

विसर्जनीय सन्धिविषये निपातनानि

4.40 नाक्षा इन्दु स्स्वधितीवाह एव भूम्याददेऽहोभि रुष र्वसूयवः।

आवर्तमोऽहोरात्राण्यदो पितो प्रचेता राज न्वर्तनी रहेति च।।

उपाऽऽचरित संज्ञो विसर्जनीय सन्धिः

4.41 यथाऽऽदिष्टं नामिपूर्व ष्षकारं सकार मन्यो रिफितः ककारे।

पकारे च प्रत्ययेऽन्तःपदन्तु सर्वत्रैवोपाऽऽचरित स्स सन्धिः।।

4.42 अन्तःपादं विग्रहेऽकारपूर्वः पतिशब्दे द्व्यक्षरे पुंस्प्रवादे।

4.43 करं कृतं कृधि करत्करित्यपि परेषु।

4.44 पादान्तगते परीति च।

4.45 असोऽन्तोऽरेफवतः पारशब्दे परि कृतानि करतीति चैषु। अपादान्तीयेष्वपि प्रत्ययेषु।

4.46 वास्तोरित्येतत् पतिशब्द उत्तरे।

4.47 आवि र्हवि र्ज्योति रित्युत्तरश्चेत् ककारः।

4.48 अथो पान्त पश्यन्ति शब्दौ।

4.49 इळाया गा नमसो देवयु र्द्रुहो मातुरिळ स्तानि पदप्रवादे।

4.50 पूर्वः पुरः पूरिति पूर्वपद्यान् पदानि चापोद्य नवैतदेवम्।

4.51 अस्या य स्सोमो बृहतोऽस्य पूर्व्य, उरु ज्योति र्जात इमो वृधोऽन्यः।

4.52 ब्रह्मणो द्वे त्रात र्ऋतो विदु र्वसुः पशु रेतानि कविशब्द उत्तरे।

4.53 पथिशब्दे जिन्वथ श्वेतथो महः।

4.54 पृथुशब्दे विश्वतो वीळितो रजः।

4.55 काम पोष पूर्धि शब्देषु रायः।

4.56 पादादिरन्तश्च दिवस्परीति च।

4.57 दिवस्पृथिव्या अधम स्पदीष्ट पूर्वं पादादौ यदि।

4.58 सस्पदीष्ट।

4.59 शवसो मह स्सहस इळायाः पात्वित्येकं पुत्रशब्दे पराणि।

4.60 रायस्त्वां महस्करथो महस्परं निष्क्रव्यादं निष्कृथ निष्पिपर्तन।

4.61 कबन्धं पृथु कण्वासः पुत्रः पातु पथा पयः।

पायुः पृष्ठं पदं तेषां प्रवादा उदये दिवः।।

4.62 रजस स्पात्यन्त स्पथाः कस्काव्या चतुरस्कर।

स्वादुष्किल निदस्पातु द्यौष्पित र्वसतिष्कृत।

4.63 तपोष्पवित्रं त्रिष्पूत्वी धीष्पीपाय विभिष्पतात्।

द्यौष्पिता रजसस्पृष्टो ददुष्पज्राय नस्करः।।

4.64 वसुष्कुवि न्मनुष्पिता पितुष्पिता पितुष्परि।

प्र णस्पुरो मयस्कर न्नभस्पय स्त्रयस्परः।

नकार विकाराः (आन्पदाः पदवृत्तयो नाम सन्धयः – नकारस्य लोपः)

4.65 नकार आकारोपधः पद्यान्तोऽपि स्वरोदयः। लुप्यते।

4.66 अज्रा ञ्जग्रसाना ञ्जघन्वा न्देवहूतमान्। बद्बधानाँ इन्द्र सोमाँ स्तृषाणा न्नो देव देवान्। हन्त देवाँ इति च।।

4.67 एता आन्पदाः पदवृत्तयः।

विवृत्त्यभिप्राया स्सन्धयः

4.68 विवृत्त्यभिप्रायेषु च पीवो~अन्नाँ रयिवृधः। दधन्वाँ यो जुजुवाँ यस्स्ववाँ यातु दद्वाँ वेति।।

स्पर्शरेफ सन्धयः - नकारस्य रेफः

4.69 हतं योनौ वचोभि र्यान् युवन् यूँ र्वेनिषीष्टेति। ईकारोकारोपहितो रेफमेषु।

4.70 स्वरेषु च।

4.71 दस्यूँ रेको नृँरभि च।

4.72 ते स्पर्श रेफ सन्धयः।

नकारस्य प्रकृतिभावः

4.73 नास्मा नुपैतावान् स्फुरान् गच्छान् देवा नयाड् वहान्।

हिरण्यचक्रान् मायावान् घोषाँ स्तानश्विना विद्वान्।

पयस्वान् पुत्रा नाधेह्या यजीया न्पती नुरोः।।

स्पर्शोष्म सन्धयः – नकारस्य विसर्जनीयवत्त्वम्

4.74 चरति चक्रे चमसाँश्च चो चिच् चरसि च्यौत्न श्चतुर श्चिकित्वान्।
एतेषु सर्वत्र विसर्जनीयव द्दीर्घोपधः।

4.75 अस्माञ्चमसान् पशून्न।

4.76 ताँस्ते सर्वाँस्ता न्देवाँस्त्वं ताँस्त्रायस्वावदँ स्त्वञ्च।

4.77 विसर्जनीयं परेष्विति ते स्पर्शोष्मसन्धयः।

4.78 नृँ꣡ पतिभ्यो नृँ꣡प्रणेत्रं नृँ꣡ पात्रं स्वतवाँ पायुः। सन्धि र्विक्रान्त एवैषः।

4.79 नृँ꣡पाहि श्रृणुधीति च।

नकारस्य लोप रेफोष्मभावे पूर्वस्वरस्यानुनासिकत्वम्

4.80 नकारस्य लोप रेफोष्मभावे पूर्व स्तत्स्थाना दनुनासिकस्स्वरः।

प्रसङ्गादन्यत्रापि अनुनासिकस्वर निर्देशः

4.81 आदिस्वर श्चोत्तरेषां पदेऽपि।

4.82 माँस्पचन्या माँश्चत्वे मँश्चतोश्च।

ईमित्यस्य अन्तलोपः

4.83 ईमित्यन्तलोप एषूदयेषु गर्भं गावो वत्सं मृजन्ति पृच्यते। सखायो विव्याच पुना रिणन्ति रथमित्यन्वक्षर सन्धिरेव सः।

शौद्धाक्षरा स्सन्धयः

4.84 पुरु पृथ्वधि पूर्वेषु शकार उपजायते।

ह्रस्वे च पूर्वपद्यान्ते चन्द्रशब्दे परेऽन्तरा।।

4.85 परीति पद्ये कृपरे षकारः।

4.86 वनेति रेफ स्सदशब्द उत्तरे।

4.87 परिष्कृण्वन्ति वेधसः।

4.88 अस्कृतोषसम्।

4.89 शौद्धाक्षरा स्सन्धय एत उक्ताः।

पदान्ते आकारस्य अकारः

4.90 मेधातिथौ वरुणान्त व्रतान्तौ स्पर्शान्तस्था प्रत्ययौ निर्हसेते।

4.91 आदित्या देवा वरुणासुरेति येत्यादिषु।

4.92 वयमित्यत्र मित्रा।

4.93 या सुप्रतीकं निष्कृतं पुरोहितिः क्षत्रं दाशति शवसा भिषज्यथः।

विसर्जनीय सन्धि विषये निपातनानि

4.94 सो चिन्न्वगस्त्ये दशमे च मण्डले।

4.95 सा न्वीयते।

4.96 सः पलिक्नीः।

4.97 हि षस्तव।

अन्यानि निपातनानि – धकारस्य दकारो, घकारस्य गकारश्च

4.98 जुगुक्षतो दुदुक्षन्गा अदुक्षद् दुक्षन्वृधेऽस्य दुक्षतानु दक्षि।

दक्षन्न पत्म न्दक्षुषोऽभि दक्षत् कृष्णासो दक्षि हियानस्य दक्षोः।।

नति पटलम्

नतिसन्धे रधिकार सूत्रम्

5.1 अन्तःपादं नाम्युपध स्सकार ष्षकार मप्यूष्म परै र्यथोक्तम्। अन्यै रेकारात्।

नति व्यापत्त्योः पौर्वापर्यम्

5.2 नतिरत्र पूर्वा ततो व्यापत्ति र्भवतीति विद्यात्।

नति सन्धिः – सकारस्य षकारः

5.3 सूती नकि स्स्वैर्व्युरु नह्यभि त्री नि हीति सः।

5.4 द्व्यक्षरेणैव सत्स्थः।

5.5 स्वबह्वक्षरेण।

5.6 पदादयश्च स्यिति स्किति स्निति।

5.7 अरेफस्य च स्मिति।

5.8 एकारेणापि स्विति नःपरश्चेत्।

5.9 दीर्घो न स्यिति।

5.10 उ च नास्पर्शपूर्वम्।

नति सन्धिः – षकारपूर्वस्य तवर्गस्य टवर्गः

5.11 तकारवर्गस्तु टकारवर्ग मन्तःपदस्थोऽपि षकारपूर्वः।

नति सन्धिः – नकारस्य णकारः – पूर्वानुवृत्तः

5.12 सितां सधस्थात् स्तनिहि स्तवाम स्तवे स्तुवन्ति स्तुहि सीं स्तुत स्थ। साहि स्त स्तुप् सत्सि सत्सत् स्वनीति स्तोभेत्यादिश्चापि बह्वक्षरान्त्यैः।।

5.13 नि परीति स्व सीत्यादी चकारवर्गीयोदयौ।

5.14 दकारे चोत्तरे परान्से स सीति स्वरोदये।

5.15 सेध स्वापय सस्वजे सस्वजाते ससाद् च।

5.16 सन्तं सन्त स्सन्ति पूर्वी स्स्थु स्स्था स्स्थादिति चोत्तरः।

5.17 हि षिञ्च तू षिञ्च रजस्सु षीद न्नितो षिञ्चताभि षतः किमुष्वित्। सूरिभि ष्ष्याम दिविषन्तु के ष्ठ प्रतिष्फुर त्रीषधस्था कमुष्वित्।

5.18 उ षुवाणो दिवि षन्सूरिभिष्ष्या मृच्छन्ति ष्म नू ष्ठिरं वंसु षीदति। नु ष प्र हि ष्ठो यशसा मही षा वि षा भूयामो षु यति ष्ठनेति च।

5.19 वाजी स्तुतो वहन्ति सीं पति स्स्यां दित्ससि स्तुतः। अपो सु म्यक्ष श्रुधि सु त्रि स्स्म स्तुहि स्तुहीति न।

5.20 युग्मान्तस्था दन्तमूलीयपूर्वै रन्तःपदं नम्यतेऽन्तः पदस्थैः।

5.21 अन्यपूर्वैरपि पद्यादिभाक् सन्।

5.22 एकार रेफ पृतनोपधश्च।

5.23 रेफर्कारर्कार परः प्रकृत्या।

5.24 संस्पृक् स्वृ सर्स्वैरिति चाक्षराणाम्।

5.25 सेति चास्य परिपन्नोपधा चेत्।

5.26 संयोगस्य चाप्यनुनासिकाऽऽदेः।

5.27 सहस्त्रं सनिता स्थात्रां सावित्रं सूवरी स्नुषे।

समुद्रं सदृशा सारे सायक स्साधनी सह।

सनित स्पष्ट स्सदृश स्सखायं सप्तै रेते सानुशब्दश्च पद्याः।

5.28 सुते सोमे वक्षणेऽप्रामि चर्षणि स्वभिष्टीत्येवमुपधाश्च सर्वे।

5.29 अभिसत्वा रयिस्थानो यासिसीष्ठा स्सिसक्षि च। तिस्तिरे तिस्तिराणा च सिसिचे सिसिचुश्च न।।

5.30 गोष्ठादिव गोषतमा उपष्टुत् सप्रवादो नार्षदः पर्यषस्वजत्। स्वादुषंसदः पुरुषन्तिशब्द स्सुषंसदं सुषमिधाऽनुसेषिधत्।

5.31 तकारे पूर्वपद्यान्तो व्यापन्नोऽरेफसंहिते। नामि पूर्वः।

5.32 विग्रहे तु त्वा त इत्यनुदात्तयोः।

5.33 अग्नि रेकाक्षरस्याऽऽदौ।

5.34 नकिश्च।

5.35 अथो तनूष्विति।

5.36 तत् ततन्यु स्ततक्षुस्तं तौग्र्य मित्युत्तरेषु निः।

5.37 पायुभिः पर्तृभि स्त्रिभि र्देदि र्वै रस्मयु श्शुचिः। उत्तरे त्वमिति।

5.38 ईयुष्टे वावृधुष्टे सधिष्टव। गोभिष्टरेम क्रतुष्टम्।

5.39 नाहु र्निष्षिध्वरीः प्रभोः। वन्दारु ष्षष्टि रावि स्त्रिर्बाह्वो रित्यनुदात्तयोः।

नति सन्धिः – नकारस्य णकारः

5.40 ऋकाररेफ षकारा नकारं समानपदेऽवगृह्ये नमन्ति। अन्तःपदस्थ मककारपूर्वा अपि सन्ध्याः।

5.41 सन्ध्य ऊष्माप्यनिङ्ग्ये।

5.42 न मध्यमै स्पर्शवर्गैर्व्यवेतम्।

5.43 परिप्र ऋषीन्द्रादिषु चोत्तमेन।

5.44 तथा शकार सकार व्यवेतं सर्वाऽऽदिषु।

5.45 पूर्वपदान्तगश्च।

5.46 नाभिनिर्णिक् प्रवादादी।

5.47 यकार स्पर्शसंहितम्।

5.48 कर्मनिष्ठां दीर्घनीथे।

5.49 भानुशब्दे।

5.50 हिनोमि च।

5.51 ह्रस्वोदयं त्वेषपुर्वैव मादिषु।

5.52 त्रिशुभ्र युष्मादिषु चोभयोदयम्।

5.53 अहकारेष्वधिक त्र्यक्षरेषु च पुरः पुन र्दुश्चतु र्ज्योतिरादिषु।

5.54 उस्त्रयाम्णेऽनुस्त्रयाम्णे सुषाम्णे वृषमण्यवोऽधिषवण्या प्रण्यः।

नति सन्धि विषयक निपातनानि

5.55 दूढ्य दूणाश दूळभ प्रवादा दुर्दू भूतमक्षरं तेषु नन्तृ।

नति सन्धिः – नकारस्य णकारः (पूर्वानुवृत्तः)

5.56 अव्यवेतं विग्रहे विघ्नकृद्धी रेफोष्माणौ सर्वपूर्वौ यथोक्तम्।

5.57 आनीन्नुत्यं नोनुवु र्नो नुमश्च नयत्यर्थञ्च प्र परीति पूर्वौ।

5.58 पुरुप्रिया ब्रह्म सुतेषु नेषि प्लुताकारान्तं सषकार मिन्द्र।

न ते सुस्मेति सवनेषु पर्षि स्वरर्यमा प्रोरु परीति तैर्नः।।

5.59 हेळो मुञ्चतं मित्राय राया पूषा गध्यविष च्छकारवत्।

नव्येभि स्त्मने वाजा न्कृणोत द्वे नय प्रतरं परेषु न।।

5.60 गोरोहेण निर्गमाणीन्द्र एणा इन्द्र एणं स्वर्ण परा णुदस्व। अग्नेरवेण वार्ण शक्र एणम्।

नति संज्ञा

5.61 एषा नति र्दन्त्य मूर्धन्यभावः।

ध्वन्यागम पटलम्

क्रमः – वर्ण द्विर्वचनम्

6.1 स्वरानुस्वरोपहितो द्विरुच्यते संयोगादि स्स क्रमोऽविक्रमे सन्।

6.2 सोष्मा तु पूर्व्येण सहोच्यते सकृत् स्वेन।

6.3 असंयोगाऽऽदि रपि च्छकारः।

6.4 परं रेफात्।

6.5 स्पर्श एवं लकारात्।

6.6 ऊष्मणो वा।

6.7 नावसितम्।

6.8 न रेफः।

6.9 वोष्मा संयुक्तोऽनुपधः।

6.10 न तूष्मा स्वरोष्मपरः।

6.11 न परक्रमोपधा।

6.12 सहातिहाय पवमान यस्य द्वे तने चेत्युपहितः पदाऽऽदिः।

छकारः।

6.13 दीर्घेण च मेतिवर्जम्।

6.14 संयुक्तं तु व्यञ्जनं शाकलेन।

6.15 पदान्तीयो ह्रस्वपूर्वो ङकारो नकारश्च क्रामत उत्तरे स्वरे।

नियमानां सर्वत्र सङ्गतिः

6.16 अनादेशे पटलेऽस्मिन् विधानं सर्वत्र विद्यादपि वैकृतानाम्।

अभिनिधानम्

6.17 अभिनिधानं कृतसंहितानां स्पर्शान्तस्थाना मपवाद्य रेफम्।

सन्धारणं संवरणं श्रुतेश्च स्पर्शोदयानाम्।

6.18 अपि चावसाने।

6.19 अन्तस्था स्स्वे स्वे च परेऽपि रक्ताः।

6.20 लकार ऊष्मस्वपि शाकलेन।

6.21 खकारे चैवमुदये ककारः ख्याते र्धातोः।

6.22 रप्शातेर्वा पकारः।

6.23 पदान्तीया यरवोष्मोदयाश्च स्पर्शाः पदादिष्ववरे मकारात्।

6.24 असंयुक्तं शाकलम्।

6.25 तन्न पद्ये स्वित्युत्तरे।

6.26 वात्वनेकाक्षरान्त्याः।

6.27 सर्वत्रैके करणस्थानभेदे वा शाकलम्।

6.28 प्रथमे स्पर्शवर्गे।

यमः

6.29 स्पर्शा यमा ननुनासिका स्स्वान् परेषु स्पर्शे ष्वनुनासिकेषु।

6.30 न स्पर्शस्योष्मप्रकृतेः प्रतीया द्यमापत्तिम्।

6.31 नाभिनिधानभावम्।

6.32 यमः प्रकृत्यैव सदृक्।

6.33 श्रुतिर्वा यमेन मुख्याऽस्ति समानकाला।

6.34 अनन्यस्तु प्रकृतेः प्रत्ययार्थे।

6.35 न संयोगं स्वरभक्ति र्विहन्ति।

6.36 यमा न्नासिक्या स्वरभक्ति रुत्तरा गार्ग्यस्य।

6.37 ऊष्मा सोष्मणः।

6.38 वर्जयेत्तम्।

ध्रुवसंज्ञो नादः

6.39 नादः परोऽभिनिधानाद् ध्रुवं तत्त त्कालस्थानम्।

6.40 अश्रुति त्वघोषात्।

6.41 नासिकास्थान मनुनासिकाच्चेत्।

6.42 अन्तस्थायाः पूर्वस्वरूपमेव।

अभिनिधान लोपे मतद्वयम्

6.43 व्याळे स्सर्वत्राभिनिधानलोपः।

6.44 परक्रम स्वर रेफोपधे न।

6.45 सवर्णपूर्वस्य सहध्रुवस्य विपर्ययो ध्रुवशिष्टेऽपरेषाम्।

स्वरभक्तिः

6.46 रेफात् स्वरोपहिताद् व्यञ्जनोदया दृकारवर्णा स्वरभक्ति रुत्तरा।

6.47 विच्छेदात् स्पर्शोष्मपराच्च घोषिणः।

6.48 द्राघीयसी तूष्मपरा।

6.49 इतरा क्रमे।

6.50 सर्वत्रैके स्वरभक्ते रभावम्।

6.51 रेफोपधा मपरे विद्यमानाम्।

6.52 अक्रान्तोष्म प्रत्ययाभावमेके।

6.53 पूर्वोत्तर स्वर सरूपताञ्च।

प्रथमस्पर्शस्य द्वितीयस्पर्शभावः

6.54 ऊष्मोदयं प्रथमं स्पर्शमेके द्वितीयमाहु रपदान्तभाजम्।

क्शा स्थाने ख्याऽऽदेशः

6.55 क्शातौ खकार यकारा उ एके।

6.56 तावेव ख्याति सदृशेषु नामसु।

प्लुति पटलम्

7.1 दीर्घ ह्रस्वो व्यञ्जनेऽन्य स्त्वृकारात् यथाऽऽदिष्टं सामवश स्स सन्धिः।

प्लुति संज्ञा

7.2 सैव प्लुतिः।

7.3 या स्वरेषूपदिष्टा।

7.4 योनि मारैगादिषु चोदयादेः।

पदान्ते मक्षौ च ह्रस्वस्य दीर्घभावः

7.5 मक्ष्वित्युकारः प्लवते सर्वत्राप्यपदान्तभाक्।

7.6 सुता याहीत्यतोऽन्येषु पदेष्वच्छेति विग्रहे।

7.7 अनाकारोपध श्चान्त्यो येत्युत्तरपदस्य यः। उदात्तादे र्द्व्यक्षरस्य।

7.8 नास्येति व्यञ्जनोपधः।

7.9 नियूय पिष्टतमयाऽभिपद्य प्रास्य सङ्गत्यानुदृश्याभिवृत्य। आरभ्य संमील्य मक्षुंगमाभिरभिह्रुग्य यत्र निषद्य वीति च।।

7.10 नहि जह्यभि वीर्येण कृधीति कृणुथेति च। एतान्येकाक्षरे पदे क्षैप्रीभाव्ये।

7.11 पराणि च।

7.12 युक्ष्व मन्दस्व विद्मेति हीति।

7.13 विद्धि पिबत्विति।

7.14 जुहोत यज धासथ शिशीत भरेति स्विति।

7.15 सु नु हीत्येतेषु परेष्वधेति।

7.16 तृम्पर्तेन मुञ्चताद्येति वीति।

7.17 सु न्वित्यनर्य परयो रुकारः पदम्।

7.18 तयो रुत्तरे योज घेति।

7.19 मृळयद्ध्यां वसुवित्तमं यत्सोमं जातवेदसम्। भरतेत्येतेषु।

अपादान्ते पदान्तह्रस्वस्य दीर्घभावः

7.20 अपादान्तः।

7.21 अद्येतिकरणादिषु।

7.22 करणञ्च चित्करते वृणीमहे। भवतं कृणोतु भवत स्वस्तये।

7.23 पुविति चित् पुरुहूतो नृषूत स्सहस्राणि पुरुभुजा धियायते।

7.24 वहेति त्वं दुहित दैव्यमुत्तरम्।

7.25 द्युम्नं रुद्रं नव्यमेतेषु वर्धय।

7.26 चिन्महित्वं गी गृणान स्सते परं न्वित्यन्त्ये चेन्मर्तशब्दाद्रिवः परे।

7.27 तूतुजानो मतिभि र्भोजनानि नो दद्धि स्तोमं भूरि योनिं त्वमेषु। भरेत्येतत्।

7.28 न नु चिद्यः।

7.29 भवेति स्तोतृभ्यो द्युम्नी शत मे परेषु।

7.30 शोचा यविष्ठ्यैवा यथा कर्ता यत्सादया सप्त।

अर्चा मरुद्ध्य स्तिष्ठा न स्सना स्वः पारया नव्यः।

7.31 वोधा स्तोत्रे चकृमा ब्रह्मवाह श्शंसा गोषूच्छा दुहित र्वदा तना।

अजा नष्टं जम्भया ता अधा महो गन्ता मा युक्ष्वा हि सृजा वनस्पते।।

7.32 अग्ने रक्षाण स्तिष्ठा हिरण्ययं सोता वरेण्यं शोचा मरुद्वृधः। शिक्षा स्तोतृभ्यो भूमा त्रिवन्धुर पिबा मधूनां सोता परीति च।।

पादादौ पदान्त ह्रस्वस्य दीर्घभावः

7.33 सक्ष्व मिमिक्ष्व दधिष्व वसिष्व श्रोत सुनोत हिनोत पुनात।

विघ्न जगृम्भ ररम्भ ववन्म क्षाम सुपप्तनि मन्थत मत्स्व।।

सर रद् रण जिन्व धारयार्षं क्षर यज यच्छ दशस्य साध सेध।

तप रुज मृळ वर्ध यावयात्र श्रवय नमस्य विदाष्ट कृष्व जोष।

श्रृणुधि श्रृणुत यन्त यच्छत स्तव सिम गूहत कुत्र मोषथ।

दिधृत पचत वृश्च विध्यताथ मदथात्त यदीत पाथन।

उपागत्याख्खलीकृत्य वव्राजाविष्ट नोरुष्य।

इष्कर्तौळिष्व मर्मृज्म बिभयेयर्त तच्छतम्।

सार्ध मद्यादिभिः प्लुतैः पादादौ व्यञ्जनोदयम्।

न्वेववर्जं न संयोगे शेषे चापठिते सति।।

7.34 वर्ध शुभ्रे रुजय स्सेध राजन् वह हव्यानि यदि मेऽध यामनि।

विघ्न दातार मध धारयाध यदध ते विश्वं पुरु वाऽर्चं गाय।

वह वायो पिब मध्वः पुरु विद्वान् पुरु विश्वान्यध वायुं पुरुशस्त।

यदि मृत्योरध जिह्वा पुरुविश्वा पिब शुद्धं पिब राये वह कुत्सम्।

भरद्वाजेऽर्चे देवाय यदि वा पुरु दाशुषे।

वह शुष्णायाध बह्वध यत्पुरु हीति न।

7.35 कृधीति परेषु सहस्रसां धियं जरित्रे न इति।

7.36 तत्रेति चान्त्ये।

7.37 सहस्येन सुश्रवसं पवस्व द्वे नो~अधीत्येषु परेषु तेन।

7.38 देवं वेनं केत मित्युत्तरेषु दधातेति।

7.39 श्रुधि वंस्वेति नः परे।

7.40 वेदेति विश्वस्य भूमं म उत्तरम्।

7.41 शुनश्शेपे च प्लवते यकारे।

7.42 ब्रह्मेति नो द्वे च गिरः कृणोति ते कृणोत तूतोदिति चोत्तरेषु।

7.43 अभीति नो नु नवन्ते सतो नरं द्वा सत्स्विति।

7.44 आग्नेऽर्षपरे तु मुख्ये।

7.45 चक्रु र्वेदेते दशस्यन् समुद्रो रथेन न स्सप्त ऋषी न्मदन्ति।

ते वोभयन्ते नियुद्भिः कृपीटं रथस्य सोमस्य मती रणन्ति।।

7.46 समुद्रं द्वे स्वर्ण नवग्व शब्दो दशग्वं दंसिष्ठ वसूनि नो वसु।

वृत्रं निर्द्वं नु यतिभ्य स्सहन्तः पृथिव्यां निर्हंसि समत्सु पावक।।

7.47 यत्रेति चक्रु रादिषु नर स्सुपर्णा इति च।

7.48 समुद्रादिषु येनेति।

7.49 तत्रेति मे सदो रथम्।

7.50 अवेति नो नु कल्पेषु नूनं वाजेषु पृत्सुषु।

7.51 आद्ये चेद्वाजयुं पार्ये कमग्ने मघवन् परे।

7.52 रास्वा पित श्शतेना नो वधस्वा सु श्रुधी हवम्।

मन्दस्वा सु वहस्वा सु वनेमा ते नही नु वः।

7.53 पाथा दिवो धाता रयिं सृजता गयसाधनम्।

रास्वा चोरू न शग्धी न स्सृजता मधुमत्तमम्।

7.54 जही चिकित्वो वेत्था हि रक्षथा न हता मखम्।

युयोता शरुं स्वेना हि वनेमा ररिमा वयम्।

7.55 प्रपा वो अस्मे धामा ह सना ज्योतिरपा वृधि।

ऋध्यामा ते वामदेवे जुहोता मधुमत्तमम्।।

7.56 यक्ष्वा महे धिष्वा शवो जनिष्वा देववीतये।

अधा त्वं ह्यद्याद्या श्वश्श्व स्सचस्वा न स्स्वस्तये।।

प्लुति पटलम् (2)

अन्तःपादं पदान्तह्रस्वस्य दीर्घभावः

8.1 अन्तःपादं विग्रह एष्वपृक्त उकारो व्रजस्य सु धा नमोभिः।

शुचिं पवित्रन्तु महीर्नु चाप्लुतं सुतस्येति।

8.2 यद्युदयोदया न। सोमसुतिं चर्किराम स्तवाम स्तवाना गृभाय रथं श्रुधीति।

8.3 ते~अस्ति ते महिमनः प्रवोचत प्र वोचं न स्सुमना द्वैपदाश्च।

8.4 महे दधिध्वं तिर मुञ्च नो मृध श्वर नमध्वं नमते नयन्त। स्वित्येतेषु।

8.5 एकाक्षरयोः पराणि चेदुपेन्द्राग्नेऽत्राध्वर मायु रेत्विति।।

8.6 सदेत्येत द्योनिषु पीतये परम्।

8.7 धन्वेत्येतत् सोमराट् पूयमानः।

8.8 यदीति कृथो मनसः कवीनां सबन्धवो गो स्सरमेति तेषु।

8.9 चरेति पुष्टिं सोम चर्षणिप्राः।

8.10 जनिमेति हन्ति सं जातवेदाः।

8.11 रन्धयेति येषु कं शास दुत्तरम्।

8.12 न नःकारे स्वित्युपसातये परे।

8.13 महयात्र जय काव्येन गूर्धय भरेति स्वरिति प्रत्यये षट्।

8.14 मद पर्ष पिपृत धन्व यच्छत रुहेमेति स्वस्तय उत्तराणि।

8.15 दधिम मदत तन्वि सिञ्चत स्तव वदतानज रक्षतोक्षत। पिपृत पृणत पृच्छत प्रुष स्थ घ हिनवाय जुहोत पश्यत।

चकृमा कुत्र भूमस्म शिशीत स्तोत पप्तत।

यथोदयानि सर्वाणि।

8.16 त्विति चैकाक्षरोपधम्।

8.17 कदा हरिवो वरुणस्य चक्रतु स्सूर्य्यस्य निष्ठ्या इव भूम तेषु न।

8.18 वस्त्राणि हि बाबधे यज्ञियानां ते दंसो द्वे नस्सच शक्र तेषु तु।

8.19 चकृमेति द्वैपदे भूरि दुष्कृतं वर्धतां विप्रवचसो जिह्वयेति।

8.20 काण्वायना निष्कृती रेतयोस्स्थ।

8.21 जाता स्सुरथा हवनश्रुतश्च।

8.22 सवापरं घेति न कौत्स वैमदम्।

8.23 स्म राशि मित्यादिषु न।

8.24 प्रतिष्म च।

8.25 स्म ते परेषु व्रजनं वनस्पते शुभे परुष्ण्याम्।

8.26 स्म पुरा वृषाकपौ।

8.27 राशिं वाजेषु मे सद्म पूषणं तं तृंहद्धायि मा दुर्हणायतः।

यस्मै यद् वृत्रहत्येषु मावते वातो यं यस्य मद् दुर्गृभीयसे।

8.28 पृच्छा विपश्चित मदा पुरन्ध्या घा त्वद्रिग् वीरान् वनुयामा त्वोताः। जनया दैव्यं भुजेमा तनूभि र्हा वहतो वासया मन्मना च।।

8.29 वेदा वसुधितिं रोमा पृथिव्या वोचा सुतेषु धावता सुहस्त्यः।

मुञ्चा सुषुवुष स्वाद्मा पितूना मिहा वृणीष्व बोधया पुरन्धिम्।।

8.30 अवथा स कृणुथा सुप्रतीकं तिरा शचीभिः कृणुता सुरत्नान्। ग्मन्ता नहुषो ऽनयता वियन्त स्स्मा च्यावयन्नीरया वृष्टिमन्तम्।

8.31 असृजता मातरं सू रथं हुवे नयता बद्धं स्वापया मिथू दृशा। इता जयता गता सर्वतातय ईरयथा मरुतो नेषथा सुगम्।।

8.32 अन्यत्रा चित्पिबता मुञ्जनेजनं घा स्या वोचेमा विदथेष्विति धियम्। इता नि यत्रा वि दशस्यथा क्रिविं चा बोधाति द्रावया त्वं किरा वसु।।

8.33 हा पदेव कर्तना श्रुष्टिं योधया च जग्रभा वाचम्। पायया च तर्पया कामं गातुया च मन्दया गोभिः।।

8.34 घा स्याला देना सुमतिं वोचा नु व्यथया मन्युम्। नेथा च चक्रा जरसं भवता मृळयन्तश्च।

8.35 एवा चन भजा राये ररिमा ते भजा भूरि। श्रुधी न उभयत्रा ते भजा त्वं मृळया नश्च।।

एकादशाक्षर द्वादशाक्षरयोः पादयो रष्टमाक्षरस्य दशमाक्षरस्य च दीर्घभावः

8.36 एकादशि द्वादशिनो र्लघा वष्टम मक्षरम्। उदये संहिता काले।

8.37 नःकारे च गुरावपि।

8.38 दशमं चैतयोरेवम्।

अष्टाक्षरे पादे षष्ठाक्षरस्य दीर्घभावः

8.39 षष्ठं चाष्टाक्षरेऽक्षरम्।

ऊने पादे क्षैप्रवर्ण प्रश्लिष्टादीनां अन्तर्विभागेन पादपूरणम्

8.40 व्यूहै स्सम्पत् समीक्ष्योने क्षैप्रवर्णैकभाविनाम्।

षष्ठाष्टम दशमाक्षराणां दीर्घभावेऽपवादाः

8.41 न वावृधन्त वातस्यावद्यानि जिघांससि।

सासह्याम ववृत्याम दीदिह्यष्टम मूर्णुहि।

8.42 पुरुप्रजातस्याभि नः कृणुहि द्व्यक्षरोपधम्। हर्यश्वोत भवन्त्विन्द्र सदनायास्ति नामचित्।।

8.43 चमसाँ इवाव्रि वसवान द्वादशिन स्सृजास्य विमदस्य।

8.44 अङ्ग सरस्वति पञ्च चरन्ति ग्नाभि रिहेन्वसि रण्यसि धाव।

विद्धि षु णोऽभि षत स्सुविताय त्वा समिधान दधीमहि देव।

8.45 जामिषु जासु चिकेत किरासि स्मस्युप पात्यसि सोम शतस्य।

आयुषि चेतति विष्टपि मास्व प्रोश्मसि मूर्धनि सद्म वरन्त।

8.46 प्रदिवि वरुण तमसि तिरसि घृतमिव दिवि मम हि नु विशः।

उषसि पृथिवि रजसि वहसि हनति पितरि वि विहि नि मधु।।

8.47 सहस्राणि श्रोमतेनासनाम च्छाया मिवेषण्यसि सस्तु पाहि।
गोपीथ्याय पवमानो वसन्तान् सख्याय वोचेमहि मानुषस्य।

पादान्ते ह्रस्वस्य दीर्घभावः

8.48 आव्य भूमेति पादान्तौ व्यञ्जनेषु।

8.49 श्रुधी हवम्।

8.50 सद्मा होता स्मा सनेमि धर्मा संभूषता रथः।

प्लुति पटलम् - 3

पूर्वपदान्ते ह्रस्वस्य दीर्घभावः

9.1 सर्वत्र पूर्वपदान्ताः प्लवन्ते वसु मघयोः परयोः।

9.2 रवे तुवि।

9.3 विश्व विम्व धन्व रथर्ति शत्रु द्युम्न यज्ञेति सहतौ।

9.4 प्र चाऽऽप्लुते।

9.5 सहप्रवादा उदयास्तमान्ताः।

9.6 पर्यभ्यपापीति वृता वृवर्णे।

9.7 अभीवर्त स्सूयवसो रथीतमः पुरूतमोऽनन्तरर्धर्च उत्तमः।

9.8 कवर्दु धान्य मिथु चर्षणि स्तन पिबेति सर्वत्र यथोदयं च।।

9.9 त्विष्युक्थेत्येता उदये मकारे।

9.10 पर्युर्वक्षेत्यमकारे ऽनुनासिके।

9.11 पित्र्य माहिनाकृषि भङ्गुराश्व विश्वदेव्य भेषज तुग्र्य पस्त्य।

सुम्नर्ता राती त्युदये वकारे।

9.12 वैभ्वादयश्च।

9.13 पृशनादयस्तु यकारे।

9.14 अराति कवि सुक्रतु श्रुधि पितु सुम्न रय्यृताश्वेति चैते।

9.15 न त्वश्व सुम्नर्त वृषेति पद्या एकाक्षरादा उदये यकारे।

9.16 पृशनाजि रर्जु मधु पुत्रि जनि क्रतु वल्गु वन्धुर वृकाङ्क दम।

वृजिनाध्वरीषु वृष मध्य सखि स्तभु दुच्छुनाघ यवि शत्रु वसु।

9.17 वैभु ह्वादुनि पुष्ट पर्वताऽऽहुति शुभ्र हृदयामति सह वृष्ण्य शक्ति।
सप्ति स्वधिति कृशन वयुनर्ण घृणि हित धित विषु सुतर्त्विय नीथ।

9.18 नर्तवाकेनाश्ववित् सुम्नयन्ता वसु वसु प्रसहानोऽभिवावृते।
परिवृतं नाभिवृत्य।

9.19 अश्ववच्च पादान्ते।

9.20 सर्वत्र परे मघस्य।

9.21 अश्वयूपा याश्वयुजोऽश्वयोगा स्सहवाह स्सुम्नय न्तर्तयन्त।

सहवसुं सहवत्सर्तयुक्तिं सहवीरं वयुनव च्चकार।

9.22 सुम्नायु र्जुह्व ऋताय न्नृतायु मुग्रादेवं दक्षिणावा नृतायोः।
वृषारवाय सूमयं शताव न्नपीजुवा परीवृतोऽनपावृत्।।

9.23 इन्द्रावत स्सोमावती मवायती दीर्घाधियोऽमित्रायुधो रथीतरः।

अन्नावृधं विश्वापुषं वसूजुवं विश्वाभुवे यज्ञायते घृतावृधा।

9.24 सुम्नाय न्मित्रायुव ऋषीवो देवावा न्दिवः। एवावदस्य क्षेत्रा सामृताम्ने सदनासदे।

अवग्रह रहितेषु पदेषु पद्येषु चान्तर्ह्रस्वस्य दीर्घभावः

9.25 पदेष्वन्त रनिङ्ग्येषु प्लुतिः पद्येषु चोत्तरा।

9.26 वृषस्व वन्थ वृध्वांसं वाता वातुर्वनो वृतुः।

वृते वृषाणा वृषाणो वृजे वन्धि मृजुर्मृशुः।

मृजे मृजीत वानैषां वमेति सदृशाऽऽदिषु।।

9.27 सहेत्यादिः पूर्वपदोपध स्सन्नेकाक्षर चर्षणि धन्ववर्जम्।

9.28 न तु पादस्याष्टिनोऽन्तं गतस्य।

9.29 न द्वादशिनोऽनभिमातिपूर्वः।

9.30 अभिमाति नृ पृतनोपधस्तु सर्वत्र परे प्लवते यकारे।

9.31 श्रावयादीना मुदया स्त्रिवर्णाः पदैकदेशा इति तान् प्रतीयात्।

9.32 श्रावय यावय च्यावय यामय रामय मामह वावस।

द्रावय दादृह वावृध तातृष सासह रारप।

आद्यक्षरं प्लुतं तेषाम्।

9.33 अनन्वित्यस्य मध्यमम्।

9.34 द्विवर्णः प्रत्ययोऽन्त्यस्य।

9.35 प्रवादा ष्षळितः परे।

9.36 दूणाशः।

9.37 उक्थशासश्च।

9.38 इकारान्तश्च दाधृषिः।

9.39 पादान्तेऽपद्य स्सादनम्।

9.40 अर्धर्चान्ते तु पूरुषः।

9.41 दोषामस्मै राजतोऽक्रन् वनस्पतीन् महीयमानां कति तुभ्यमेभ्यः। उषास मित्युत्तरं सर्वदेश्यम्।

9.42  पादस्य चैकादशिनो यदन्ते।

9.43  यवयु ररमय स्ससाहिषे ववृधन्तो रमया गिरा ररम्भ। यवयसि ततृषाण मोषति श्रवयन्तो दद्दहन्त ते नृषह्ये।

9.44  श्रवयतं वाजसातौ नृषह्ये विभ्वासहं दूणशा रोचनानि।

न ततृषाणो यमयो ररप्शे पुरुषीणां यवय न्त्विन्दवश्च।

9.45  ररक्ष यवय स्तेनं ससाहे यवया वधम्।

परमया द्रवयन्त श्रवयन् ररते च न।

9.46  साह्वांसो व स्सत्रासाहं सादन्यं सत्यं तातान।

नानाम श्रूया श्शुश्रूया रीषन्तं गातूयन्तीव।

9.47  वावर्तयेषां रीषतोऽदकारे सान्त्यभि नृषाह मपूरुषघ्नः। सान्ति गुहा तन्वं रीरिषीष्ट जानि पूर्व्योऽभीवृतेव श्रथाय।।

9.48  साहन् साहा जर्हृषन्त प्रसाहं नक्तोषासा सूर्य मुषास मग्निम्। परिराप स्सूनृते जारयन्ती शुश्रूयातं यूयुवि स्सादना ते।।

9.49  करन्सुषाहा घृतवान्ति साह्वा नृजूयेव सूयवसाद् वृषाय।

उषासानक्ता पृथुजाघने च राथ्येभी रीरिषत ग्लापयन्ति।

9.50 अध्वानयद्री रिषत् प्रावणेभी रथीयन्ती वादमाय स्ससाहे।

सासाह यूयुधि रिवाश्रथायः पूरुषघ्नं रीरिषः पूरुषादः।।

9.51 अपूरुषं जाहृषाणेन रीषत ऋतायुभी रथीनां साहिषीमहि।

पवीतारः कियात्ये पूरुषत्वत ऋतावरीरिव हव्यानि गामय।।

9.52 वृषायस्व प्रसवीता ससाहिषे तातृषाणा तातृपिं सादनस्पृशः।

साह्यामेयान्ति पशुमान्ति जागृधुः पवीतारं सूर्य्यमुषासमीमहे।।

क्रमपटलम्

क्रमपाठस्य अधिकार सूत्रम्

10.1 क्रमः।

क्रमपाठस्य सामान्य नियमः

10.2 पद्यां द्वाभ्या मभिक्रम्य प्रत्यादायोत्तरं तयोः।

उत्तरेणोपसन्दध्यात् तथाऽर्धर्चं समापयेत्।।

क्रमपाठेऽनवसानीय पदानि

10.3 एकवर्णं मनोकारं नते सु स्मेति नः परे।

पदेन च व्यवेतं यत् पदं तच्च व्यवायि च।।

ईं लुप्तान्तं प्लुताऽऽदीनि स्कम्भनेनेति लुप्तवत्।

इतो षिञ्चता वर्तमः पूर्वे द्वैपदयो र्द्वयोः।

स्वसार मस्कृतेत्युभे परं वीरास एतन।

अतीत्यैतान्यवस्यन्ति।

10.4 प्लुतादि प्रभृतीनि च।

क्रमे विकृतरूप विषयक नियमौ

10.5 पूर्वोत्तरकृतं रूपं प्रत्यादानावसानयोः। न ब्रूयात्।

10.6 सर्व मेवान्यद् यथासंहित माचरेत्।।

क्रमपाठे पदविशेषाणां परिग्रहः

10.7 अवगृह्याण्यतिक्रम्य सहेतिकरणानि च।

धक्षि धुक्षि प्रवादौ च विकृताऽऽदी प्लुताऽऽदि च।।

अन्तःपदञ्च येषां स्याद् विकारोऽनन्यकारितः।

एतानि परिगृह्णीयात्।

10.8 बहुमध्यगतानि च।

10.9 अर्धर्चान्त्यञ्च।

10.10 नाकारं प्रागतोऽननुनासिकम्।

10.11 प्रत्यादायैव तं ब्रूया दुत्तरेण पुनस्सह।

उपस्थित संज्ञा

10.12 उपस्थितं सेतिकरणम्।

स्थितसंज्ञा

10.13 केवलं तु पदं स्थितम्।

स्थितोपस्थित संज्ञा

10.14 तत् स्थितोपस्थितं नाम यत्रोभे आह संहिते।

परिग्रहविषये अन्ये नियमाः

10.15 अदृष्टवर्णे प्रथमे चोदकस्स्यात् प्रदर्शकः। एतदिष्टम्।

10.16 समासाँस्तु पुनर्वचन इङ्गयेत्।

10.17 इतिपूर्वेषु सन्धानं पूर्वैस्स्व स्स्यादसंहितम्।

तदवग्रहवद् ब्रूयात्।

क्रमपाठेऽर्धर्चयो स्सन्धि निषेधः।

10.18 सन्धि र्नार्धर्चयो र्भवेत्।

क्रमपाठे समयै स्सह सन्धेः प्रकारः

10.19 दृष्टक्रमत्वात् समयान् सन्दध्यात् सर्वशः क्रमे।

पदेन च पदाभ्याञ्च प्रागवस्ये दतीत्य च।।

परिग्रहे सन्धिविशेषाणां प्रकृतिभावः

10.20 नकारस्योष्मवद् वृत्तं प्लुतोपाऽऽचरिते नतिः।

प्रश्लेषश्च प्रगृह्यस्य प्रकृत्या स्युः परिग्रहे।

10.21 शौद्धाक्षरगमोऽपैति।

10.22 न्यायं यान्त्युत्तरे त्रयः।

रिफिता न्यूष्मणोऽघोषे दूभाव स्स्वधितीव च।

क्रम हेतु पटलम्

क्रमपाठस्य सामान्य स्वरूपम्

11.1 अथाऽऽर्ष्यलोपेन यदाह स क्रम स्समानकालं पदसंहितं द्वयोः।

क्रमपाठे पदविशेषाणा मतिक्रमणे कारणानि, अतिक्रमणे मतभेदाश्च

11.2 अथो बह्वना मविलोपकारणः परैरवस्यन्त्यतिगम्य कानिचित्।

11.3 अपृक्तमेकाक्षर मद्वियोनि यत् तदानुनासिक्य भया दतीयते।

11.4 नतञ्च पूर्वेण परस्य कारणं नतेः परस्योभयहेतु सङ्ग्रहात्।

11.5 परीत इत्युत्तर मेतयो र्द्वयोः परं हि पूर्वं नमतीत्यतीयते।

11.6 ततोऽपरे सन्ध्यमवेक्ष्य कारणं तदर्थजं द्विक्रम मत्र कुर्वते।

11.7 तमःपरं रेफ निमित्त संशयात् तथावरित्येत दपोद्यते पदम्।

11.8 अदो पितो सो चिदु षर्वसूयवो न धक्षि धुक्षीत्यपि चातियन्ति किम्।

11.9 स्वसार मित्येत दपोद्यते पदं पर स्सकारोपजनोऽस्कृतेति च।

निरस्कृतेति ह्युपसर्गकारित स्तदन्वया दाचरितं तु पञ्चभिः।।

11.10 सहेति चेमेति च रक्तसंहितं गुणाऽऽगमादेतन भावि चेतन।

पदञ्च चास्कम्भ चिदित्यतः परं प्लुताऽऽदि चैतानि निमित्त संशयात्।

11.11 व्यभिक्रमं पूर्व निमित्तमानिन स्त्रिषूत्तमेष्वाहु रनन्तरं हि तत्।

11.12 अनन्तरं त्वेव चतुर्थ षष्ठयोः परं कथं तत्र च न व्यभिक्रमम्।।

11.13 अनानुपूर्व्यै पदसन्ध्यदर्शनात् पदव्यवेतञ्च पदं व्यवायि च।

11.14 ततोऽपरे द्विक्रम माहु राश्रयात् कृताविलुप्ताऽत्र हि वर्णसंहिता।।

11.15 पदानुपूर्व्येण सपूर्व आ तत स्ततो व्यवेतञ्च सह व्यवायि च।

11.16 ततो निराहेतरयोश्च ते पदे ततोऽव्यवेतेन परस्य संहिता।

11.17 अनन्तरे त्रिक्रमकारणे यदि त्रिभिश्च गार्ग्यः पुनरेव च त्रिभिः।

11.18 त्रिसङ्गमे पञ्चभिरार्ष्यनुग्रहः।

11.19 चतुःक्रमस्त्वाचरितोऽत्र शाकलैः।

11.20 अलोपभावादपरे बहुक्रमं प्रतिस्वमार्षीति न कुर्वते क्वचित्।

11.21 असर्वशस्त्रि प्रभृतिष्वनेकश स्स्मरन्ति संख्यानियमेन शाकलम्।

11.22 अयावने पूर्व विधान माचरेत्।

क्रमपाठे विकृतरूप विषयक नियमः

11.23 यथापदं सन्धिमपेत हेतुषु।

क्रमपाठे समयै स्सह सन्धेः प्रकारः

11.24 अथो पदाभ्यां समयं पदेन च क्रमेष्ववस्येदतिगम्य सन्दधत्।

क्रमपाठे पदविशेषाणां परिग्रहः

11.25 सहेतिकाराणि समासमन्तभाग् बहुक्रमे मध्यगतानि यानि च।

तृतीयतां गच्छति यस्य चोष्मवा - ननन्ययोगं विकृतं प्लुताऽऽदि च।
अतीत्य तेषां पदतां प्रदर्शयेत्।

11.26 कृते तु गार्ग्यस्य पुन स्त्र्यभिक्रमे।

11.27 अदृष्टवर्णे प्रथमे प्रदर्शनं स्मरन्ति तत्त्वत्र निराह चोदकः।

स्थित संज्ञा

11.28 पदं यदा केवल माह सा स्थितिः।

उपस्थित संज्ञा

11.29 यदेतिकारान्त मुपस्थितं तदा।

स्थितोपस्थित संज्ञा

11.30 अथो विपर्यस्य समस्य चाऽऽह ते यदा स्थितोपस्थित माचरन्त्युत।

परिग्रह विषयेऽन्ये नियमाः

11.31 पुनर्ब्रुवं स्तत्र समास मिङ्गयेत्।

11.32 स्वरित्यतो ऽन्येषु च सन्धि माचरेत्।

अवग्रहस्येव हि कालधारणा परिग्रहेऽस्ती त्युपधेत्यनुस्मृता।।

11.33 अभिक्रमेतोभयतोऽनुसंहितं ततोऽस्य पश्चा त्पदतां प्रदर्शयेत्।

यथापदं वाऽन्यतरेण सन्दधत् त्रिषूत्तमेष्वेत दलोपसम्भवात्।

परिग्रह विषयेऽपवादः

11.34 अरक्त सन्ध्येत्यपवाद्यते पदं पुनस्तदुक्त्वाऽध्यवसाय पूर्ववत्।

यदृच्छोपनते बहुक्रमे कश्चि द्विशेषः

11.35 तथा यदृच्छोपनते बहुक्रमे क्रमेत तस्यैकपदानि निस्सृजन्।

परिग्रहे सन्धिविशेषाणां प्रकृतिभावः

11.36 नकार लोपोष्म रभाव मानये दपेतरागां प्रकृति परिग्रहे।

11.37 नतिम्।

11.38 प्लुतोपाऽऽचरिते च।

11.39 यत्र च प्रगृह्य मेकीभवति स्वरोदयम्।

11.40 प्रवादिनो दूणाश दूढ्य दूळभान्।

11.41 परेष्वघोषेषु च रेफ मूष्मणः।

11.42 महाप्रदेशं स्वधितीव चाऽऽनयेत्।

11.43 नुदेच्च शौद्धाक्षर सन्ध्य मागमम्।

क्रमपाठ विकृतरूप विषयक नियमः

11.44 अभिक्रमे पूर्वविधान माचरेत् पुनर्ब्रुवं स्तूत्तर कारितं क्रमे।

विकार मन्य द्यदतोऽनुसंहितं तदाचरे दन्तगता द्ययोस्तु न।

परिग्रहे सन्धिविशेषाणां प्रकृतिभावः - पूर्वानुवृत्तः

11.45 सकृद्यथासंहितमेषु वाऽऽचरेत् पुन र्विवक्षं पद मप्यसन्दधत्।

परिग्रहे सन्धिषु कारणान्वयात्।

11.46 अविक्रमं व्यूष्मसु चोष्मसन्धिषु।

बहुक्रम मन्तरेण आर्षीलोपाऽऽपत्ते स्स्थलानि

11.47 समानकाला-वसमानकारणा- वनन्तरौ वा यदि सन्निगच्छतः।

पदस्य दोषावथ हेत्वसङ्ग्रहे नियुक्त मार्ष्यन्यतरेण लुप्यते।।

11.48 मकारलोपे विकृतस्वरोपधे तृतीयभावे प्रथमस्य च ध्रुवम्।

11.49 विपर्य्ययो वेतरथाऽभ्युपेयुषाम्।

11.50 अथोभयेषा मनुनासिकोदये।

11.51 अथो नतेनोपहितेऽनुनासिके।

11.52 तथाऽक्षरस्य क्रम एकपातिनः।

11.53 न चात्र पूर्वस्वरितेन संहितां लभेत तस्मिन् नियतस्वरोदये।

11.54 यदा च गच्छ त्यनुदात्त मक्षरं वशं पदाऽऽदे रुदयस्य तेन च।

11.55 उदात्तपूर्वे नियतस्वरोदये परो विलोपोऽनियतो यदाऽवरः।

11.56 स्वरैकदेशं स्वरितस्य चोत्तरं यदा निहन्या दनिमित्त मक्षरम्।

11.57 उदात्तपूर्वोऽप्यनुदात्त सङ्गमो यदा स्वरौ द्वौ लभतेऽपि वा बहून्।

आर्षीलोप विषये मतभेदः

11.58 यथा प्रक्लृप्ते स्वरवर्णसंहिते तयोस्तयो रक्षर वर्णयो स्तथा।

अदर्शनेनाऽऽर्ष्यविलोप उच्यते क्रमेष्वनार्षं ब्रुवतेऽपरे स्वरम्।

11.59 अदृष्ट मार्ष्यां यदि दृश्यते क्रमे विलोपमेवं ब्रुवते परे तथा।

सकारणान्यार्ष्य विलोपविक्रमः क्रमेण युक्तोऽपि बहूनि सन्दधत्।

परिग्रहस्योपयोगः

11.60 पदं पदान्तश्च यदा न गच्छति स्वरावसानं स तु योऽत्र युज्यते।

तदा न रूपं लभते निराकृतं न चेन्निराहोपनिवृत्य तत्पदम्।

11.61 स्थितिस्थितोपस्थितयोश्च दृश्यते पदं यथावद् व्ययव च्युपस्थिते।

क्वचित्स्थितौ चैवमतोऽधि शाकलाः क्रमे स्थितोपस्थित माचरन्त्युत।

11.62 क्रमेत सर्वाणि पदानि निर्ब्रुव न्निति स्मरन्ति।

शास्त्र विहित क्रमपाठस्य प्रशंसा

11.63 आचरितं तु नोत्क्रमेत्। क्रमस्य वर्त्म स्मृति सम्भवौ ब्रुवन्न्।

समाधिमस्यान्वितराणि कीर्तयेत्।

11.64 यथोपदिष्टं क्रमशास्त्र मादितः पुनः पृथक्त्वै र्विविधैर्न साधुवत्।

11.65 इति प्र बाभ्रव्य उवाच च क्रमं क्रमप्रवक्ता प्रथमं शशंस च।

आक्षेप निरसन पूर्वकं क्रमपाठस्यार्थवत्त्व निरूपणम्

11.66 क्रमेण नाथः पदसंहिताविदः पुरा प्रसिद्धाऽऽश्रय पूर्वसिद्धिभिः।

अकृत्स्नसिद्धश्च न चान्यसाधको न चोदयापायकरो न च श्रुतः।

11.67 असिध्यत स्सिद्धिविपर्य्ययो यदि प्रसिध्यतोऽसिद्धिविपर्य्यय स्तथा।

11.68 सहापवादेषु च सत्सु न क्रमः प्रदेशशास्त्रेषु भवत्यनर्थकः।

11.69 विपर्य्यया च्छास्त्र समाधिदर्शनात् पुराप्रसिद्धे रुभयोरनाश्रयात्।

समभ्युपेयाद् बहुभिश्च साधुभि श्श्रुतेश्च सन्मानकरः क्रमोऽर्थवान्।

11.70 ऋतेन च द्वैपदसंहितास्वरौ प्रसिध्यतः पारण कर्म चोत्तमम्।

क्रमात्।

11.71 अतोऽप्यृग् यजुषाञ्च बृंहणं पदै स्स्वरैश्चाध्ययनं तथा त्रिभिः।

## सीमा पटलम्

अपदान्तीय वर्णाः

12.1 ऊष्मान्तस्थ सोॅष्मचकारवर्गा नान्तं यान्त्यन्यत्र विसर्जनीयात्।।

पदादौ गन्तु मनर्हा वर्णाः

12.2 ऋृकारल्कारौ परमर्ध मूष्मणां नाऽऽदिं तकारा दवरे च सप्त।

अन्योऽन्यं संयोक्तु मनर्हा वर्णाः

12.3 नान्योऽन्येन मध्यमा स्स्पर्शवर्गा स्संयुज्यन्ते।

12.4 न लकारेण रेफः।

12.5 स्पर्शै र्वकारो न परै रनुत्तमैः।

12.6 तथा तेषां घोषिण स्सर्वथोष्मभिः।

12.7 नान्त्यान्तस्था न प्रथमोष्मभिः परैः।

12.8 न रेफो रेफेण।

12.9 न सोष्मणोष्मवान्।

12.10 न स्पर्शैरूष्मा प्रथमः परस्सन्।

12.11 नानुत्तमै स्स च सोष्मा च पूर्वौ।

12.12 नानुत्तमा घोषिणोऽघोषिभि स्सह स्पर्शै स्स्पर्शाः।

12.13 नोत्तमा ऊष्मभिः परैः।

12.14 लकार स्स्पर्शैर्न यकार उत्तरैः।

12.15 ऊष्माणोऽन्योऽन्येन च न।

ऋचां पदमध्ये एवोक्त विधानस्य चरितार्थत्वम्

12.16 ऋक्पदेष्विदम्।

नामाख्यातोपसर्ग निपातानां चतुर्णां पदजातानां निरूपणम्।

12.17 नामाऽऽख्यातमुपसर्गो निपात श्चत्वार्याहुः पदजातानि शाब्दाः।

12.18 तन्नाम येनाभिदधाति सत्त्वम्।

12.19 तदाख्यातं येन भावं स धातु।

12.20 प्राभ्या परा निर्दुरनु व्युपाप सं- परि प्रति न्यत्यधि सूदवापि।

उपसर्गा विंशति रर्थवाचका स्सहेतराभ्याम्।

12.21 इतरे निपाताः।

12.22 विंशते रुपसर्गाणा मुच्चा एकाक्षरा नव।

12.23 आद्युदात्ता दशैतेषाम्।

12.24 अन्तोदात्त स्त्वभीत्ययम्।

12.25 क्रियावाचक माख्यात मुपसर्गो विशेषकृत्।

सत्त्वाभिधायकं नाम निपातः पादपूरणः।

12.26 निपाताना मर्थवशा न्निपातना दनर्थकाना मितरे च सार्थकाः।

नेयन्त इत्यस्ति संख्येह वाङ्मये मिताक्षरे चाप्यमिताक्षरे च ये।

शिक्षा पटलम्

वर्ण निष्पत्तौ बाह्यः प्रयत्नः

13.1 वायुः प्राणः कोष्ठ्य मनुप्रदानं कण्ठस्य खे विवृते संवृते वा।

आपद्यते श्वासतां नादतां वा वक्रीहायाम्।

13.2 उभयं वाऽन्तरोभौ।

13.3 ता वर्णानां प्रकृतयो भवन्ति।

13.4 श्वासोऽघोषाणाम्।

13.5 इतरेषान्तु नादः।

13.6 सोष्मोष्मणां घोषिणां श्वासनादौ।

13.7 तेषां स्थानं प्रति नादात् तदुक्तम्।

वर्णनिष्पत्तौ आभ्यन्तरः प्रयत्नः

13.8 तद्विशेषः करणम्।

13.9 स्पृष्ट मस्थितम्।

13.10 दुस्पृष्टन्तु प्राग्घकारा च्चतुर्णाम्।

13.11 स्वरानुस्वारोष्मणा मस्पृष्टं स्थितम्।

13.12 नैके कण्ठ्यस्य स्थित माहु रूष्मणः।

वर्णनिष्पत्तौ सामान्य वर्णनम्

13.13 प्रयोक्तु रीहा गुण सन्निपाते वर्णीभवन् गुणविशेषयोगात्।

एक श्श्रुतीः कर्मणाऽप्नोति बह्वीः।

वर्णा श्शाश्वतिका इति मतन्यासः

13.14 एके वर्णा न्छाश्वतिकान् न कार्यान्।

सघोषाणा मनुनासिकानां सोष्मणाञ्च उत्पत्तिविषये मतभेदः

13.15 आहु र्घोषं घोषवता मकार मेकेऽनुस्वार मनुनासिकानाम्।

13.16 सोष्मताञ्च सोष्मणा मूष्मणाऽऽहु स्सस्थानेन।

13.17 घोषिणां घोषिणैव।

13.18 अत्रोत्पन्नावपर ऊष्मघोषौ।

13.19 शीघ्रतरं सोष्मसु प्राणमेके।

अनुनासिक वर्णाना मुच्चारण प्रकारः

13.20 रक्तो वचनो मुखनासिकाभ्याम्।

वर्णगुणोपसंहारः

13.21 एत द्वर्णात्म गुण शास्त्रमाहुः।

ऋक्षु पदमध्ये दीर्घपूर्वस्य अनुस्वारस्य ह्रस्वपूर्वस्य अनुस्वारस्य च उच्चारण व्यवस्था

13.22 नपुंसकं यदूष्मान्तं तस्य बह्वभिधानजः।

अनुस्वारो दीर्घपूर्व सिष्यन्तेषु पदेषु सः।

13.23 स सा सौ सं पदान्तेभ्यः पूर्वोऽनाम्न्युपधा स्तथा।

यकारो वा वकारो वा पुरस्ताच्चे दसन्धिजः।

13.24 जिघांसन् पांसुरे मांसं पुमांसं पौंस्य मित्यपि। पदेष्वेवं प्रवादेषु।

13.25 नामकार उपोत्तमे।

13.26 प्रश्लिष्टा दभिनिहितात्।

13.27 माँश्चत्वेऽयांस मित्यपि।

13.28 एतावा नृक्ष्वनुस्वारो दीर्घात्।

13.29 इतरथेतरः।

समापाद्य स्वरूपम्।

13.30 समापाद्या न्युत्तरे षट् पकारे राधो रथो ग्ना दिवो जा ऋतश्च।

अञ्जः पा दुःप्रेति च पूर्वपद्या- वनिङ्गयन् विक्रममेषु कुर्यात्।

13.31 समापाद्यं नाम वदन्ति षत्वं तथा णत्वं सामवशांश्च सन्धीन्।

उपाऽऽचारं लक्षणतश्च सिद्ध माचार्या व्यालि शाकल्य गार्ग्याः।।

सोपधानुस्वारस्योच्चारण काल विषये मतन्यासः

13.32 ह्रस्वा मर्ध स्वरभक्त्यासमाप्ता मनुस्वारस्योपधा माहुरेके।

अनुस्वारं तावतैवाधिकञ्च ह्रस्वोपधम्।

13.33 दीर्घपूर्वं तदूनम्।

ऋकार - ॠकार - ऌकार स्वरूपम्

13.34 रेफोऽस्त्यृकारे च परस्य चार्धे पूर्वे ह्रसीयांस्तु न वेतरस्मात्। मध्ये सः।

13.35 तस्यैव लकारभावे धातौ स्वरः कल्पयतावॢकारः।

13.36 अनन्तस्थं तमनुस्वारमाहुः।

अनुस्वारोच्चारणविषये व्याळे र्मतम्

13.37 व्याळि र्नासिक्य मनुनासिकं वा।

सन्ध्यक्षराणां स्वरूपम्

13.38 सन्ध्यानि सन्ध्यक्षराण्याहु रेके द्विस्थानतैतेषु तथोभयेषु।

13.39 सन्ध्येष्वकारोऽर्ध मिकार उत्तरं युजो रुकार इति शाकटायनः।

13.40 मात्रा संसर्गा दवरेऽपृथक्श्रुती।

13.41 ह्रस्वानुस्वार व्यतिषङ्गवत् परे।

वाचो मन्द्राऽऽदीनि त्रीणि स्थानानि

13.42 त्रीणि मन्द्रं मध्यम मुत्तमञ्च स्थाना न्याहु स्सप्त यमानि वाचः।

सप्त यमाः - तेषां स्वरूपञ्च

13.43 अनन्तरश्चात्र यमोऽविशेषः।

13.44 सप्त स्वरा ये यमास्ते।

13.45 पृथग्वा।

वाचो वृत्तीनां निरूपणम्

13.46 तिस्रो वृत्ती रुपदिशन्ति वाचो विलम्बितां मध्यमाञ्च द्रुताञ्च।

13.47 वृत्त्यन्तरे कर्मविशेष माहुः।

13.48 मात्राविशेषः प्रतिवृत्त्युपैति।

13.49 अभ्यासार्थे द्रुतां वृत्तिं प्रयोगार्थे तु मध्यमाम्।

शिष्याना मुपदेशार्थे कुर्याद् वृत्तिं विलम्बिताम्।।

13.50 चाषस्तु वदते मात्रां द्विमात्रां वायसोऽब्रवीत्।

शिखी त्रिमात्रो विज्ञेय एष मात्रा परिग्रहः।।

उच्चारण दोष पटलम्

वर्णदोषाणां सामान्य स्वरूपम्

14.1 समुद्दिष्टा वर्णगुणाः पुरस्ता न्निर्दिष्टानां सांहितो यश्च धर्मः।

तदायापाय व्यथनानि दोषा स्तान् व्याख्यास्यामोऽत्र निदर्शनाय।

वर्णानां सामान्यदोषाः

14.2 निरस्तं स्थानकरणापकर्षे।

14.3 विहारसंहारयो र्व्यासपीळने।

14.4 ओष्ठाभ्या मम्बूकृत माह नद्धं दुष्टम्।

14.5 मुखेन सुषिरेण शूनम्।

14.6 सन्दष्टन्तु व्रीळन आह हन्वोः।

14.7 प्रकर्षणे तदु विक्लिष्ट माहुः।

14.8 जिह्वामूलनिग्रहे ग्रस्त मेतत्।

14.9 नासिकयो स्त्वनुषङ्गेऽनुनासिकम्।

स्वराणां दोषाः

14.10 अयथामात्रं वचनं स्वराणाम्।

14.11 सन्दंशो व्यासः पीळनं निरासः।

14.12 ग्रासः कण्ठ्ययोः।

अनुनासिकानां दोषौ

14.13 अनुनासिकानां सन्दष्टता विषमरागता वा।

सान्तस्थानां वर्णानां दोषौ

14.14 सान्तस्थाना मादिलोपान्तलोपौ।

व्यञ्जनानां सामान्यदोषाः

14.15 अदेशे वा वचनं व्यञ्जनस्य।

14.16 अन्योऽन्येन व्यञ्जनानां विरागः।

14.17 लेशेन वा वचनं पीळनं वा।

सघोषाणां सोष्मणा मूष्मणाञ्च दोषाः

14.18 घोषवता मनुनादः पुरस्ता दादिस्थानां क्रियते धारणं वा।

14.19 सोष्मोष्मणा मनुनादोऽप्यनादः।

14.20 लोमश्यञ्च क्ष्वेळन मूष्मणान्तु।

वर्गीयवर्णानां दोषाः

14.21 वर्गेषु जिह्वाप्रथनं चतुर्षु।

14.22 ग्रासो मुख्ये।

14.23 प्रतिहार श्चतुर्थे।

14.24 सरेफयो र्मध्यमयो र्निरासः।

14.25 विक्लेशस्थाने सकले चतुर्थे।

रेफ लकारयो र्दोषाः

14.26 अतिस्पर्शो बर्बरता च रेफे।

14.27 जिह्वान्ताभ्याञ्च वचनं लकारे।

हकारस्य तदन्योष्मणाञ्च दोषाः।

14.28 श्वासोऽघोषनिभता वा हकारे।

14.29 निरासोऽन्येषूष्मसु पीळनं वा।

विसर्जनीयस्य दोषाः

14.30 स्वरात् परं पूर्वसस्थान माहुः दीर्घा न्निरस्तं तु विसर्जनीयम्।

14.31 कण्ठ्याद्यथा रेफवत स्तथाऽऽहुः।

14.32 रक्तात्तु नासिक्य मपीतरस्मात्।

14.33 संयोगाऽऽदे रूष्मणः पूर्वमाहु र्विसर्जनीय मधिकं स्वरोपधात्।

यमस्य दोषाः

14.34 परं यमं रक्तपरा द्घोषात्।

14.35 ऊष्माणं वा घोषिण स्तत्प्रयत्नम्।

विसर्जनीयस्य दोषाः

14.36 शुनश्शेपो निष्षपी शास्सि निष्षाळविक्रमा ब्रह्म विष्णु स्म पृश्निः।

अनुनासिक स्थाने अनुस्वारोच्चारणम्

14.37 स्पर्शोष्मसन्धीन् स्पर्शरेफसन्धी नभिप्रायांश्च परिपादयन्ति।

ॠकार- ॠकारयो र्दोषः

14.38 स्वरौ कुर्वन्त्योष्ठ्यनिभौ सरेफौ तिस्रो मातॄ स्त्री न्पितॄन् यन्नॄभि र्नॄन्।

अघोषाणां दन्त्यानां दोषः

14.39 दन्त्यान् सकारोपनिभा नघोषान् रथ्यः पृथ्वी पृथिवी त्वा पृथीति।

ह्रस्वस्वरस्य लोपः,अविद्यमानस्य वा ह्रस्वस्योच्चारणम्

14.40 ऊष्मान्तस्थाप्रत्ययं रेफपूर्वं ह्रस्वं लुम्पन्त्याहु रथाप्यसन्तम्।

पुरुषन्तिं पुरुवारार्यमाऽष्ट्र्यां हरियोजनाय हरियूपीयायाम्।।

ऐकारस्य दोषाः

14.41 ऐये रित्यैकारमकार माहुर् वैयश्चेति क्रमयन्तो यकारम्।

14.42 तदेवान्येषु विपरीतमाहु स्त रय्या वय्यं च हृदय्ययेति च।।

14.43 अकारस्य स्थान ऐकारमाहु र्लुम्पन्ति च सयमीकार मुत्तरम्।

बह्वक्षरं द्व्यक्षरतां नयन्ति यथोनयी र्ध्वनयीत् कोशयीरिति।

14.44 तदेव चान्यत्र विपर्य्ययेण कार्य्ये ऐत्वे सयमीकारमाहुः।

धातो र्बिभेते र्जयते र्नियश्चा भैष्मचाजैष्म नैष्टेति चैषु।।

इकारस्य दोषौ

14.45 इकारस्य स्थान ऋकारमाहु र्लकारं वा चन्द्रनिर्णिक् सुशिल्पे।

ऋकारस्य दोषः

14.46 अनन्तरे तद्विपरीतमाहु स्तालव्ये श्रृङ्गे बिभृया द्विचृत्ताः।

अविद्यमानस्य यकारस्योच्चारणम्

14.47 तालुस्थानौ व्यञ्जना दुत्तरश्चे दयकार स्तत्र यकारमाहुः।

शुनश्शेप श्शास्सि ववर्जुषीणा मत्के विरप्शीति निदर्शनानि।।

विद्यमानस्य यकारस्य वकारस्य वा लोपः

14.48 लुम्पन्ति वा सन्तमेवं य्वकारं ज्यैष्ठ्याय सम्वार न्नापृच्छ्य मृभ्वा।

संयोगस्य स्वरेण व्यवच्छेदः

14.49 व्यस्यन्त्वन्त र्महतोऽव्यायतं तं दीर्घाऽऽयु स्सूर्यो रुशदीर्त ऊर्जम्।

अन्तस्थाया लोपो द्विर्भावश्च

14.50 लुम्पन्त्यन्तस्थां क्रमयन्ति वैतां स्वरात् सस्थाना दवरां परां वा।

स्वस्तयेऽधायि भुवनेयमूवुः।

अनुनासिकस्य ह्रस्वस्य दीर्घत्वम्

14.51 रक्तं ह्रस्वं द्राघय न्त्युग्र मोकः।

अविद्यमानस्य ऊष्मण उच्चारणम्

14.52 हकारसोष्मोपहिता द्यकारा द्वकाराद्वा सर्व सोष्मोष्म पूर्वात्।

तत्सस्थानं पूर्व मूष्माणमाहु स्तुच्छ्या न्दध्या आपृच्छ्यमृभ्वा ह्वये ऽह्यः।

अधिक यमस्योच्चारणम्

14.53 पकारवर्गोपहिताच्च रक्ता दन्यं यमं तृण्णुता ऽऽप्नान मौभ्नात्।

स्वरोपधा दनुनासिकात् पूर्वमनुस्वारस्योच्चारणम्, उपधाया अन्यवर्णत्वं वा

14.54 अनुस्वार मुपधां वा ऽन्यवर्णां स्वरोपधात् सोष्म यमोदयश्चेत्।

तङ् घ्नन्त्यङ्मो जङ्गत ईङ्खयन्ती स्सञ्ज्ञातरूपो ऽथ सञ्ज्ञानमिन्द्रः।

अनुनासिकात् परस्य वर्णस्य द्विरुच्चारणम्

14.55 सान्तस्थादौ धारयन्तः परक्रमं शर्मन्स्यामास्मिन्सु जनाञ्छ्रुधी यतः।

अनुनासिकै स्स्वराणामनुनासिकता

14.56 रक्तै राग स्समवाये स्वराणां न नूनं नृम्णं नृमणा नृभि र्नॄन्।

अनुनासिकात् परस्य हकारस्य सोष्मत्वम्

14.57 रक्तात्तु सोष्मा क्रियते हकारो दध्यङ्ङ् देवान् हवते महान् हि।

संयोगानां चत्वारो दोषाः

14.58 संयोगानां स्वरभक्त्या व्यवायो विक्रमणं क्रमणं वा यथोक्तम्।

विपर्य्ययो वा व्यत तिल्विलेऽज्मन् द्रप्सो ऽजुभ्रन् सार्ञ्जयोऽष्ट्रां प्र नेष्ट्रात्।

14.59 विवृत्तिषु प्रत्यया ऽऽदे रदर्शनं यथा या ऐच्छश्च य औशिजश्च।

14.60 इ उ सन्धौ सन्ध्य वचनञ्च कासुचित् स इदस्ता कस्त उषो यथैते।

14.61 समानवर्णासु विपर्य्ययो वा यथा ह्यूती इन्द्र क आसतश्च।

14.62 अभिव्यादानञ्च विवृत्तिपूर्वे कण्ठ्ये ता आपोऽवसा एति दीर्घे।

दोषाणा मसंख्यता शास्त्रस्य प्रयोजनञ्च

14.63 न दोषाणां स्वरसंयोगजाना मन्तो गम्य स्संख्ययाऽथेतरेषाम्।

14.64 शक्यस्तु शास्त्रादधि साधु धर्मो युक्तेन कृत्स्नः प्रतिपत्तु मस्मात्।

वर्णाना मुच्चारणे अकारस्य अपेक्षा

14.65 अकारस्य करणावस्थयाऽन्यान् स्वरान् ब्रूयात्।

14.66 तद्धि सम्पन्नमाहुः।

14.67 परानकारोदयवद् विवक्षेत् सर्वत्र वर्णानिति सम्पदेषा।

दोषनिरसन पूर्वकं वर्णशिक्षायाः सप्रयोजनत्व स्थापनम्

14.68 शास्त्रापवादात् प्रतिपत्ति भेदा न्निन्द न्त्यकृत्स्नेति च वर्णशिक्षाम्।

14.69 सैतेन शास्त्रैर्न विशिष्यतेऽन्यैः कृत्स्नञ्च वेदाङ्ग मनिन्द्यमार्षम्।

ओङ्कार पटलम् (वेदाध्ययन पटलम्)

वेदाध्ययने गुरुशिष्ययो रुपवेशन प्रकारः

15.1 पारायणं वर्तयेद् ब्रह्मचारी गुरुश्शिष्येभ्य स्तदनुव्रतेभ्यः।

अध्यासीनो दिशमेकां प्रशस्तां प्राचीमुदीची मपराजितां वा।।

15.2 एक श्श्रोता दक्षिणतो निषीदेद् द्वौ वा।

15.3 भूयांसस्तु यथाऽवकाशम्।

गुरवे शिष्य प्रार्थना

15.4 तेऽधीहि भो इत्यभिचोदयन्ति गुरुं शिष्या उपसङ्गृह्य सर्वे।

ओङ्कारस्य महिमा, तदुच्चारण प्रकारश्च

15.5  स ओ 3 मिति प्रस्वरति त्रिमात्रः प्रस्वार स्थाने स भवत्युदात्तः।

चतुर्मात्रो वाऽर्धपूर्वानुदात्त ष्षण्मात्रो वा भवति द्विस्स्वर स्सन्।

15.6  अध्येतु रध्यापयितुश्च नित्यं स्वर्गद्वारं ब्रह्म वरिष्ठ मेतत्।

मुखं स्वाध्यायस्य भवेत्।

15.7  न चैतत् सन्दध्यात् स्वाध्यायगतं परेण।

वेदाध्ययने गुरुप्रक्रिया शिष्यप्रक्रिया च

15.8  प्रचोदितोऽभिक्रमते यथाऽस्य क्रमः परस्ता द्विहित स्तथैव।

15.9  सर्वोदात्तं त्विह तस्मि न्नपृक्त मक्षैप्र युक्तं द्विरुपस्थितं वा।

15.10 अभिक्रान्ते द्वैपदे वाऽधिके वा पूर्वं पदं प्रथमः प्राह शिष्यः।

15.11 निर्वाच्ये तु भो3 इति चोदना स्या न्निरुक्त ओं भो 3 इति चाभ्यनुज्ञा।

15.12 परिपन्नं प्राकृत मूष्मसन्धिं नकारस्य लोप रेफोष्मभावम्।

असंयुक्त मृपरं रेफसन्धिं विवृत्ति मित्यत्र निदर्शनानि।।

15.13 प्रत्युच्चार्यैतद् वचनं परस्य शिष्यस्य स्याद् भो3 इति चोदना वा। अर्धर्चौदर्केषु तु वर्जयेयु रध्यायान्ते षूभयथा स्मरन्ति।

15.14 गुरु श्शिष्यस्य पदमाह मुख्यं समास श्चेदसमासो यदि द्वे।

15.15 एतेन कल्पेन समाप्य प्रश्नं प्रत्याम्नायु स्तं पुनरेव सर्वे।

15.16 तत ऊर्ध्वं सन्ततं संवृतेन प्रविग्रहेण मृद्ववग्रहेण।

15.17 सर्वोदात्तेन च चर्चयेयु स्सर्व इमा न्युपस्थापयन्तः पदानि।

15.18 अभ्युत् परा निर्व्युप सं प्रति प्र न्यध्यत्यपा दुस्स्वपि पर्यवाऽनु।

15.19 आद्यं स्थितोपस्थितमेक मेषा मर्धर्चान्ते कुर्युरथो द्विषन्धौ।

15.20 च घ हि वेति च सर्वत्र तेषा मनेकं चेत् सन्निपतेद् द्वितीयम्।

15.21 समस्यन्तश्च द्विपदाद्यर्धर्चौ व्यवस्यन्त इतरा श्चर्चयेयुः।

15.22 दक्षिणाय प्रथमं प्रश्नमाह प्रदक्षिणं तत ऊर्ध्वं परीयुः।

15.23 एवं सर्वे प्रश्नशोऽध्याय मुक्त्वो- पसङ्गृह्यातिसृष्टा यथार्थम्।

प्रश्न स्वरूप मध्याय स्वरूपञ्च

15.24 प्रश्नस्तृचः।

15.25 पङ्क्तिषु तु द्वृचो वा।

15.26 द्वे द्वे च पङ्क्ते रधिकाक्षरेषु।

15.27 एका च सूक्तम्।

15.28 समया स्त्वगण्याः परावरार्ध्याः।

15.29 द्विपदे यथैका।

15.30 सूक्तस्य शेषोऽल्पतरो यदि स्यात् पूर्वं स गच्छेत्।

यदितु द्वृचो वा।

15.31 ते षष्टि रध्याय उपाधिका वा सूक्तेऽसमाप्ते यदि ते समाप्ताः।

वेदाध्ययने गुरु प्रक्रिया शिष्य प्रक्रिया च (पूर्वानुवृत्ता)

15.32 भो 3 इत्यर्धर्चे गुरुणोक्त आह शिष्य ओं 3 भो इत्युचिता मृचञ्च।

15.33 अथैके प्राऽऽहु रनुसंहितं तत्पारायणे प्रवचनं प्रशास्तम्।

छन्दः पटलम्

प्रजापते र्देवाना मसुराणाञ्च सप्त छन्दांसि

16.1 गायत्र्युष्णि गनुष्टुप् च बृहती च प्रजापतेः।

पङ्क्ति स्त्रिष्टुब् जगती च सप्त च्छन्दांसि तानि ह।।

अष्टाक्षर प्रभृतीनि।

16.2 चतुर्भूयः परं परम्।

16.3 दैवान्यपि च सप्तैव।

16.4 सप्त चैवाऽसुराण्यपि।

16.5 एकोत्तराणि देवानां तान्येवैकाक्षरादधि।

16.6 एकावमा न्यसुराणां ततः पञ्चदशाक्षरात्।

ऋषीणां छन्दांसि

16.7 तानि त्रीणि समागम्य सनामानि सनाम तत्।

एकं भव त्यृषिच्छन्द स्तथा गच्छन्ति सम्पदम्।।

16.8 एवं त्रिप्रकृतीन्याहु र्युक्तानि चतुरुत्तरम्। ऋषिच्छन्दांसि।

16.9 तैः प्रायो मन्त्र श्श्लोकश्च वर्तते।

यजुषां साम्ना मृचां ब्रह्मणश्च छन्दांसि

16.10 तत्पादो यजुषां छन्द स्साम्नान्तु द्वावृचां त्रयः।

16.11 गायत्र्यादि जगत्यन्त मेक द्वि त्र्यधिकं तु तत्।

आर्षवत् तत्समाहारो ब्राह्मो वर्ग ष्षळुत्तरः।

16.12 अक्षराणि तु षड्त्रिंशद् गायत्री ब्रह्मणो मिता।

16.13 यजुषां षळृचां त्रिष्षट् साम्नां द्वादश सम्पदि।

ऋषीणां वर्गाणां त्रिविधत्वम्

16.14 ऋषीणान्तु त्रयो वर्गा स्सप्तका एकधेतरे।

ऋषि च्छन्दसा मधिकारः

16.15 ऋषिच्छन्दांसि।

गायत्री तद्भेदाश्च

16.16 गायत्री सा चतुर्विंशत्यक्षरा।

अष्टाक्षरा स्त्रयः पादा श्चत्वारो वा षळक्षराः।

16.17 इन्द्र श्शचीपति र्बलेन वीळितः।

दुश्च्यवनो वृषा समत्सु सासहिः।

16.18 पञ्चकाः पञ्च षड्वाऽन्त्यः पदपङ्क्तिर्हि सा भुरिक्।

द्वौ वा पादौ चतुष्कश्च षट्कश्चैक स्त्रिपञ्चकाः।

16.19 अधा हीन्द्रेति च तृचौ घृतमग्ने तमित्यृचः।

16.20 अष्टको दशक स्सप्ती विद्वांसाविति सा भुरिक्।

16.21 युवाकु हीति गायत्री त्रय स्सप्ताक्षरा विराट्।

सैषा पादनिचृन्नाम गायत्र्येवैकविंशिका।

16.22 षट्क स्सप्तकयो र्मध्ये स्तोतृणां विवाचीति।

यस्या स्साऽतिनिचृन्नाम गायत्री द्विर्दशाक्षरा।।

16.23 षट्कसप्तकयो र्मध्ये स्तुह्यासावतिथिम्।

षळक्षरः प्रकृत्यैष व्यूहेनाष्टाक्षरोऽपि वा।

16.24 उत्तरोत्तरिणः पादा ष्षट् सप्ताष्टाविति त्रयः।

गायत्री वर्धमानैषा त्वमग्ने यज्ञानामिति।

16.25 अष्टकौ मध्यम ष्षट्क एकेषा मुपदिश्यते।

16.26 स नो वाजेषु पादौ द्वौ जागतौ द्विपदोच्यते।

16.27 आद्यान्त्यौ सप्तकौ यस्या मध्ये च दशको भवेत्।

यवमध्या च गायत्री स सुन्व इति दृश्यते।।

16.28 षळक्षर स्सप्ताक्षर स्तत एकादशाक्षरः।

एषोष्णिग्गर्भा गायत्री ता मे अश्व्यानामिति।

उष्णिक् तद्भेदाश्च

16.29 अष्टाविंशत्यक्षरोष्णिक् सा पादै र्वर्तते त्रिभिः।

पूर्वावष्टाक्षरौ पादौ तृतीयो द्वादशाक्षरः।

16.30 पुरउष्णिक् तु सा तस्मिन् प्रथमे मध्यमे ककुप्।

16.31 अग्ने वाजस्य तच्चक्षु स्सुदेव स्समहेति च।

ऋचो निदर्शनायैताः परा यास्ता यथोदिताः।

16.32 सप्ताक्षरै श्चतुर्भिर्द्वि नदं मंसीमहीति च।

पादै रनुष्टुभौ विद्या दक्षरै रुष्णिहाविमे।

16.33 ददी रेक्ण इति त्वेषा ककुम्न्यङ्कुशिरा निचृत्।

एकादशोऽस्याः प्रथम उत्तम श्चतुरक्षरः।

16.34 एकादशाक्षरौ च द्वौ मध्ये चैक ष्षळक्षरः।

उष्णिक् पिपीलिकमध्या हरी यस्येति दृश्यते।

16.35 ताभ्यां पर ष्षळक्षरः प्र या तनुशिरा नाम।

16.36 आद्यः पञ्चाक्षरः पाद उत्तरेऽष्टाक्षरा स्त्रयः।

अनुष्टुब्गर्भैषोष्णिक् साऽगस्त्येऽस्ति पितुं न्विति।

अनुष्टुप् तद्भेदाश्च

16.37 द्वात्रिंशदक्षराऽनुष्टुप् चत्वारोऽष्टाक्षरा स्समाः।

16.38 कृत्तिर्द्वौ द्वादशाक्षरा वेकश्चाष्टाक्षरः परः।

16.39 यस्यास्त्वष्टाक्षरो मध्ये सा पिपीलिक मध्यमा।

16.40 नवकौ द्वादशी व्यूना ता विद्वांसेति का विराट्।

16.41 तेषा मेकाधिका वन्त्यौ नष्टरूपा वि पृच्छामि।

16.42 दशाक्षरा स्त्रयो विराट् त्रयो वैकादशाक्षराः।

16.43 षण्महा पदपङ्क्तिस्तु षड्कोऽन्त्यः पञ्च पञ्चकाः।

16.44 मा कस्मै पर्यू षु श्रुध्यग्ने तव स्वादिष्ठा ता ऋचः।

बृहती तद्भेदाश्च

16.45 चतुष्पदा तु बृहती प्राय ष्षड्त्रिंशदक्षरा।

अष्टाक्षरा स्त्रयः पादा स्तृतीयो द्वादशाक्षरः।

16.46 पुरस्ताद् बृहती नाम प्रथमे द्वादशाक्षरे।

उपरिष्टाद् बृहत्यन्त्ये द्वितीये न्यङ्कुसारिणी।

स्कन्धो ग्रीव्युरोबृहती त्रेधैनां प्रतिजानते।

16.47 त्रयो द्वादशको यस्या स्सा होर्ध्वबृहती विराट्।

16.48 महो योऽधीन्नतं मत्सी- जान मिदजीजनः।

16.49 अष्टिनो र्दशकौ मध्ये विष्टारबृहती युवम्।

16.50 एकाऽगस्त्ये पितु स्स्तोमे नवाक्षर पदोत्तमा।

16.51 द्वयोश्चोपेदमाहार्षं सर्वे व्यूहे नवाक्षराः।

16.52 त्रयोदशाक्षरौ च द्वौ मध्ये चाष्टाक्षरो भवेत्।

अभि वो वीरमित्येषा सा पिपीलिकमध्यमा।।

16.53 नवकाष्ट दश सहैकः परमोऽष्ट च यदि पादाः।

बृहती विषमपदा सा सनित स्सुसनित रुग्र।

पङ्क्ति स्तद्भेदाश्च

16.54 पङ्क्तिरष्टाक्षराः पञ्च।

16.55 चत्वारो दशका विराट्।

16.56 आदेशोऽष्टाक्षरौ विद्यात् सोपसर्गेषु नामसु।

16.57 युग्मा वष्टाक्षरौ पादा वयुजौ द्वादशाक्षरौ।

सा सतोबृहती नाम।

16.58 विपरीता विपर्यये।

16.59 आस्तार पङ्क्तिरादितः।

16.60 प्रस्तारपङ्क्ति रन्ततः।

16.61 संस्तारपङ्क्ति र्मध्यतः।

16.62 विष्टारपङ्क्ति र्बाह्यतः।

16.63 मन्ये त्वा मा ते राधांसि य ऋष्व आऽग्निं महीति च।

पितृभृतो नाग्ने तव ता ऋचोऽत्र निदर्शनम्।

त्रिष्टुप् तद्भेदाश्च

16.64 चतुश्चत्वारिंशत् त्रिष्टुबक्षराणि चतुष्पदा। एकादशाक्षरैः पादैः।

16.65 द्वौ चेत्तु द्वादशाक्षरौ। प्रायस्योप जगत्येषा परस्यास्य तु सा त्रिष्टुप्।

16.66 वैराज जागतैः पादै र्यो वाचेत्यभिसारिणी।

16.67 नवको दशको वा स्या देकोऽनेकोऽपि त्रिष्टुभः।

एकादशाक्षरश्चापि विराड्वाना ह नाम सा।

16.68 पूर्वौ दशाक्षरौ पादा उत्तरेऽष्टाक्षरा स्त्रयः।

विराड्पूर्वा ह नामैषा त्रिष्टुप् पङ्क्त्युत्तरैव वा।

16.69 त्रयश्चैकादशाक्षरा एकश्चाष्टाक्षरः परः। विराड्रूपा ह नामैषा त्रिष्टुम्नाक्षरसम्पदा।

16.70 त्रयश्च द्वादशाक्षरा एकश्चाष्टाक्षरः क्वचित्।

एषा ज्योतिष्मती नाम ततो ज्योति र्यतोऽष्टकः।

16.71 चत्वारोऽष्टाक्षराः पादा एकश्च द्वादशाक्षरः।

सा महाबृहती नाम।

16.72 यवमध्या तु मध्यमे।

16.73 सो चिन्नु सनेमि श्रुध्येव क्रीळन् यद्वाऽग्निनेन्द्रेण।

नमोवाके बृहद्भिश्च ता ऋचोऽत्र निदर्शनम्।

जगती तद्भेदाश्च

16.74 पञ्चाश ज्जगती व्यूना चत्वारो द्वादशाक्षराः।

तदस्या बहुलं वृत्तम्।

16.75 महापङ्क्ति ष्षळष्टकाः।

16.76 अष्टकौ सप्तक ष्षद्को दशको नवकश्च वा।

16.77 महा सतोबृहत्यर्धे व्यूहयो रेतयो स्सह।

संपाते त्वेति पादान्ते देववान् सप्तविंशके।।

16.78 अस्मा ऊ षूभे यदिन्द्र सेहान उग्रेति षट्।

आ यः पप्रौ विश्वासाञ्च ता ऋचोऽत्र निदर्शनम्।।

अतिच्छन्दसौ द्वौ वर्गौ

16.79 द्वावतिच्छन्दसां वर्गा उत्तरौ चतुरुत्तरौ।

16.80 प्रथमातिजगत्यासां सा द्विपञ्चाश दक्षरा।।

16.81 षद्पञ्चाशत्तु शक्वरी।

16.82 षष्टि रेवातिशक्वरी।

16.83 उत्तराष्टि श्चतुष्षष्टिः।

16.84 ततोऽष्टाषष्टि रित्यष्टिः।

16.85 धृतिः पूर्वा द्विसप्ततिः।

16.86 षड्सप्तति स्त्वतिधृतिः।

16.87 सर्वा दाशतयीष्वेताः।

16.88 उत्तरास्तु सुभेषजे।

16.89 कृतिः प्रकृतिराकृति र्विकृति स्संकृति स्तथा।

षष्ठी चाभिकृतिर्नाम सप्तम्युत्कृति रुच्यते।

16.90 अशीति श्चतुरशीति रष्टाशीति र्द्विनवतिः।

षण्णवति श्शतं पूर्ण मुत्तमा तु चतुश्शतम्।

16.91 तमिन्द्रं प्रो षु सुषुम त्रिकद्रुकेष्वया रुचा।

सखे च स हि शर्धश्च मध्यमो वर्ग उच्यते।

16.92 आ सु कृतिस्तु प्रकृति र्ध्रुवं पूर्वा ततस्तु या।

आकृति र्यदि ते मात्रा मेषी विकृति रुच्यते।।

संकृतिस्तु न वै तत्र देवो अग्नि स्त्वभिकृतिः।

सर्वस्येत्युत्कृति स्तत्र तृतीयो वर्ग उच्यते।

छन्दःपटलम् (2)

## छन्दसां केचिद्विशेषाः

17.1 एवं क्लृप्तप्रमाणानां छन्दसामुपदिश्यते।

निचृत् संज्ञा भुरिक् संज्ञा च

17.2 एकद्व्यूनाधिका सैव निचृ दूनाधिका भुरिक्।

स्वराट् संज्ञा विराट् संज्ञा

17.3 विराज स्तूत्तरस्याऽऽहु द्वाभ्यां या विषये स्थिताः।

स्वराज एवं पूर्वस्य याः काश्चैवंगता ऋचः।

17.4 याः काश्चिद् बहुपादास्तु गायत्र्यो हीनतां गताः।

अक्षरै र्बहुभि स्तास्तु गायत्र्य उपधारयेत्।

17.5 ता राड् विराड् स्वराट् सम्राट् स्ववशिनी परमेष्ठी।

प्रतिष्ठा प्रत्न ममृतं वृषा शुक्रं जीवं पयः।।

तृप्त मर्णोऽशोऽम्भोऽम्बु वार्यापश्चोदक मुत्तमम्।

## छन्दसां देवताः

17.6 दैवतं छन्दसा मत्र वक्ष्यते तत उत्तरम्।

अग्ने र्गायत्र्यतोऽधि द्वे भक्त्या दैवत माहतुः।

सप्तानां छन्दसामृचौ।

17.7 न पङ्क्तेः।

17.8 सा तु वासवी।

17.9 प्राजापत्या त्वतिछन्दा।

17.10 विच्छन्दा वायुदेवता।

17.11 द्विपदा पौरुषं छन्दः।

17.12 ब्राह्मी त्वेकपदा स्मृता।

## छन्दसां वर्णाः

17.13 एतेनैव क्रमेणैषां वर्णतो भक्ति रुच्यते।

17.14 श्वेतञ्च सारङ्ग मतः पिशङ्गं कृष्णमेव च।

नीलञ्च लोहितञ्चैव सुवर्णमिव सप्तमम्।

अरुणं श्याम गौरे च बभ्रु वै नकुलं तथा।

17.15 पृश्नि वर्णन्तु वैराजम्।

17.16 निचृच्छ्यावम्।

17.17 पृषद्भुरिक्।

17.18 ब्रह्म सामर्ग्यजुश्छन्दः कपिलं वर्णत स्स्मृतम्।

गायत्र्याः पूर्वाणि माऽऽदीनि पञ्च च्छन्दांसि, तेषां वैराजानि च

17.19 मा प्रमा प्रतिमोपमा संमा च चतुरक्षरात्।

चतुरुत्तर मुद्यन्ति पञ्च च्छन्दांसि तानि ह।

17.20 हर्षीका सर्षीका मर्षीका सर्वमात्रा विराड्कामा।

व्यक्षराऽऽदीनि माऽऽदीनां वैराजान्यनुचक्षते।।

पादवृत्ताक्षरेषु सन्देहाऽऽस्पदानामृचां छन्दो निर्णयप्रकारः

17.21 अक्षराण्येव सर्वत्र निमित्तं बलवत्तरम्।

विद्या द्विप्रतिपन्नानां पादवृत्ताक्षरै र्ऋचाम्। छन्दोदृष्ट्या न्यूनाक्षराणां पादानां पूरणार्थं सन्धिविच्छेदो व्यवधानं वा

17.22 व्यूहे देकाक्षरीभावान् पादेषूनेषु सम्पदे।

17.23 क्षैप्रवर्णांश्च संयोगान् व्यवेयात् सदृशै स्स्वरैः।।

पादानां विभाग प्रकारः

17.24 पदाभेदेन पादानां विभागोऽभिसमीक्ष्य तु।

छन्दस स्सम्पदं तां तां यां यां मन्येत पादतः।

17.25 प्रायोऽर्थौ वृत्तमित्येते पादज्ञानस्य हेतवः।

17.26 विशेष सन्निपाते तु पूर्वं पूर्वं परं परम्।

17.27 अनुदात्तन्तु पादाऽऽदौ नो वर्जं विद्यते पदम्।

17.28 पादाऽऽदा वनुदात्तन्तु यदन्यत् तदिहोदितम्।

17.29 वशोऽस्तीयक्षसीत्येकम्।

17.30 तृचे चाभिष्ट इत्यपि। नेति पूर्वाणि सर्वाणि।

17.31 मधुच्छन्द स्यृतावृधौ।

17.32 स्तोमशब्दे परेऽधायि।

17.33 ऋतशब्दे परे स्त्रिधत्।

17.34 हुवे तुराणां यत् पूर्वम्।

17.35 तृपन् मरुत उत्तरम्।

17.36 प्रेदं ब्रह्मेति चैतस्मिन् सूक्ते पादोऽस्ति पञ्चमः।

सर्वानुदात्त ष्षड्वृक्ष्वा- दितश्च चतुर्दशः।।

पादानां विषये इतरे विशेषाः

17.37 पादौ गायत्र वैराजा वष्टाक्षर दशाक्षरौ।

17.38 एकादशि द्वादशिनौ विद्यात् त्रैष्टुभजागतौ।।

17.39 वर्षिष्ठाणिष्ठयो रेषां लघूपोत्तम मक्षरम्।

गुर्व्वेतरयो र्ऋक्षु तद् वृत्तं छन्दसां प्राऽऽहुः।

17.40 एतै श्छन्दांसि वर्तन्ते सर्वाण्यन्यै रतोऽल्पशः।

एत द्विकारा एवान्ये सर्वे तु प्राकृता स्समाः।

17.41 एक एक पदैतेषां द्वौ पादौ द्विपदोच्यते।

ते तु तेनैव प्रोच्येते सरूपे यस्य पादतः।

17.42 न दाशतय्येकपदा काचिदस्तीति वै यास्कः।

अन्यत्र वैमद्या स्सैका - दशिनी मुखतो विराट्।

17.43 आहु स्त्वेकपदा अन्ये अध्यासा नेकपातिनः।

अध्यासानपि केचि त्त्वाहु रेकपदा इमाः।

आ वां सुम्ने असिक्न्यां द्वे उरौ देवा स्सिषक्तु नः।

17.44 पादा एकाधिका स्सन्ति च्छन्दसां चतुरक्षरात्।

सन्त्यतिच्छन्दसां पादा एकोत्कर्षेण जागतात्।

षोळशाक्षर पर्यन्ता एकश्चाष्टादशाक्षरः।

17.45 एकादशैव च्छन्दसि पादा ये षोळशाक्षराः।

सर्वे त्रिकद्रुकीयासु नाकुलोऽष्टादशाक्षरः।

ऋग्वेदे बृहत्तमा ऋक्

17.46 अवर्महो ऽविकर्षेण ज्येष्ठा दाशतयीष्वृचाम्।

17.47 विकर्षेण तु पादैश्च स हि शर्ध इति स्मृता।

ऋग्वेदे बहुपादाऽपि लघुतमा ऋक्

17.48 अणिष्ठा बहुपादानां भारद्वाजी पुरूतमम्।

17.49 अविकर्षेण सौभरी प्रेष्ठम्वादि ह्सीयसी।

द्विपद विराजां चतुष्पदाऽक्षरपङ्क्तित्वमिति केचित्

17.50 विराजो द्विपदाः केचित् सर्वा आहु श्चतुष्पदाः।

कृत्वा पञ्चाक्षरा न्पादां स्ता स्तथाऽक्षर पङ्क्तयः।

## छन्दः पटलम् (3)

प्रगाथाः

18.1 बार्हतो बृहतीपूर्वः ककुप् पूर्वस्तु काकुभः।

एतौ सतोबृहत्यन्तौ प्रगाथौ भवतो द्वृचौ।।

18.2 त्वमङ्ग प्रप्र वो यद्धं मा चिद् बृहदु गायिषे।

बार्हताः काकुभा नाहु स्तं गूर्धय वयम्विति।

18.3 अनुष्टुब् द्वे च गायत्र्या वेष आनुष्टुभ स्स्मृतः।

विराजा वभिसम्पन्नः पद्याक्षर्यै स उत्थितः।

18.4 आकृति र्व्यपदेशानां प्राय आदित आदितः।

18.5 गायत्र्यादिस्तु बार्हते प्रायो गायत्रबार्हतः।

18.6 गायत्र काकुभो नाम प्रायो भवति काकुभे।

18.7 औष्णिह स्तूष्णिहापूर्वः।

18.8 पङ्क्त्यन्तः पाङ्क्तकाकुभः।

18.9 तमिन्द्रञ्च सुनीथश्च यमादित्यास एव च।

अदान्मे पौरुकुत्स्यश्च ता ऋचोऽत्र निदर्शनम्।

18.10 महा सतोबृहत्यन्तो यो महाबृहतीमुखः। स महाबार्हतो नाम।

18.11 बार्हतो बृहतीमुखः।

18.12 अथो अतिजगत्यन्तः।

18.13 यवमध्योत्तरोऽपि च।

18.14 बृहद्भिस्तं वो नेमिश्च वामी वामस्य ता ऋचः।

18.15 न हि ते विपरीतान्तः।

18.16 मो षु त्वा द्विपदाऽधिकः।

18.17 अनुष्टुब् जगती चैव विश्वेषा मिरज्यन्तश्च।

18.18 द्विपदा बृहती चैव स नो वाजेष्विति स्मृतः।

18.19 ककुप् पूर्वस्तु को वेद स्मृतः काकुभबार्हतः।

18.20 आनुष्टुभौष्णिहं विद्यात् ते म आहु र्य आययुः।

18.21 ते न स्त्राध्वं बृहत्यादि बार्हतानुष्टुभ स्स्मृतः।

18.22 अग्निं वः पूर्व मित्येषो ऽनुष्टुप्पङ्क्ति रेव च।

18.23 यदध्रिगावो अध्रिगू ककुप् च त्रिष्टुबेव च।

18.24 यदद्य वामनुष्टुप् च त्रिष्टुप् चैवोपदिश्यते।

18.25 यत्स्थो दीर्घेति च त्वेष बृहती त्रिष्टुबेव च।

18.26 आ यन्मा वेनास्त्रिष्टुप्च जगती चोपदिश्यते।

18.27 ता वृधन्ता वनुष्टुप् च महा सतोमुखैव च।

18.28 जागत स्त्वददा अभाँ प्रगाथ स्त्रिष्टु बुत्तरः।

18.29 उत्तर स्त्रैष्टुभ स्तस्मा ज्जगत्युत्तर उच्यते।

18.30 त्वमेताञ्जन च द्वौ द्वौ स घा राजेति च स्मृतौ।

18.31 त्वमस्य पारे रजसो जागतौ त्रिष्टुबुत्तरौ।

## अक्षर संज्ञा

18.32 सव्यञ्जन स्सानुस्वार श्शुद्धो वाऽपि स्वरोऽक्षरम्।

## अनुस्वार व्यञ्जनयो स्स्वराङ्ग विचारः

18.33 व्यञ्जना न्युत्तरस्यैव स्वरस्यान्त्यन्तु पूर्वभाक्।

18.34 विसर्जनीयानुस्वारौ भजते पूर्व मक्षरम्।

18.35 संयोगाऽऽदिश्च वैवञ्च।

18.36 सहक्रम्यः परक्रमे।

लघ्वक्षर गुर्वक्षरादि निरूपणम्

18.37 गुर्वक्षरम्।

18.38 लघु ह्रस्वं न चेत् संयोग उत्तरः।

18.39 अनुस्वारश्च।

18.40 संयोगं विद्याद् व्यञ्जनसङ्गमम्।

18.41 गुरु दीर्घम्।

18.42 गरीयस्तु यदि सव्यञ्जनं भवेत्।

18.43 लघु सव्यञ्जनं ह्रस्वम्।

18.44 लघीयो व्यञ्जनादृते।

## एकस्य च्छन्दसः, अन्यस्मिन् छन्दसि विपरिणमनम्

18.45 छन्दस्तुरीयेण समान संख्या याश्छन्दसोऽन्यस्य भवन्त्यृचोऽन्याः। याव् तुरीयं भवति स्वमासां तावत्य एता इतरा भवन्ति।। त्रिपदाऽऽदिषु, ऋक्षु अवसान निर्णयप्रकारः

18.46 द्वाभ्या मवस्येत् त्रिपदासु पूर्वं पादेन पश्चात् क्वचिदन्यथैतत्।

18.47 मध्येऽवसानन्तु चतुष्पदानाम्।

18.48 त्रिभि स्समस्तै रवरैः परैर्वा।

18.49 पङ्क्त्या न्द्विशो वा तत उत्तरेण त्रिभिः परैर्वा विपरीत मेतत्।

18.50 द्विश स्त्रिशो वा परत श्चतुर्भि स्स्यात् षद्पदानामवसान मेतत्।

18.51 त्रिभिस्तु पूर्वं तत उत्तरं स्यात् द्विश स्त्रिशो वा यदि वा समस्तम्। द्वाभ्यां पुन स्सप्तपदावसानम्।

18.52 द्वाभ्याञ्च मध्येऽष्टपदासु विद्यात्।

18.53 अग्निमीळे दृतेरिव गायन्त्येत मधीन्विति।

अयं चक्रं नकिष्टञ्च नकिर्दैवा मिनीमसि।।

विश्वान् देवान् हवामहे स क्षपो निष्कं सुषुम।

न हि वां प्रो षु सहि शर्धस्ता ऋचोऽत्र निदर्शनम्।

18.54 द्वाभ्यां पादेन द्वाभ्यान्तु तव त्यत् पञ्चपदाष्टिः।

अव्यूहेनातिशक्करी तृतीय ष्षोळशाक्षरः।

18.55 चतुर्भिस्तत एकेना-ग्ने तमद्येति च।

18.56 चतुर्भिस्तु परं द्वाभ्यां तव स्वादिष्ठा तच्छंयोः।

18.57 भरद्वाजाय तच्चक्षु रधीद्वृक्षा दृतेरिव।

एतासु न व्यवस्य- न्त्येके द्वादशकादिषु।

प्रश्न स्वरूप मध्याय स्वरूपञ्च

18.58 प्रस्नस्तृचः पङ्क्तिषु तु द्वृचो वा द्वे द्वे च पङ्क्ते रधिकाक्षरेषु।

एका च सूक्तं समयास्त्वगण्याः परावराध्यर्या द्विपदे यथैका।।

सूक्तस्य शेषोऽल्पतरो यदि स्यात् पूर्वं स गच्छे द्यदि तु द्वृचो वा।

ते षष्टि रध्याय उपाधिका वा सूक्तेऽसमाप्ते यदि ते समाप्ताः।।

त्रिष्टुब्जगत्यो श्छन्दोज्ञानस्य च महिमा

18.59 सर्वाणि भूतानि मनोगतिश्च स्पर्शाश्च गन्धाश्च रसाश्च सर्वे।

शब्दाश्च रूपाणि च सर्वमेतत् त्रिष्टुब्जगत्यौ समुपैति भक्त्या।।

18.60 गुर्वक्षराणां गुरुवृत्ति सर्वं गुर्वक्षरं त्रैष्टुभ मेव विद्यात्।

18.61 लघ्वक्षराणां लघुवृत्ति सर्वं लघ्वक्षरं जागतमेव विद्यात्।

18.62 यश्छन्दसां वेद विशेषमेतं भूतानि च त्रैष्टुभ जागतानि।

सर्वाणि रूपाणि च भक्तितो य स्स्वर्गं जयत्येभि रथामृतत्वम्। स्वर्गं जयत्येभि रथामृतत्वम्।

ऋग्वेद प्रातिशाख्यं समाप्तम्।

## 6) हयग्रीव शिक्षा

- क्रमे यथोक्ते पदजातमेव द्विरभ्यसेदुत्तरमेव पूर्वम्
- अभ्यस्य पूर्वं च तथोत्तरे पदेऽवसानमेवं हि जटा विधीयते १
- त्रिभिः पदैः स्यात्क्रमको यत्र तत्र
- मध्यं त्वनभ्यस्य च पूर्वमभ्यसेत्
- अर्थाच्च मध्यस्य भवेद् द्विरुक्तिता
- संदेहदं त्विङ्गनतः प्रदर्शयेत् २
- अभिक्रमे क्रमशास्त्रं प्रमाणं
- स्याद् व्युत्क्रमे व्याकरणं प्रधानम्
- उत्तक्रमे व्युत्क्रमणे विशेषः
- स्वराः प्रकारद्वितयेप्यभिन्नाः ३
- चतुःक्रमे त्रिक्रमवत् परीत्य
- संदर्शयेन्मध्यपदस्य रूपम्
- तथेङ्गयेत्पदजातं विकारि
- व्यावर्तने संहितावत्प्रगृह्य ४

- ऋते क्रमं द्वैपदसंहितास्वर-
- ज्ञानं न चेति क्रमकप्रयोजनम्
- तथान्यतः पदसंधेर्विशेषितः
- स्वराभिधाने हि जटा प्रयोजिका ५
- क्रमस्वरेणैव जटासु भूयते
- समज्यतेऽतोत्र न तिङ्तिङ्विधिः
- स्वराभिधेया हि यथाश्रुतैः स्वरैः
- पदेष्वथामन्त्रितजातिकेष्वपि ६

इति जटापटले प्रथमो वर्गः

---

अथ द्वितीयो वर्गः

- मध्यस्वरस्त्रिक्रमे यत्र लुप्यते
- व्यावर्तने तद्ग्रहणं च सर्वतः
- स्यादन्यथा विग्रहणे प्रयोजनं
- किं वाभिजाते पदनिश्चये तदा ७
- संधिर्निपातस्य कदापि नोक्तस्

- तथापि पूर्वेण जटासु दृष्टः
- स्वरा हि सर्वे क्रमवद्विधेयाः
- कम्पा अपि स्युः स्वरसंधिजाश्च ८
- अर्धर्चान्त्यं पदमेकं प्रदृश्यते
- तदा तदभ्यस्य विरम्य चेङ्गयेत्
- ऋच्येकमेव प्रकटं पदं भवेत्
- परेण साकं परिवर्तनं तदा ९
- ओकार आमन्त्रितजोपि दृष्टः
- संधीयमानो न तु संहितायाम्
- स्वरे परेऽकारवर्जं जटायाम्
- उपैति संधिं न परो विशेषः १०
- अनानुपूर्व्येण च यत्र संहिता
- पदक्रमाद् व्युत्क्रमणं पुनः क्रमः
- भवेत्प्रकारोऽयमनादिरुत्तमः
- सदा जटाया इति सर्वसंमतत् ११

- इति द्वितीयो वर्गः

मूलशिक्षा समाप्ता

---

## 7) व्यालिशिक्षा

- व्यालिशिक्षां प्रवक्ष्यामि ब्रह्मणानुमतः पुरा
- सहस्रवदनेनाहं सूत्रेण च समन्वितम् [1]
- तत्र पूर्वं घनस्यैव प्रमाणं लक्षणं तथा
- घनस्य च विधिं तत्र घनसन्धिं तथैव च [2]
- एवमादि च यत्सर्वं तत्सर्वं वच्मि साम्प्रतम्
- घने द्वादशसन्धिस्स्यात् त्रयोदशपदं वदेत् [3]
- त्रिक्रमे सप्तदशधा संधिरेवं विधीयते
- वदेदष्टादशपदं तत्रैव च विधीयते [4]

- यथास्वरं यथान्यायं यथावच्च सलक्षणम
- य उच्चरेद्धनं सोपि तद्ब्रह्मत्वमवाप्नुयात[5]
- जटावत्संधितः पूर्वं षडावृत्तिः पदद्वयम
- अनन्तरं चैकपदं द्विरावृत्तिर्भवेत्पुनः[ऽ]
- विलोमे मध्यमपदमेकवारं हि केवलम्
- तत्पूर्वं द्विविधं तूक्त्वा चानुलोमे यथाक्रमम्[2ऽ]
- पुनश्च मध्यमपदमारब्ध्व्यमनन्तरम्
- पूर्ववत्सन्धितः कुर्याद्धन एवं विधीयते ८
    - इति व्यालिशिक्षा समाप्ता

---

## 8) व्यालिशिक्षा वृत्तिः

- श्रीमन्तौ श्रीनृहरिचरणावात्मनो न्यस्य चेत-
- स्यृग्वेदाष्टौविकृतिविवृतिं वैदिकश्लोकनीयाम्

- व्याड्याचार्यानुमति मधुसंसूदनाख्यो गुरुश्री-
- कृष्णद्वैपायनतनुभवो मस्करी चर्करीति[1]
- महाकृतिरियं मम प्रकृतिनिर्मला हारिणी
- सुधाविमतिकारिणी विशयहारिणी सेविनाम्
- वचस्यमपहारिणी परविपश्चितामन्वहं
- मनोभुवि विहारिणी भवतु वेदविद्याविदाम्[2]
- जटामालादण्डरेखारथध्वजशिखाघनाः
- क्रममाश्रित्य निर्वृत्ता विकारा अष्ट विश्रुताः[3]
- द्विपदादिक्रमाः पञ्च प्राक् क्रमाद् व्युत्क्रमात्ततः
- पुनः क्रमादुच्चरिता जटात्वं प्रापिता बुधैः[4]
- अनुक्रमश्चोत्क्रमश्च व्युत्क्रमोऽभिक्रमस्तथा
- संक्रमश्चेति पञ्चैते जटायां कथिताः क्रमाः[5]

- आकारगर्भेत्रिपदक्रमेष्वाकारपूर्ववत्
- पुनरुक्तं पदद्वन्द्वं त्रिक्रमे द्विपदभ्रमम्
- हेतुर्मैव प्रवृत्तत्वाज्जटाभावं न चार्हति[೬]
- सानुस्वाराकारगर्भेत्रिक्रमप्रभृतौ यथा
- द्विक्रमत्वभ्रमं हन्तुं मध्यस्थपदवेष्टनम्[೭]
- जटायां क्रमयोः प्रातिशाख्यलक्षणलक्ष्यता
- व्युत्क्रमे सा मता नैव तत्र व्याकरणं मतम् ८
- षत्वणत्वे दत्वगत्वे ह्रस्वतां दीर्घतां तथा
- विसृज्य संहिताधर्मान् व्युत्क्रमे पदवत् पठेत् ९
- संहितागत ओकारः पदमौकारतां व्रजेत्
- क्वचित् स व्युत्क्रमे वाच्य औत्त्वेनैव जटा भवेत्[೧೦]
- क्रमेऽवसानस्यान्त्यत्वादाद्यस्य व्युत्क्रमेन्त्यतः

- तयोरावर्तनं युक्तं न मध्ये त्रिक्रमादिके[1]
- क्रमाणां त्रिक्रमादीनां व्युत्क्रमे मध्यमं पदम्
- अप्यनावर्तितं धर्मं पदस्य प्रतिपद्यते[2]
- मध्यं पदं बहिष्कृत्वा पूर्वोत्तरपदैक्यतः
- विहितं पदमेकं यत्तद्विलोमजटाविधौ[3]
- प्रवर्तितपदात् पूर्वं भवं त्यक्त्वा बहिष्कृतं
- ब्रूयादथ शुनःशेपमेकीभावयुतं पदम्[4]
- ओदन्तानां निपातानां विलोमेऽस्ति प्रगृह्यता
- ओदन्तसंबोधनानां व्युत्क्रमे न प्रगृह्यता[5]
- ईकारान्तास्त्र्यक्षराश्चेवान्ता नैव प्रगृह्यकाः
- ईदूदेदोदन्तशब्दा इत्यन्तास्त्र्यक्षरा अपि १६

- प्रगृह्या एव जायन्ते संहितासंध्यभाविनः
- ईदूदेतो द्विवचना ओकारास्तु तथा नहि १७
- उः प्रगृह्यत्वमेत्येष मदनादिर्वतां स्वरे १८
- उकारः प्राक्तनोकारेणैक्यादेव नपूर्वकः
- व्युत्क्रमे नु उ इत्यत्राप्येति वादेशमञ्जसा १९
- परेप्युकार ओकार आव औकारलोपिनः
- वकारो लुप्यतेन्यस्मिन् लुप्यते न स्वरेपरे २०
- त्र्यक्षरान्तप्रगृह्याणामुकारामन्त्रितस्य च
- विलोमे पदसन्धौ तु प्रगृह्यत्वं न विद्यते इति
- उकार ओकारभावं गतोपि स्यात् प्रगृह्यकः २१
- यत्राकारोवगृह्यत्वे दृश्यते व्युत्क्रमे तु सः
- इकारेणैक्यमापन्नस्तत्रैव पररूपवान् २२
- आद्यं पदद्वयं शुद्धमुत्तरं तु पदत्रयम्

- अधिकं वाथ सर्वं वा समयोर्धर्चमुच्यते २३
- तत्रादिमे पदद्वन्द्वे जटां कृत्वा जटीकृते
- द्वितीयं समयाद्यं च संयोज्योक्त्वा जटां ततः २४
- सर्वस्मिन्नुत्तरेर्धर्चे समये संहितां पठेत्
- पदत्रयादौ समये शुद्धस्याद्यपदद्वये २५
- संहितामवधीकृत्य ब्रूयाच्छुद्धं पदं यदि
- एकमेव तदा शुद्धावध्युक्त्वा संहितां ततः २६
- शुद्धमन्त्यमुपान्त्यं च समयस्यान्तिमं पदम्
- योजयित्वा जटामुक्त्वा पदं शुद्धं च वेष्टयेत् २७
- आद्यान्त्ये एव संशुद्धे यत्र तत्र पदे इमे
- समयस्यादिमान्त्याभ्यां संयोज्य कथयेज्जटाम् २८
- आद्यमध्ये एव शुद्धे पदे द्वे यत्र तत्र तु
- आद्ये तल्लग्नसमयस्याद्योपेते जटाविधिः

- समयस्योत्तरस्यादियुक्ते मध्ये जटाविधिः २९
- यत्र प्राक्समयस्तत्र शुद्धांशाद्यद्वयावधि
- संहितां संपठन्नेव विदध्याच्छुद्धयोर्जटाम् ३०
- यत्राद्यांशो भवेच्छुद्धः समयश्चोत्तरांशकः
- पूर्वांशान्त्ये तत्र पश्चात् समयाद्यपदेन च
- योजयित्वा जटां तत्र जटाविकृतिकोविदः ३१
- प्लुतिः श्रुता व्युत्क्रमेपि संहितायां पदे क्रमे
- जटायां स्वरिताः सप्त प्रवर्तन्ते विलोमके ३२
- तिरोविरामोथ तैरोव्यञ्जनः पादवृत्तकः
- जात्योभिनिहितः क्षैप्रः प्रश्लिष्टा इति ते स्मृताः ३३
- तिरोविराम उच्चैकाक्षरसर्गमुखो मतः
- प्र स्तुतं च प्र चेत्यादौ तिरःपूर्वो विरामकः ३४
- उपसर्गेतरोदात्तप्राक् तैरोव्यज्जनः स्मृतः

- स उक्तो व्युत्क्रमे हीळे पुरोहितमिति क्रमे ३५
- विवृत्तिः स्वरितः पादवृत्तनामाभिधीयते ३६
- जात्यः स्वारः स विज्ञेयोऽपूर्वो वा नीचपूर्वकः
- यो वान्तो वा यकारान्तः क्व यूथ्यस्तदुदाहृतिः ३७
- परनीचाकारगर्भावपूर्वौ नीचपूर्वकौ
- एदोतौ स्तोऽभिनिहितौ तेऽमा सोऽयमुदाहृतिः ३८
- उकारो वाथवेकारः पूर्वो वा नीचपूर्वकः
- उदात्तश्चानुदात्तेन दीर्घेणोत ह्रसीयसा
- योगाद्वो योऽथ तौ क्षैप्रौ न्यूषु न्वस्येत्युदाहृतिः ३९
- अपूर्वो नीचपूर्वो वोच्च इर्ह्रस्वो ह्रसीयसा
- इनायुक्प्रश्लिष्टतामाभीदं वीदमुदाहृतिः ४०
- चतुर्विधानां कम्पानां मध्ये यः कोपि वा भवेत्
- कम्पो वा तदभावो वानुक्रमे संक्रमे समः ४१

- सार्धद्विमात्रकालाप्तौ जात्यक्षैप्रावदीर्घकौ
- मात्राद्वयं पूर्वभागे स्यात् पश्चादर्धमात्रिका ४२
- दीर्घगौ क्षैप्रजात्यौ प्रश्लिष्टाभिनिहितौ तथा
- चतुर्मात्राकालवन्तोनुदात्तोदात्तनीचकाः ४३
- सार्धद्विमात्राकालाप्तो भाग आद्योनुदात्तकः
- मात्राकालो मध्य उच्चो नीचोन्त्यः सार्धमात्रकः ४४
- जात्यादीनां कम्पनं स्यादुदात्ते स्वरिते परे
- पूर्वं यतोभिनिहितादुदात्तं दृश्यते पदम्
- तत्र नीचोच्चनीचात्मा कम्पः कार्यो न सर्वथा ४५
- चतुर्विधाश्च स्वरिताः कम्पं प्राप्ता निमित्ततः
- अनुक्रमादिरूपायां जटायां वाच्यतां गताः ४६
- ब्रूयात् क्रमविपर्यासादर्धर्चस्यादितोन्ततः
- अन्तं चादिं नयेदेवं क्रममालेति गीयते ४७

- पदोत्तरां शिखामेव जटामार्याः प्रचक्षते ४८
- क्रमाद्वित्रिचतुःपञ्चपदक्रममुदाहरेत्
- पृथक्पृथग्विपर्यस्य रेखामाहुः पुनः क्रमात् ४९
- ब्रूयादादेः क्रमं सम्यगन्तादुत्तारयेदिति
- वर्गे वा ऋचि वा य स्यात्पठितः स ध्वजः स्मृतः ५०
- क्रममुक्त्वा विपर्यस्य पुनश्च क्रममुत्तरम्
- अर्धर्चादेवमुक्तोक्तैः क्रमदण्डोभिधीयते ५१
- पादशोर्धर्चशो वापि सहोक्त्या दण्डवद्रथः ५२
- शिखामुक्त्वा विपर्यस्य पुनस्त्रिपदमुच्चरेत्
- शिखाजटा घनः प्रोक्त इत्यष्टौ विकृतीः पठेत् ५३
- इत्यष्टौविकृतीनां स्वरूपकथनं मया विरचितं यत्
- तेन विष्णुर्जिष्णुः प्रीतो भवतात् भवानि परशुः ५४
    - इति श्रीमधुसूदनविरचिताष्टौविकृतिविवरणं समाप्तम् ।

## 9) यजुर्वेदीय लक्षण शास्त्र विषयसूचिका

## तैत्तिरीय प्रातिशाख्य विषयाः


प्रथमोऽध्यायः (संज्ञा परिभाषाः) 13

मङ्गळाचरणम् 13

समानाक्षर संज्ञा विधानम् 13

सवर्णसंज्ञा विधानम् 13

स्वरसंज्ञा विधानम् 13

व्यञ्जन संज्ञा विधानम् 13

स्पर्श संज्ञा विधानम् 14

अन्तस्था संज्ञा विधानम् 14

ऊष्म संज्ञा विधानम् 14

वर्गसंज्ञा विधानम्	14

प्रथमाऽऽदि संज्ञा विधानम्	14

अघोष संज्ञा विधानम्14

घोष संज्ञा विधानम्	14

उपसर्ग संज्ञा विधानम्	14

वर्णाख्या विधानम्	14

व्यञ्जनाऽऽख्या विधानम्	15

रेफाऽऽख्या विधानम् 15

परिभाषाः	15

ह्रस्व दीर्घ प्लुताः	15

उदात्ताऽऽदि स्वराः	16

इङ्गाऽऽदि लक्षणम् 16

अपृक्त लक्षणम् 17

परिभाषाः 17

द्वितीयोऽध्यायः (वर्णस्थान प्रयत्न विवेकः) 17

वर्णोत्पत्ति प्रकारः 17

अकाराऽऽदि स्वरोच्चारण क्रमः 18

अनुनासिक स्वरूप निर्वचनम् 19

स्वर व्यञ्जन भेद् निरूपणम् 19

स्पर्शोच्चारण निरूपणम् 19

अन्तस्थोच्चारण प्रकारः 20

ऊष्मोच्चारण प्रकारः 20

विसर्जनीयानुनासिकाऽऽदि स्थान निरूपणम् 20

तृतीयोऽध्यायः (दीर्घाणां पदकाले ह्रस्वविधानम्) 21

पदादि पदान्त दीर्घ अकारस्य विभागसमये ह्रस्वत्व विधानम् 21

ईकारस्य, ऊकारस्य च ह्रस्वत्व विधानम् 21

पदान्त दीर्घ आकारस्य ह्रस्व विधानम् 21

पदान्त ईकार, ऊकारयोः ह्रस्व विधानम् 22

पदाऽऽदि दीर्घ आकारस्य ह्रस्वविधिः 22

चतुर्थोऽध्यायः (प्रग्रह प्रकरणम्) 22

प्रग्रह निरूपणम् 22

अथ पञ्चमोऽध्यायः (संहिताकाले वर्णाऽऽगम विधिः) 26

अस्य शास्त्रस्य संहिताविषयत्वम् 26

प्रकृति स्वरूप निर्वचनम्   26

विधिप्रवृत्ति प्रकारः   26

शकाराऽगम विधिः   26

दकाराऽगम विधिः   26

अरादेश विधिः   27

रेफ षाऽदेश विधिः   27

लोप विधिः   27

पदान्त नकार तकारयो श्शाऽद्यादेश विधिः   27

मकारस्य सस्थान नासिक विधिः   28

ङणनानां ककार तकाराऽगम विधिः   28

शकारस्य छकाराऽदेशः   28

हकारस्य स्थाने चतुर्थाऽऽदेश विधिः 28

अथ षष्ठोऽध्यायः (षत्व - सत्व विधिः) 29

सकार विसर्जनीययोः षाऽऽदेशविधिः 29

षत्वाऽऽपवादः 29

पदान्त प्राकृत नकारस्य साऽऽदेशविधिः 30

सप्तमोऽध्यायः (णत्व विधिः, तथयोः टठभावश्च) 30

नकारस्य णत्व विधिः 30

तथयोः टठाऽऽदेश विधिः 31

नकारस्य णत्वाप्राप्तिः 31

अष्टमोऽध्यायः (वर्गीयोत्तम, रेफाऽऽदि विधयः) 31

उत्तमपर प्रथमस्य उत्तमाऽऽदेशः 31

विसर्जनीयस्य रेफाऽऽदेश विधिः 31

विसर्जनीय लोपः 32

विसर्जनीयस्य सत्व षत्व विधिः 33

षत्व सत्व निषेधः 33

नवमोऽध्यायः (विसर्जनीयस्य लोपोष्माऽऽदि विधयः) 33

विसर्जनीयस्य लोपाऽऽदेशविधिः 33

अय्, अव् आदेशविधिः 34

अपृक्तोकारस्य प्रकृत्या स्थानम्, वकाराऽऽगमश्च 34

ङन कारयो र्द्वित्वम् 34

ईकारोकारपूर्व नकारस्य रेफा, याऽऽद्येशः 35

दशमोऽध्यायः (एकादेश सन्धयः, प्रकृतिभावादय) 35

स्वर सन्धयः 35

सन्धिनिमित्तोदात्ताऽद्याद्येशाः 36

प्रकृतिभावः 36

अकारस्य लोपः (पररूपाऽदेशः) 36

यणादेश सन्धिः, स्वरभेदः 36

ईकारस्य प्रकृतिभावः 36

पदान्त यवकारयो र्लोपः 37

प्लुत प्रगृग्ययोः प्रकृतिभावः 37

एकादशोऽध्यायः (अकारस्य लोपालोपौ) 37

अकार लोप विधिः 37

अकारस्य लोपाभावः 37

अलोपस्य विषये मतान्तरम् 39

द्वादशोध्यायः (अकारलोपाभावस्य अपवादः, स्वरिताऽऽदेशः) 39

अकारलोपाभावस्य अपवादाः 39

अकारलोपनिमित्ते उदात्तादि स्वरभेदः 39

त्रयोदशोऽध्यायः (मकार लोपः, समानपदीय नकारस्य णत्वं, डत्वञ्च)

40

मकारस्य लोपालोपौ 40

नस्य णत्वविधिः, प्राकृत णकारश्च 40

ळस्य डाऽऽदेशः 41

चतुर्दशोऽध्यायः (द्वित्व प्रकरणम्, पूर्ववर्णाऽऽगमाः, स्वरादेशः) 41

व्यञ्जनस्य द्वित्व विधिः 41

अभिनिधानाद्यागम विधिः 42

ऊष्मवर्णस्य सवर्गीय द्वितीयाऽऽदेशः 42

पूर्वोक्त विधौ मतभेदः 42

वर्णागमानामपवादः 42

स्वरिताद्यादेशाः 43

पञ्चदशोऽध्यायः (अनुनासिक - अनुस्वारागमः) 43

अनुस्वार विधिः 43

स्त्रादिषु विशेष विधिः 44

समानाक्षरेषु अनुनासिक विधिः 44

एकयम विधिः 44

षोडशोऽध्यायः (पदमध्ये अनुस्वाराऽऽगमः) 44

पदमध्यवर्त्यूष्मभ्यः पूर्वमनुस्वाराऽऽगमः 44

सप्तदशोऽध्यायः (वर्णोच्चारणे तीव्रतरत्वादि प्रयत्नाः) 46

तीव्रतरत्वाऽऽदि भेदः 46

तीव्रतरोच्चारणे व्यञ्जनकालाधिक्यम् 47

दृढप्रयत्नतर विधिः 47

उच्चारण विधानम् 47

अथ अष्टादशोऽध्यायः (प्रणवोच्चारण विधानम्) 47

प्रणवोच्चारण प्रकाराः 47

एकोनविंशोऽध्यायः(अनुदात्तविशेषस्य विक्रमसंज्ञा, स्वरित परत्वे कम्पविधिश्च) 48

विक्रम स्वरूपम् 48

कम्पविधिः 48

विंशोऽध्यायः (स्वरित प्रकरणम्) 48

क्षैप्र स्वरितम् 48

नित्य स्वरितम् 48

प्रातिहत स्वरितम् 48

अभिनिहत स्वरितम् 49

प्रश्लिष्ट स्वरितम् 49

पादवृत्त स्वरितम् 49

तैरोव्यञ्जन स्वरितम् 49

स्वरितोच्चारण प्रयत्नाः 49

एकविꣳशोऽध्यायः (स्वराङ्गभावः) 49

अङ्गसंहिताऽऽदि कार्य निरूपणम् 49

प्रचय स्वरूप निरूपणम् 50

यम नासिक्य स्वरभक्ति स्वरूपम् 50

द्वाविंशोऽध्यायः (पारिभाषिक पदार्थनिर्णयः, स्वरविचारः, गुरुलघु संज्ञा विचारः) 50

वर्णान्यत्व निर्वचनम् 51

शास्त्र प्रयुक्त पारिभाषिक शब्दविवरणम् 51

स्वर शब्दोत्पादन प्रकारः 51

मन्द्राऽऽदि स्थान निरूपणम् 51

विराम स्वरूप कथनम् 51

गुरु लघु स्वरूपम् 52

अथ त्रयोविंशोऽध्यायः (वर्णवाक्योत्पत्ति हेतवः) 52

वर्णोत्पत्ति कथनम् 52

सप्त वाचस्स्थानानि (उपांशु, ध्वान, उपब्दिमदादि) 52

क्रुष्टाऽऽदि स्वर निरूपणम्  53

आह्वारक स्वरः (ह्वा) 53

चतुर्विंशोऽध्यायः (संहिता चतुष्टयम्, ज्ञान प्रशंसा)  54

संहिता चतुष्टय निर्वचनम्  54

वेदाध्येतृ विज्ञेय विषय प्रकथनम्  54

## व्यासशिक्षा विषयाः

1. संज्ञाप्रकरणम्  56

2. प्रग्रहप्रकरणम्  58

3.परिभाषाप्रकरणम्  60

3. दीर्घप्रकरणम्  61

5. आगम प्रकरणम्  63

6. लोपप्रकरणम्  64

7. वैकृत प्रकरणम्	64

8. षत्वप्रकरणम्	65

9. णत्वप्रकरणम्	66

10. रेफप्रकरणम्	67

11. विसर्जनीयसन्धि प्रकरणम्	67

12. यत्वप्रकरणम्	68

13. अच् सन्धिप्रकरणम्	69

14. अथ अनैक्यप्रकरणम्	70

15. ऐक्य प्रकरणम्	71

16. स्वरधर्म स्वरूप प्रकरणम्	72

17. स्वरसन्धिप्रकरणम्	72

18. हस्तस्वर विन्यास प्रकरणम्    74

19. द्वित्वप्रकरणम्    75

20. पूर्वाऽगमप्रकरणम्    75

21. द्वित्वनिषेध प्रकरणम्    76

22. अङ्गसंहिता प्रकरणम्    77

23. स्वरभक्तिप्रकरणम्    77

24. स्थान करण प्रयत्न प्रकरणम्    78

25. प्लुत प्रकरणम्    79

25. ओष्ठ्य प्रकरणम् 80

27. काल निर्णय प्रकरणम्  81

28. उच्चारण फल प्रकरणम् 83

## 10) तैत्तिरीय प्रातिशाख्यम्

- प्रथमोऽध्यायः (संज्ञा परिभाषाः)
- मङ्गळाचरणम्
  - अथ वर्ण समाम्नायः।
- समानाक्षर संज्ञा विधानम्
  - अथ नवाऽऽदित स्समानाक्षराणि।
- सवर्णसंज्ञा विधानम्
  - द्वे द्वे सवर्णे ह्रस्व दीर्घे।
  - न प्लुत पूर्वम्।
- स्वरसंज्ञा विधानम्
  - षोडशाऽऽदित स्स्वराः।
- व्यञ्जन संज्ञा विधानम्
  - शेषो व्यञ्जनानि।

- स्पर्श संज्ञा विधानम्
  - आद्याः पञ्चविंशति स्स्पर्शाः।
- अन्तस्था संज्ञा विधानम्
  - परा श्चतस्त्रोऽन्तस्थाः।
- ऊष्म संज्ञा विधानम्
  - परे षडूष्माणः।
- वर्गसंज्ञा विधानम्
  - स्पर्शाना मानुपूर्व्येण पञ्च पञ्च वर्गाः।
- प्रथमाऽऽदि संज्ञा विधानम्
  - प्रथम द्वितीय तृतीय चतुर्थोत्तमाः।
- अघोष संज्ञा विधानम्
  - ऊष्म विसर्जनीय प्रथम द्वितीया अघोषाः।
  - न हकारः।
- घोष संज्ञा विधानम्
  - व्यञ्जन शेषो घोषवान्।

- उपसर्ग संज्ञा विधानम्
    - आप्रावोपाभ्यधि प्रति परि विनीत्युपसर्गाः।
- वर्णाख्या विधानम्
    - वर्णः कारोत्तरो वर्णाऽऽख्या।
- व्यञ्जनाऽऽख्या विधानम्
    - अकार व्यवेतो व्यञ्जनानाम्।
    - न विसर्जनीय जिह्वामूलीयोपध्मानीयानुस्वार नासिक्यानाम्।
- रेफाऽऽख्या विधानम्
    - एफस्तु रस्य।
    - ह्रस्वो वर्णोत्तर स्त्रयाणाम्।
    - अकारो व्यञ्जनानाम्।
- परिभाषाः
    - ग्रहणस्य च।
    - अ॥कार आगम विकार लोपिनाम्।
    - ग्रहणं वा।

- आसन्न९ सन्देहे।
- अनेकस्यापि।
- प्रथमो वर्गोत्तरो वर्गाऽख्या।
- अंविकारस्य।
- पूर्व इति पूर्वः।
- पर इत्युत्तरः।

- ह्रस्व दीर्घ प्लुताः
  - ऋकारल्कारौ ह्रस्वौ।
  - अकारश्च।
  - तेन च समानकालस्वरः।
  - अनुस्वारश्च।
  - द्विस्तावा न्दीर्घः।
  - त्रिः प्लुतः।
  - ह्रस्वार्धकालं व्यञ्जनम्।
- उदात्ताऽदि स्वराः

- उच्चै रुदात्तः।
- नीचै रनुदात्तः।
- समाहार स्स्वरितः।
- तस्याऽऽदि रुच्चैस्तरा मुदात्ता दनन्तरे यावदर्धꣳ ह्रस्वस्य।
- उदात्त समश्शेषः।
- सव्यञ्जनोऽपि।
- अनन्तरो वा नीचैस्तराम्।
- अनुदात्त समो वा।
- आदि रस्योदात्त सम श्शेषोऽनुदात्तसम इत्याचार्याः।
- सर्वप्रवण इत्येके।

## इङ्ग्याऽऽदि लक्षणम्

- नाना पदव दिङ्ग्य मसङ्ख्याने।
- तस्य पूर्वपद मवग्रहः।
- पद ग्रहणेषु पदं गम्येत।
- अपि विकृतम्।

- अप्यकाराऽऽदि।
- अन्काराऽऽदि च।

- अपृक्त लक्षणम्
  - एक वर्णः पद मपृक्तः।
  - आद्यन्तवच्च।
- परिभाषाः
  - वर्णस्य विकार लोपौ।
  - विनाशो लोपः।
  - अन्वादेशोऽन्त्यस्य।
  - उपबन्धस्तु देशाय नित्यम्।
  - नाना पदीयञ्च निमित्तं प्रग्रह स्त्रादिषु।
  - यथोक्तं पुनरुक्तं त्रिपद् प्रभृति त्रिपद् प्रभृति।
- द्वितीयोऽध्यायः (वर्णस्थान प्रयत्न विवेकः)
- वर्णोत्पत्ति प्रकारः
- 2.1 अथ शब्दोत्पत्तिः।

- 2.2 वायु शरीर समीरणात् कण्ठोरसो स्सन्धाने।
- 2.3 तस्य प्रातिश्रुत्कानि भवन्त्युरः कण्ठश्शिरो मुखं नासिके इति।
- 2.4 संवृते कण्ठे नादः क्रियते।
- 2.5 विवृते श्वासः।
- 2.6 मध्ये हकारः।
- 2.7 ता वर्णप्रकृतयः।
- 2.8 नादोऽनुप्रदानङ्ग् स्वरघोषवत्सु।
- 2.9 हकारो हचतुर्थेषु।
- 2.10 अघोषेषु श्वासः।
- 2.11 भूयान् प्रथमेभ्योऽन्येषु।
- अकाराऽऽदि स्वरोच्चारण क्रमः
- 2.12 अवर्णे नात्युपसꣳहृत मोष्ठहनु नातिव्यस्तम्।
- 2.13 ओकारे च।
- 2.14 ओष्ठौ तूपसꣳहृततरौ।

- 2.15 ईषत्प्रकृष्टा वेकारे।
- 2.16 उपसंहृततरे हनू।
- 2.17 जिह्वामध्यान्ताभ्यां चोत्तरा ञभ्यान् स्पर्शयति।
- 2.18 उपसंहृततरे च जिह्वाग्र मृकारर्कारल्कारेषु बर्स्वैषूपसंहरति।
- 2.19 एकेषा मनुस्वार स्वरभक्त्योश्च।
- 2.20 अनादेशे प्रण्यस्ता जिह्वा।
- 2.21 अकारव दोष्ठौ।
- 2.22 तालौ जिह्वामध्य मिवर्णे।
- 2.23 एकारे च।
- 2.24 ओष्ठोपसंहार उवर्णे।
- 2.25 एकान्तरस्तु सर्वत्र प्रकृतात्।
- 2.26 अकारार्ध मैकारौकारयो रादिः।
- 2.27 संवृत करणतर मेकेषाम्।
- 2.28 इकारोऽध्यर्धः पूर्वस्य शेषः।

- 2.29 उकार स्तूत्तरस्य।
- अनुनासिक स्वरूप निर्वचनम्
- 2.30 अनुस्वारोत्तमा अनुनासिकाः।

- स्वर व्यञ्जन भेद् निरूपणम्
- 2.31 स्वराणां यत्रोपसꣳहार स्तत् स्थानम्।
- 2.32 यदुपसꣳहरति तत्करणम्।
- 2.33 अन्येषान्तु यत्र स्पर्शनं तत् स्थानम्।
- 2.34 येन स्पर्शयति तत्करणम्।
- स्पर्शोच्चारण निरूपणम्
- 2.35 हनुमूले जिह्वामूलेन कवर्गे स्पर्शयति।
- 2.36 तालौ जिह्वा मध्येन चवर्गे।
- 2.37 जिह्वाऽग्रेण प्रतिवेष्ठ्य मूर्धनि टवर्गे।
- 2.38 जिह्वाऽग्रेण तवर्गे दन्तमूलेषु।

- 2.39 ओष्ठाभ्यां पवर्गे।
- अन्तस्थोच्चारण प्रकारः
- 2.40 तालौ जिह्वामध्यान्ताभ्यां यकारे।
- 2.41 रेफे जिह्वाग्र मध्येन प्रत्यग्दन्त मूलेभ्यः।
- 2.42 दन्तमूलेषु च लकारे।
- 2.43 ओष्ठान्ताभ्यां दन्तै र्वकारे।
- ऊष्मोच्चारण प्रकारः
- 2.44 स्वर्शस्थानेषूष्माण आनुपूर्व्येण।
- 2.45 करण मध्यन्तु विवृतम्।
- 2.46 कण्ठस्थानौ हकार विसर्जनीयौ।
- 2.47 उदयस्वरादि सस्थानो हकार एकेषाम्।
- विसर्जनीयानुनासिकाऽऽदि स्थान निरूपणम्
- 2.48 पूर्वान्त सस्थानो विसर्जनीयः।
- 2.49 नासिक्या नासिका स्थानाः।
- 2.50 मुखनासिक्या वा।

- 2.51 वर्गवच्चैषु।
- 2.52 नासिका विवरणा दानुनासिक्यं नासिका विवरणा दानुनासिक्यम्।
- तृतीयोऽध्यायः (दीर्घाणां पदकाले ह्रस्वविधानम्)
- पदादि पदान्त दीर्घ अकारस्य विभागसमये ह्रस्वत्व विधानम्
- 3.1 अथाऽऽदा वुत्तरे विभागे ह्रस्वं व्यञ्जनपरः।
- 3.2 देवा शीका सुम्ना श्वर्ता वयुना हृदया घोक्था शुद्धा।
- 3.3 इन्द्रा वद्धन्वान् परः।
- 3.4 चित्रा वपरः।
- 3.5 प्रस्थेन्द्रिया द्रविणा विश्वदेव्या दीर्घा वीर्या विश्वा वाता त्वा भङ्गुरा कर्णका वृष्णिया सुगोपर्क्सामाऽद्या सत्रा वर्षा पुष्पा मेघा प्रा स्वा।
- 3.6 लोक एवेष्टा।
- ईकारस्य, ऊकारस्य च ह्रस्वत्व विधानम्

- 3.7 शक्ती रथी त्विषी वाशी रात्र्योषध्याहुती व्याहृती स्वाहाकृती ह्रादुनी शची चिती श्रोणी पृष्टी पूत्यभी चर्षणी पर्यधी पारी शत्रू विषू वसू अनू हनू सू विभू इत्यवग्रहः।
- पदान्त दीर्घ आकारस्य ह्रस्व विधानम्
- 3.8 अवा सचस्वा नुदा मृडा वर्धा शिक्षा रक्षाऽद्या भवा भजा यत्रा चरा पिबा ना धामा धारया धर्षा घा वर्धया बोधाऽत्रा तत्रा मुञ्चाऽश्वस्या पृणस्वा हिष्ठा त्वन्तरा जनिष्वा युक्ष्वाऽच्छा।
- 3.9 अधा ऽग्नियाज्ये।
- 3.10 कुत्रा दक्षिणेना स्वेना हन्तना जगामा रुहेमा विद्मध्यामा चकृमा क्षामा स्तरीमा भरेमा वर्षयथेरयथा ऽऽरिथा पाथाऽथा सिञ्चथा जनयथा जयतोक्षता ऽवता याता शृणुता कृणुता बिभृता।
- 3.11 भरता याज्यासु।
- 3.12 अत्ता भवता ऽनदता तरता तपता जुहुता वोचता ऽमुञ्चता चृता घुष्या जनया वर्तया सादया पारया दीया हरा भराऽपा ससादा सृजा तिष्ठा येना।

- पदान्त ईकार, ऊकारयोः ह्रस्व विधानम्
- 3.13 उश्मसी क्रयी कृधी श्रुधी यदी सू तू नू मिथू मक्षू ऊ।
- पदाऽऽदि दीर्घ आकारस्य ह्रस्वविधिः
- 3.14 व्युत्पूर्व आननुदात्तोऽनूष्मव त्यनूष्मवति।
- चतुर्थोऽध्यायः (प्रग्रह प्रकरणम्)
- प्रग्रह निरूपणम्
- 4.1 अथ प्रग्रहाः।
- 4.2 नावग्रहः।
- 4.3 अन्तः।
- 4.4 इति परोऽपि।
- 4.4 ऊकारः।
- 4.5 ओकारोऽसाꣳहितो ऽकार व्यञ्जनपरः।
- 4.6 समहदथ पित्पूर्वश्च।
- 4.7 अथैकारेकारौ।
- 4.8 अस्मे।

- 4.9 त्वे इत्यनिङ्ख्यान्तः।
- 4.10 देवते उभे भागधे ऊर्ध्वे विशाखे शृङ्गे एने मेध्ये तृण्णे तृद्ये कनीनिके पार्श्वे शिवे चोत्तमे एवोत्तरे शिप्रे रथन्तरे वत्सरस्यरूपे विरूपे विषुरूपे सदोहविर्धाने अधिषवणे अहोरात्रे धृतव्रते स्तुतशस्त्रे ऋक्सामे अक्ते अर्पिते रैवते पूर्ते प्रत्ते विधृते अनृते अच्छिद्रे बहुले पूर्वजे कृणुध्वꣳ सदने।
- 4.11 अमी चक्षुषी कार्ष्णी देवताफल्गुनी मुष्टी धी नाभी वपाश्रपणी अहनी जन्मनी सुम्निनी सामनी वैष्णवी ऐक्षवी दर्वी द्यावापृथिवी।
- 4.12 पूर्वश्च।
- 4.13 न रुन्धे नित्यम्।
- 4.14 हरी सहुरी सहूती कल्पयन्ती आपृषती आहुती।
- 4.15 पूर्वश्च।
- 4.16 वाससी तपसी रोदसी।
- 4.17 परश्च।

- 4.18 व्यचस्वती भरिष्यन्ती नꣳपृथिवी।
- 4.19 ये अप्रथेता, मुर्वी ते अस्य, यङ्क्न्दसी, छन्दस्वती, ते आचरन्ती अन्तरैतासु।
- 4.20 नोपस्थे।
- 4.21 इरावती प्रभृत्या दाधार।
- 4.22 पूर्वजे प्रभृत्याऽयम्।
- 4.23 इमे गर्भ मुपैव रसेन परः।
- 4.24 क्रूर माप स्सजू ब्र्ह्मजैतेषु च।
- 4.25 पूर्णे च।
- 4.26 दृढे।
- 4.27 घ्नी चक्रे पपरे।
- 4.28 न्वती।
- 4.29 पपरो न।
- 4.30 समीची।
- 4.31 न परो न।

- 4.32 ची यत्नपरः।
- 4.33 आन्महो।
- 4.34 पती श्रुतिः।
- 4.35 ग्नी।
- 4.36 न हिपरः।
- 4.37 वीड्वारौ कृष्ण श्चरावो यदा परः।
- 4.38 न झे अह्ने नित्यम्।
- 4.39 आकार एकार पूर्वस्तु बहुस्वरस्य तेथे।
- 4.40 न शार्याते।
- 4.41 ते मा पातन्नम एन मभि वायु र्गर्भे मुपाह स्तु परः।
- 4.42 अनुदात्तो न नित्यम्।
- 4.43 एते तनुवो वै समेवहि यज्ञपदिष्टक्परः।
- 4.44 परश्च द्वयोः।
- 4.45 स्थ॰ परः।
- 4.46 परश्चोभयोः।

- 4.47 सोमाय स्वैतस्मिन्।
- 4.48 द्वे।
- 4.49 परश्च।
- 4.50 एकव्यवेतोऽपि।
- 4.51 गमयतो भवतोऽनूकारा त्परं तनू यदकरो त्कुर्या दिष्टि ष्वब्रूतां प्रवर्ताꣳस्ताꣳ स्तभ्नीतां वाचयति बिभृत स्ताग्निं गायत्रं ताभ्या मेवोभाभ्या मवान्तरं पर आ षष्ठात्।
- 4.52 न ग्रामी वर्चसी मिथुनी मासे लोके धत्ते।
- 4.53 अते समान पदे नित्यम्।
- 4.54 अवे चावे च।

- अथ पञ्चमोऽध्यायः (संहिताकाले वर्णागम विधिः)
- अस्य शास्त्रस्य संहिताविषयत्वम्
- 5.1 अथ सꣳहिताया मेकप्राणभावे।

- प्रकृति स्वरूप निर्वचनम्
- 5.2 यथायुक्ता द्विधि स्सा प्रकृतिः।
- विधिप्रवृत्ति प्रकारः
- 5.3 तत्र पूर्वं पूर्वं प्रथमम्।
- शकाराऽगम विधिः
- 5.4 त्रपु मिथु पूर्व श्शाकारश्च परः।
- 5.5 सुपूर्वश्च चन्द्रपरः।
- 5.6 संपूर्व स्सकारः कुरु परः।
- 5.7 अकुर्व च प्रत्ययात् परः।
- दकाराऽगम विधिः
- 5.8 नीचापूर्वो दकार उच्चा परः।

- अरादेश विधिः
- 5.9 असंपूर्वो ऽरमृकारः।

- रेफ षाऽदेश विधिः
- 5.10 अवग्रह आशी र्धू स्सुवरिति रेफं पर स्सकार ष्षकारम्।
- लोप विधिः
- 5.11 अथ लोपः।
- 5.12 ईम्पूर्वो मकारः।
- 5.13 तुनु पूर्व उदात्तयो र्वकारः।
- 5.14 उत्पूर्व स्सकारो व्यञ्जनपरः।
- 5.15 एष सस्य इति च।
- 5.16 नासः।
- 5.17 इद्विदग्न इमान्न एनौषधीः परस्सः।
- 5.18 अवग्रह इत्येकम्।
- 5.19 तिष्ठन्त्येकया सपूर्वः।
- पदान्त नकार तकारयो श्शाद्यादेश विधिः
- 5.20 नकार श्शकारश्च परः।

- 5.21 नाऽऽय न्नैरय न्नार्ध्रुव न्ननङ्वा न्घृणीवान् वारुणा नेवास्मिन्न्।
- 5.22 तकार श्चकारं९ शचछ परः।
- 5.23 जपरो जकारम्।
- 5.24 नकार एतेषु ञकारम्।
- 5.25 लपरौ लकारम्।
- 5.26 नकारो ऽनुनासिकम्।
- मकारस्य सस्थान नासिक विधिः
- 5.27 मकार स्स्पर्शपर स्तस्य सस्थान मनुनासिकम्।
- 5.28 अन्तस्थापरश्च सवर्ण मनुनासिकम्।
- 5.29 न रेफ परः।
- 5.30 यवकार पर श्चैकेषा माचार्याणाम्।
- 5.31 उत्तम लभावा त्पूर्वोऽनुनासिक इत्यात्रेयः।
- ङणनानां ककार तकाराऽऽगम विधिः
- 5.32 ङपूर्वः ककार स्सषकारपरः।

- 5.33 टनकार पूर्वश्च तकारः।
- शकारस्य छकाराऽऽदेशः
- 5.34 स्पर्श पूर्व श्शकार श्छकारम्।
- 5.35 न मकार पूर्वः।
- 5.36 पकार पूर्वश्च वाल्मीकेः।
- 5.37 व्यञ्जनपरः पौष्करसादे र्न पूर्वश्च ञकारम्।
- हकारस्य स्थाने चतुर्थाऽऽदेश विधिः
- 5.38 प्रथम पूर्वो हकार श्चतुर्थ न्तस्य सस्थानं प्लाक्षि कौण्डिन्य गौतम पौष्करसादीनाम्।
- 5.39 अविकृत एकेषाम्।
- 5.40 चतुर्थोऽन्तरे शैत्यायनाऽऽदीनाम्।
- 5.41 मीमांसकानाञ्च मीमांसकानाञ्च।
- अथ षष्ठोऽध्यायः (षत्व - सत्व विधिः)
- सकार विसर्जनीययोः षाऽऽदेशविधिः
- 6.1 अथ षकारं सकार विसर्जनीयौ।

- 6.2 स्वानासो दिव्यापो ह्ययमु कमू मो प्रो त्री महि
  द्यवि पद्यवग्रह पूर्वः।
- 6.3 असदामा सिञ्चञ्श्च।
- 6.4 उपसर्ग निष्पूर्वोऽनुदात्ते पदे।
- 6.5 रासस्सप्तेऽग्नि र्निर्विदु र्मीढुः पायुभि र्वै स्सुमति
  र्मोकि रीयु रायु राभि स्सधि र्नकि स्तकार परो नित्यम्।
- षत्वाऽऽपवादः
- 6.6 अथ न।
- 6.7 अवर्ण व्यञ्जन शकुनि पत्न्यृतु मृत्यु मलिम्लु
  बृहस्पति पूर्वः।
- 6.8 ऋकार रेफवति।
- 6.9 अवग्रहः।
- 6.10 सव स्थानम्।
- 6.11 न धि पूर्वे।

- 6.12 सन्तानेभ्य स्सप्ताभि स्सम्मिता॰ स्तना॰ सीतꣳ स्पश स्सक्सनि सनि स्सनी स्सभेय स्सत्वा सस्यायै।
- 6.13 नस्वर स्पर्धा स्तरीम साहस्र सारथि स्फुरन्ती स्तुब्योति रायु श्श्चतु॰ पूर्व स्स्तो।

- पदान्त प्राकृत नकारस्य साऽऽदेशविधिः
- 6.14 तर्हा॰ स्तस्मि न्लोका न्विद्वा॰ स्ता॰ स्त्रीन् युष्मा नूर्ध्वा नम्बका नृतू नश्म न्कृण्व न्पितृ नना न्कपाला॰ स्तिष्ठ न्नाद्युदात्ते नेमिर्देवा न्सवनेपशू॰ स्तकारपर स्सकारं प्राकृतो नित्ये नित्ये।।
- सप्तमोऽध्यायः (णत्व विधिः, तथयोः टठभावश्च)
- नकारस्य णत्व विधिः
- 7.1 अथ नकारो णकारम्।
- 7.2 षु षू कृधिसुव स्समिन्द्रास्थू र्युरु वाष्षट् त्रि ग्रामनिष्पूर्वः।
- 7.3 हन्या दुप्यमान श्च।

- 7.4 पारी परि परी प्रपूर्वः।
- 7.5 अवर्ण व्यवेतोऽपि।
- 7.6 वाहन उह्यमानो यान मयन् यवेन वञ्च।
- 7.7 प्रापूर्वश्च।
- 7.8 इन्द्रो यजुः पूर्व एनङ्केन।
- 7.9 नृश्रीपूर्वो मनाः।
- 7.10 अङ्गाना मोने गानि गाना ङ्ग्यानि यामेन।
- 7.11 रषः पूर्वो हवन्यह्नेऽहन्न्।
- 7.12 रुपूर्वो मयान्यनी।
- तथयोः टठाऽऽदेश विधिः
- 7.13 वाघाषपूर्व स्तष्टम्।
- 7.14 थश्च ठम्।
- नकारस्य णत्वाप्राप्तिः
- 7.15 न तकारपरः।
- 7.16 नह्यति नूनं नृत्य न्त्यन्योऽन्याभि रन्यान्यन्तश्चान्तश्च।

- अष्टमोऽध्यायः (वर्गीयोत्तम, रेफाऽऽदि विधयः)
- उत्तमपर प्रथमस्य उत्तमाऽऽदेशः
    - अथ प्रथमः।
    - उत्तमपर उत्तमꣳ सवर्गीयम्।
    - तृतीयꣳ स्वरघोषवत्परः।
    - ककुच्च मकारपरः।
- विसर्जनीयस्य रेफाऽऽदेश विधिः
    - अथ विसर्जनीयः।
    - रेफ मेतेषु।
    - न रेफपरः।
    - ह्वा रभा वार्ह्वा रबिभ रजीग रक रनन्त र्विव स्सुवꣳ पुन रहरहꣳ प्रात र्वस्त श्शमित स्सवित स्सनुत स्तनुत स्स्तोतर् होतꣳ पित र्मात र्यष्ट रेष्ट र्नेष्ट स्त्वष्टः।
    - क राव रनुदात्ते पदे।
    - अन्त रनाद्युदात्ते।

○ आवृत्परः।

○ इति परोऽपि।

○ अहा रह स्सुव रनिङ्घ्रान्तः।

○ न भिर्भ्यां परः।

○ अ॒हश्च सर्वेषाम्।

- विसर्जनीय लोपः

○ अनवर्ण पूर्वस्तु रेफपरो लुप्यते।

○ दीर्घञ्च पूर्वः।

○ एष्टश्च।

○ नैकेषाम्।

○ द्वावुत्तमोत्तरीयस्य रेफम्।

○ साङ्कृत्यस्योकारम्।

○ उरव्यस्य सपूर्वः।

- विसर्जनीयस्य सत्व षत्व विधिः

○ कखपकारपर ष्षमकारपूर्व स्समवग्रहः।

- आवि र्निरिड श्शश्वतोऽपसो देवरिषो ऽॅहसो ऽतिदिवो विश्वतो ऽश्मन स्तमसः।
- कृधि पिन्व पथे परः।
- न सक्र घकारपरे।
- पत्नीवे पती पते पतये पति ष्पतिं परः।
- दिव स्सहस स्परिपुत् परः।
- रायस्पो परः।
- नमस्करो परः।
- वसु ष्ककार परः।

- षत्व सत्व निषेधः
    - नाध्वरं विश्वतो ऽन्तर्जातो विविशुꣳ परुꣳ पुनः।
    - धषवति।
    - परिवा प्रपरः।
    - न निर्णनिः।

- नवमोऽध्यायः (विसर्जनीयस्य लोपोष्मादि विधयः)

- विसर्जनीयस्य लोपाऽऽदेशविधिः
- 9.1 ऊष्मपरो ऽघोषपरो लुप्यते काण्डमायनस्य।
- 9.2 अघोषपर स्तस्य सस्थान मूष्माणम्।
- 9.3 न क्षपरः।
- 9.4 कपवर्गपर श्चाऽऽग्निवेश्य वाल्मीक्योः।
- 9.5 ऊष्मपर एवैकेषा माचार्याणाम्।
- 9.6 न प्लाक्षि प्लाक्षायणयोः।
- 9.7 ओकारम स्सर्वोऽकारपरः।
- 9.8 घोषवत्परश्च।
- 9.9 अवर्णपूर्वस्तु लुप्यते।
- 9.10 अथ स्वरपरो यकारम्।
- अय्, अव् आदेशविधिः
- 9.11 एकारोऽयम्।
- 9.12 ओकारोऽवम्।
- 9.13 नाकार परौ।

- 9.14 ऐकार आयम्।
- 9.15 औकार आवम्।
- अपृक्तोकारस्य प्रकृत्या स्थानम्, वकाराऽऽगमश्च
- 9.16 उकारोऽपृक्तः प्रकृत्या वकारोन्तरे।
- 9.17 न तत्तस्मात् सा॰हितः।
- ङ्न कारयो र्द्वित्वम्
- 9.18 ह्रस्व पूर्वो ङ्कारो द्विवर्णम्।
- 9.19 नकारश्च।
- ईकारोकारपूर्व नकारस्य रेफा, याऽऽद्येशः
- 9.20 अनितिपरो ग्रहोख्व्य याज्या पृष्ठ्य हिरण्यवर्णीये ष्वीकारोकार पूर्वो रेफ, माकारपूर्वश्च यकारम्।
- 9.21 मर्त्यानुदया नमृता न्दुर्या नसोमपूर्वस्सो अस्मा नविमान् गोमान् मधुमान् हविष्मान् हूतमा नार्षे चिकित्वा निडावान् कक्षीवान् बाणवान् हि पयस्वान् वशा न्विदत्रा नमित्रा नरा न्पोषा न्महा॰श्च।

- 9.22 इन्द्रोमे ऽकरूद्व मिहाप्ये त्वगन्मेडेन्या नायजिष्ठ आचर्त्वे कुर्वतादुह ददिति रग्रेधरा न्त्सपत्ना नलं परश्च।
- 9.23 न रश्मी ञ्छ्रपयान् यमा न्पतङ्गा न्त्समाना नर्चान् यजीयान्।
- 9.24 उदथापर श्चोदथा परश्च।
- दशमोऽध्यायः (एकादेश सन्धयः, प्रकृतिभावादय)
- स्वर सन्धयः
- 10.1 अथैक मुभे।
- 10.2 दीर्घ१ समानाक्षरे सवर्णपरे।
- 10.3 अथाऽवर्णपूर्वे।
- 10.4 इवर्ण पर एकारम्।
- 10.5 उवर्णपर ओकारम्।
- 10.6 एकारैकारपर ऐकारम्।
- 10.7 ओकारौकारपर औकारम्।
- 10.8 अर मृकार परे।

- 10.9 उपसर्ग पूर्व आरम्।
- सन्धिनिमित्तोदात्ताद्यादेशाः
- 10.10 उदात्त मुदात्तवति।
- 10.11 अनुनासिके अनुनासिकम्।
- 10.12 स्वरितानुदात्त सन्निपाते स्वरितम्।
- प्रकृतिभावः
- 10.13 न धा मा पाऽसिपरो बुध्निया ज्या ऽऽपूषाऽमिनन्ताऽऽर्षे।
- अकारस्य लोपः (पररूपाऽऽदेशः)
- 10.14 एष्ट रेतनेम न्नोघ्न न्नोष्ठे वःपरो लुप्यते।
- यणादेश सन्धिः, स्वरभेदः
- 10.15 इवर्णोकारौ यवकारौ।
- 10.16 उदात्तयोश्च परोऽनुदात्त स्स्वरितम्।
- 10.17 ऊभावे च।
- ईकारस्य प्रकृतिभावः
- 10.18 न श्येती मिथुनी।

- पदान्त यवकारयो र्लोपः
- 10.19 लुप्यते त्ववर्णपूर्वौ यवकारौ।
- 10.20 नोख्यस्य।
- 10.21 वकारस्तु साङ्कृत्यस्य।
- 10.22 उकारौकार परौ लुप्येते माचाकीयस्य।
- 10.23 लेशो वात्सप्रस्यैतयोः।
- प्लुत प्रगृग्ययोः प्रकृतिभावः
- 10.24 न प्लुत प्रग्रहौ।
- 10.25 परश्च परश्च।।
- एकादशोऽध्यायः (अकारस्य लोपालोपौ)
- अकार लोप विधिः
- 11.1 लुप्यते त्वकार एकार - ओकारपूर्वः।

- अकारस्य लोपाभावः

- 11.2 अथाऽलोपः।
- 11.3 धाता राति रुप वाजपेय जुष्ट श्येनायोख्य ध्रुवक्षिति रियमेव सायाऽग्नि मूर्धा रुद्रप्रथमोपोत्तम विकर्ष विहव्य हिरण्यवर्णीय याज्या महापृष्ठ्ये।
- 11.4 अꣳहसो ꣳहति रनिष्टृतोऽवन्त्वस्मा नवद्या दहनि च।
- 11.5 अनु घर्मास आपो मर्तो रथ स्त्वो दत्ते वातꣳ पूर्वः।
- 11.6 अभि वात्वपश्च।
- 11.7 अन्वगमच्च।
- 11.8 आपꣳ पूर्वोऽद्भि रपान्नपा दस्मान्।
- 11.9 राये स इन्द्रꣳ पूर्वश्चाकारपरे।
- 11.10 ते पूर्वो ऽद्यान्धोऽꣳशु रग्ने।
- 11.11 मे पूर्वश्च।
- 11.12 अस्याऽश्विना परा च।
- 11.13 नꣳ पूर्वो ऽसदग्नि रघान्तमो ऽभ्यस्मि न्नद्य पथि।
- 11.14 नमꣳ पूर्वोऽग्रे ऽश्वेभ्यो ऽग्रियाय।

- 11.15 आविन्न स्सोमꣳ पूर्वो ऽग्निपरः।
- 11.16 धीरासो ऽदब्धास एकादशास ऋषीणां पुत्र श्शार्याते ऽषाढꣳ पितारꣳ पृथिवी यज्ञ आसते ये गृह्णाम्यग्रे वा॰ एष जज्ञे सꣳस्फानो युवयोर्यꣳ पृष्ठे पतिर्वो गो शुष्मꣳ पुव स्समिद्ध ऋषभꣳ पाथो वचो वर्षिष्ठे जुषाणो यो रुद्रो वृष्णः पूर्वः।
- 11.17 अरति मस्य यज्ञस्या ऽतिद्रुतो ऽतिय न्त्यनृणो ऽविष्य न्ननमीवो ऽन्नेष्वर्चि रजीता नज्यानि मह्निया अम्बा ल्यर्वन्त मस्त्वकृणो दङ्गिरो ऽप्सुयो अस्कभाय दच्युतो ऽश्वसनि रस्थभि रशिश्रे दङ्गे ऽग्निय।
- 11.18 अध्वर स्वरपरे।
- अलोपस्य विषये मतान्तरम्
- 11.19 सपूर्वस्यार्ध सदृश मेकेषा मर्धसदृश मेकेषाम्।।
- द्वादशोध्यायः (अकारलोपाभावस्य अपवादः, स्वरिताऽऽदेशः)
- अकारलोपाभावस्य अपवादाः
- 12.1 अथ लोपः।

- 12.2 असि।
- 12.3 न गर्भ स्सन्नद्धो यमो भद्र॰ पूर्वः।
- 12.4 यवनह पर स्स्वरपरेषु।
- 12.5 जकार ग्न पर उदात्तः।
- 12.6 मो वचो दधान स्स्थे पूर्वश्च।
- 12.7 अभ्यावर्ति न्नपूप मपिदधा म्यद्यान्वदिति श्शर्मा ऽग्ने र्जिह्वा मग्नय॰ पप्रयो ऽस्माक मस्मे धत्ता ऽश्मा ऽश्वाश्रुति रश्यामा ऽमा ऽर्यम न्नस्मत्पाशा नस्मिन् यज्ञे ऽस्ता ऽव्यथमाना ऽभिद्रोह मधाय्यदोऽथो दुग्धा अरिष्टा अरथा अर्च न्त्यन्तरस्या मत्रस्था ऽन्नाया ङ्गिरस्व दकरम्।
- 12.8 गाहमानो जायमानो हेतयो मन्यमानो वनस्पतिभ्य॰ पते स्त्रिध स्तपस स्स्वधावो भामितोऽग्नय आयोऽध्वर्यो क्रतो पूर्वः।
- अकारलोपनिमित्ते उदात्तादि स्वरभेदः
- 12.9 तस्मि न्ननुदात्ते पूर्व उदात्त स्स्वरितम्।
- 12.10 उदात्ते चानुदात्त उदात्तम्।

- 12.11 स्वरितश्च सर्वत्र स्वरितश्च सर्वत्र।।
- त्रयोदशोऽध्यायः (मकार लोपः, समानपदीय नकारस्य णत्वं, डत्वञ्च)
- मकारस्य लोपालोपौ
- 13.1 अथ मकारलोपः।
- 13.2 रेफोष्म परः।
- 13.3 यवकार पर श्चैकेषा माचार्याणाम्।
- 13.4 न स॰सा मिति रापरः।
- नस्य णत्वविधिः, प्राकृत णकारश्च
- 13.5 अथ वर्णानाम्।
- 13.6 ऋकारर्कार रषपूर्वो नकारो णकार॰ समान पदे।
- 13.7 व्यवेतोऽपि।
- 13.8 हिरण्मयम्।
- 13.9 पाणि गण पुण्य कण्व काण गाण बाण वेणु गुण मणि प्रवादेषु पूर्वः।

- 13.10 पणि पणिं वीयमाण ऊण्योः।
- 13.11 टवर्ग परः।
- 13.12 चङ्कुण फणत् स्थूणौ हिणुया द्धिणोति कौणेयो ऽणिष्ठा उल्बण मुगणाश्रुति श्रुपुणीका वाणिजायाणव श्वाह्वार स्स्थाणु न्तूणवे वीणाया मश्लोणया पणेत वाणीः कल्याणी कुणपं वाणश्शात शोणाश्रुति र्धाणिका मेणी।
- 13.13 अवग्रहो वृषण् शीर्षण् ब्रह्मण्णक्षण् चर्मण् चर्षण्ण्।
- 13.14 ऋण्ण षण्ण ष्ण म्ण रावृण्ण चेति प्राकृताः।
- 13.15 न सुषुम्नो ऽग्नि युष्मानीतो ऽन्तो ऽलोपात् स्पर्शपरो व्यवायेषु शसचट तवर्गीयेषु।
- ळस्य डाऽऽदेशः
- 13.16 पृक्तस्वरा त्परो ळो डं पौष्करसादेः पौष्करसादेः।
- चतुर्दशोऽध्यायः (द्वित्व प्रकरणम्, पूर्ववर्णाऽऽगमाः, स्वरादेशः)
- व्यञ्जनस्य द्वित्व विधिः
- 14.1 स्वरपूर्वँ व्यञ्जन न्द्विवर्णँ व्यञ्जनपरम्।

- 14.2 लवकारपूर्व स्स्पर्शश्च पौष्करसादेः।
- 14.3 स्पर्॒श एवैकेषा माचार्याणाम्।
- 14.4 रेफात् परञ्च।
- 14.5 द्वितीय चतुर्थयोस्तु व्यञ्जनोत्तरयोꣳ पूर्वः।
- 14.6 रेफपूर्वयोश्च नित्यम्।
- 14.7 लकारपूर्वे च।
- 14.8 उपसर्ग पाथ एषोऽत्यातिधाम परम भूते पूर्वेषु छखिभुजेषु च।
- अभिनिधानाद्यागम विधिः
- 14.9 अघोषा दूष्मणः परः प्रथमोऽभिनिधान स्स्पर्॒शपरात् तस्य सस्थानः।
- 14.10 अघोषे प्लाक्षेः।
- ऊष्मवर्णस्य सवर्गीय द्वितीयाऽऽदेशः
- 14.11 उत्तमपरात्तु प्लाक्षायणस्य।
- 14.12 प्रथम ऊष्मपरो द्वितीयम्।

- पूर्वोक्त विधौ मतभेदः
- 14.13 बाडबीकारस्याऽसस्थान परः।
- वर्णागमानामपवादः
- 14.14 अथ न।
- 14.15 अवसाने र विसर्जनीय जिह्वामूलीयोपध्मानीयाः।
- 14.16 ऊष्मा स्वरपरः।
- 14.17 प्रथमपरश्च प्लाक्षि प्लाक्षायणयोः।
- 14.18 ऊष्माऽघोषो हारीतस्य।
- 14.19 रेफपरश्च हकारः।
- 14.20 टवर्गश्च तवर्गपरः।
- 14.21 लतवर्गौ यवकार परौ।
- 14.22 परश्च।
- 14.23 सवर्ण सवर्गीयपरः।
- 14.24 नानुत्तम उत्तमपरः।
- 14.25 अथैकेषा माचार्याणाम्।

- 14.26 लकारो हश वकारपरः।
- 14.27 स्पर्श स्स्पर्श परः।

- स्वरिताद्यादेशाः
- 14.28 पदान्तश्च व्यञ्जनपर॰ प्राकृतः।
- 14.29 उदात्तात्परोऽनुदात्त स्स्वरितम्।
- 14.30 व्यञ्जनान्तर्हितोऽपि।
- 14.31 नोदात्त स्स्वरितपरः।
- 14.32 नाग्निवेश्यायनस्य।
- 14.33 सर्वो नेत्येके सर्वो नेत्येके।
- पञ्चदशोऽध्यायः (अनुनासिक - अनुस्वारागमः)
- अनुस्वार विधिः
- 15.1 नकारस्य रेफोष्म यकारभावा ल्लुप्ते च मलोपाच्च पूर्वस्वरो ऽनुनासिकः।

- 15.2 नैकेषाम्।
- 15.3 ततस्त्वनुस्वारः।
- स्त्रादिषु विशेष विधिः
- 15.4 स्त्रादिषु चैकपद ऊष्मपरः।
- समानाक्षरेषु अनुनासिक विधिः
- 15.5 नान्तविकारात् पूर्वः।
- 15.6 अप्रग्रहा स्समानाक्षरा ण्यनुनासिका न्येकेषाम्।
- 15.7 पदञ्च प्लुत॰ शाङ्खायन काण्डमायनयोः।
- 15.8 अकारस्तु स॰हितायामपि।
- एकयम विधिः
- 15.9 सर्व मेकयमं पूर्वेषा॰ सर्वमेकयमं पूर्वेषाम्।।
- षोडशोऽध्यायः (पदमध्ये अनुस्वाराऽऽगमः)
- पदमध्यवर्त्यूष्मभ्यः पूर्वमनुस्वाराऽऽगमः
- 16.1 अथ सकार परः।
- 16.2 स्त्र शो ह पा श पदादय स्स्वरपरे।

- 16.3 विकृतेऽपि।
- 16.4 रापूर्वश्च।
- 16.5 शङ्स्ताऽनन्तोदात्ते।
- 16.6 अशा॒ऽसन्न्।
- 16.7 न शसनँ विशसनेन।
- 16.8 मा पदादि रनुदात्तः।
- 16.9 पुमीपूर्वश्च नित्यम्।
- 16.10 सकाय परश्च।
- 16.11 नावग्रह पूर्वः।
- 16.12 मासि मासु मासो मासामिति च।
- 16.13 हिपु जिगा जिघा च्छ॒ऽसिनेऽत॒ऽसय दाता॒ऽसी त्कनीया ज्याया द्राघीया रघीया श्रेया ह्सीया वसीया भूया॒ऽसो जक्षिवा जघ्निवा जिगिवा जीगिवा तस्थिवा दाश्वा दीदिवा पपिवा पीपिवा विद्वा विविशिवा शुश्रुवा ससृवा।
- 16.14 आकारेकारोकारा स्सिषिपरा॰ पदान्तयोः।

- 16.15 विकृतेऽपि।
- 16.16 अनाकारो ह्रस्वꣳ साङ्कृत्यस्य।
- 16.17 न पदे द्विस्वरे नित्यम्।
- 16.18 ऋजीषि जिगासि जिघास्यजासि यजासि ददासि दधासि वर्तयासि च।
- 16.19 दꣳसनाभ्यो दꣳसोभि र्दꣳसँ वृषदꣳशो दꣳशुका दꣴष्ट्राभ्यां परः।
- 16.20 मꣴस्ये मꣳसतै यꣳस द्यꣳस न्वꣳसते वꣳसगः।
- 16.21 उन्नवꣳशाम्।
- 16.22 अक्रꣴस्तोत्क्रꣴस्यते रꣴस्यते भ्रꣳशाते रꣴह्यै च।
- 16.23 ऐकार उरव्यस्य नितान्तः।
- 16.24 वि रि त्रि सङ्ख्यासु।
- 16.25 शिꣳशुमार शिशꣳषत् सꣴश्वा सꣴस्रा सꣴस्कृत्य सꣳसृष्ट सꣴस्कृतꣳ सꣳशित स्सꣳशिता किꣳशिल।
- 16.26 सि तृ द्द हकारपरः।

- 16.27 म॒ꣳहिष्ठस्य च।
- 16.28 आदि र॒ꣳहति र॒ꣳहो ऽ॒ꣳहो र॒ꣳहोमु गत्य॒ꣳहा अ॒ꣳहसो ऽ॒ꣳहसा॒ꣳश म॒ꣳशुभि र॒ꣳशभुवा ॒ꣳश्व॒ꣳशू अ॒ꣳशवो ऽ॒ꣳशु र॒ꣳशु म॒ꣳशू न॒ꣳशुनाऽ॒ꣳशोर॒ꣳशा योऽपा॒ꣳश्व॒ꣳशा ववग्रहे।।
- 16.29 उदात्तो॒ꣳसे॒ꣳसाया॒ꣳसाभ्या म॒ꣳसाविति।
- 16.30 नासावा नासावा।।
- सप्तदशोऽध्यायः (वर्णोच्चारणे तीव्रतरत्वादि प्रयत्नाः)
- तीव्रतरत्वाऽऽदि भेदः
- 17.1 तीव्रतर मानुनासिक्य मनुस्वारोत्तमेष्विति शैत्यायनः।
- 17.2 सम॒ सर्वत्रेति कौहळीपुत्रः।
- 17.3 अनुस्वारेऽण्विति भारद्वाजः।
- 17.4 नकारस्य रेफोष्म यकार भावा, ळुप्ते च मलोपा, च्चोत्तर मुत्तर न्तीव्रतरमिति स्थविरꣲ कौण्डिन्यः।
- तीव्रतरोच्चारणे व्यञ्जनकालाधिक्यम्
- 17.5 व्यञ्जनकालश्च स्वरस्यात्राधिकः।

- दृढप्रयत्नतर विधिः
- 17.6 स्वार विक्रमयो र्दृढप्रयत्नतरः पौष्करसादेः।
- 17.7 प्रयत्नविशेषात् सर्ववर्णानामिति शैत्यायनः।
- उच्चारण विधानम्
- 17.8 नातिव्यक्त न्न चाव्यक्त मेवँ वर्णानुदीरयेत्। पयः पूर्ण मिवात्रऽ हरन् धीरो यथामति - इत्यात्रेय आत्रेयः।।
- अथ अष्टादशोऽध्यायः (प्रणवोच्चारण विधानम्)
- प्रणवोच्चारण प्रकाराः
- 18.1 ओकारन्तु प्रणव एकेऽर्ध तृतीयमात्रं ब्रुवते।
- 18.2 उदात्तानुदात्तस्वरिताना ङ्कस्मिङ्श्चिदिति शैत्यायनः।
- 18.3 धृतः प्रचयः कौण्डिन्यस्य।
- 18.4 मध्यमेन स वाक्प्रयोगः।
- 18.5 स्वरितः प्लाक्षि प्लाक्षायणयोः।
- 18.6 उदात्तो वाल्मीकेः।
- 18.7 यथा प्रयोगँ वा सर्वेषाँ यथा प्रयोगँ वा सर्वेषाम्।।

- एकोनविंशोऽध्यायः(अनुदात्तविशेषस्य विक्रमसंज्ञा, स्वरित परत्वे कम्पविधिश्च)
- विक्रम स्वरूपम्
    - स्वरितयो र्मध्ये यत्र नीचङ् स्या, दुदात्तयो र्वाऽन्यतरतो वोदात्त स्वरितयो स्स विक्रमः।
    - प्रचय पूर्वश्च कौण्डिन्यस्य।
- कम्पविधिः
    - द्वियम एके द्वियम परे ता अणुमात्राः।
    - तस्यामेव प्रकृतौ ।
    - न पूर्वशास्त्रे न पूर्वशास्त्रे।
- विंशोऽध्यायः (स्वरित प्रकरणम्)
- क्षैप्र स्वरितम्
- 20.1 इवर्णोकारयो र्यवकार भावे क्षैप्र उदात्तयोः।
- नित्य स्वरितम्

- 20.2 सयकारवकार न्त्वक्षरँ यत्र स्वर्यते स्थिते पदेऽनुदात्त पूर्वे, ऽपूर्वे वा नित्य इत्येव जानीयात्।
- प्रातिहत स्वरितम्
- 20.3 अपि चेन्नानापदस्थ मुदात्त मथ चेत्, सा॰हितेन स्वर्यते स प्रातिहतः।
- अभिनिहत स्वरितम्
- 20.4 तस्मा दकारलोपेऽभिनिहतः।
- प्रश्लिष्ट स्वरितम्
- 20.5 ऊभावे प्रश्लिष्टः।
- पादवृत्त स्वरितम्
- 20.6 पदविवृत्त्यां पादवृत्तः।
- तैरोव्यञ्जन स्वरितम्
- 20.7 उदात्तपूर्व स्तैरोव्यञ्जनः।
- 20.8 इति स्वारनामधेयानि।
- स्वरितोच्चारण प्रयत्नाः

- 20.9 क्षैप्र नित्ययो र्दृढतरः।
- 20.10 अभिनिहते च।
- 20.11 प्रश्लिष्ट प्रातिहतयो र्मृदुतरः।
- 20.12 तैरोव्यञ्जन पादवृत्तयो रल्पतरोऽल्पतरः।
- एकविꣳशोऽध्यायः (स्वराङ्गभावः)
- अङ्गसंहिताऽऽदि कार्य निरूपणम्
- 21.1 व्यञ्जनꣲ स्वराङ्गम्।
- 21.2 तत्पर स्स्वरम्।
- 21.3 अवसितं पूर्वस्य।
- 21.4 सँयोगाऽऽदि।
- 21.5 परेण चाऽसाꣳहितम्।
- 21.6 अनुस्वार स्स्वरभक्तिश्च।
- 21.7 नान्तस्थापर मसवर्णम्।
- 21.8 नासिक्याः।
- 21.9 स्पर्श श्चोष्मपर ऊष्मा चेत्परस्य।

- प्रचय स्वरूप निरूपणम्
- 21.10 स्वरितात् सꣳहिताया मनुदात्तानां प्रचय उदात्त श्श्रुतिः।
- 21.11 नोदात्त स्स्वरितपरः।
- यम नासिक्य स्वरभक्ति स्वरूपम्
- 21.12 स्पर्शा दनुत्तमा दुत्तमपरा दानुपूर्व्या न्नासिक्याः।
- 21.13 तान् यमानेके।
- 21.14 हकारा न्नणमपरा न्नासिक्यम्।
- 21.15 रेफोष्म सँयोगे रेफ स्स्वरभक्तिः।
- 21.16 न क्रमे प्रथमपरे प्रथम परे।।
- द्वाविꣳशोऽध्यायः (पारिभाषिक पदार्थनिर्णयः, स्वरविचारः, गुरुलघु संज्ञा विचारः)
- वर्णान्यत्व निर्वचनम्
- 22.1 शब्दः प्रकृति स्सर्व वर्णानाम्।
- 22.2 तस्य रूपान्यत्वे वर्णान्यत्वम्।
- शास्त्र प्रयुक्त पारिभाषिक शब्दविवरणम्

- 22.3 तत्र शब्द् द्रव्याण्युदाहरिष्यामः।
- 22.4 वर्णकारौ निर्देशकौ।
- 22.5 चापीत्यन्वादेशकौ।
- 22.6 त्वथैवेति विनिवर्तकाधिकारकावधारकाः।
- 22.7 वेति वैभाषिकः।
- 22.8 नेति प्रतिषेधकः।
- स्वर शब्दोत्पादन प्रकारः
- 22.9 आयामो दारुण्य मणुता खस्ये त्युच्चैःकराणि शब्दस्य।
- 22.10 अन्ववसर्गो मार्दव मुरुता खस्येति नीचैःकराणि।
- मन्द्राऽऽदि स्थान निरूपणम्
- 22.11 मन्द्र मध्यम ताराणि स्थानानि भवन्ति।
- 22.12 तत्रैकविꣳशति र्यमाः।

- विराम स्वरूप कथनम्

- 22.13 ऋग्विरामः पदविरामो विवृत्ति विराम स्समान पद विवृत्ति विराम स्त्रिमात्रो द्विमात्र एकमात्रोऽर्धमात्र इत्यानुपूर्व्येण।
- गुरु लघु स्वरूपम्
- 22.14 यद्व्यञ्जनान्तँ यदु चापि दीर्घं सँयोग पूर्वञ्च तथाऽनुनासिकम्। 22.14 एतानि सर्वाणि गुरूणि विद्या-च्छेषाण्यतोऽन्यानि ततो लघूनि।।
- 22.15 अव्यञ्जनान्तँ यद्धस्व मसँयोगपरञ्च यत्। अननुस्वार सँयुक्त मेत ल्लघु निबोधतैत ल्लघु निबोधत।
- अथ त्रयोविँशोऽध्यायः (वर्णवाक्योत्पत्ति हेतवः)
- वर्णोत्पत्ति कथनम्
- 23.1 अथ वर्ण विशेषोत्पत्तिः।
- 23.2 अनुप्रदानात् संसर्गात् स्थानात् करण विन्ययात्। जायते वर्ण वैशेष्यं परीमाणाच्च पञ्चमादिति।
- 23.3 वर्णपृक्त श्शब्दो वाच उत्पत्तिः।
- सप्त वाचस्स्थानानि (उपांशु, ध्वान, उपब्दिमदादि)

- 23.4 सप्त वाच स्स्थानानि भवन्ति।
- 23.5 उपाꣳशु ध्वान निमदोपब्दिम न्मन्द्र मध्यम ताराणि।
- 23.6 करणव दशब्द ममनः प्रयोग मुपाꣳशु।
- 23.7 अक्षर व्यञ्जनाना मनुपलब्धि र्ध्वानः।
- 23.8 उपलब्धि र्निमदः।
- 23.9 सशब्द मुपब्दिमत्।
- 23.10 उरसि मन्द्रम्।
- 23.11 कण्ठे मध्यमम्।
- 23.12 शिरसि तारम्।
- 23.13 मन्द्रादिषु त्रिषु स्थानेषु सप्त सप्त यमाः।
- क्रुष्टाऽदि स्वर निरूपणम्
- 23.14 क्रुष्ट प्रथम द्वितीय तृतीय चतुर्थ मन्द्रातिस्वार्याः।
- 23.15 तेषा न्दीप्तिजोपलब्धिः।
- आह्वारक स्वरः (ह्ना)
- 23.16 द्वितीय प्रथम क्रुष्टा स्त्रय आह्वारक स्वराः।(ह्ना)

- 23.17 मन्द्राऽऽदयो द्वितीयान्ता श्चत्वार स्तैत्तिरीयकाः।
- 23.18 द्वितीया न्मन्द्र स्तैत्तिरीयाणाम्।
- 23.19 तृतीय चतुर्था वनन्तरम्।
- 23.20 तच्चतुर्यम मित्याचक्षते।
- 23.21 तस्मिन् द्वियमान्तरा वृत्तिः।
- 23.22 तामुपदेक्ष्यामः।
- 23.23 तच्चतुर्यम मित्युक्तम्।
- 23.24 क्रम विक्रम सम्पन्ना मद्रुता मविलम्बिताम्। नीचोच्च
- स्वार सम्पन्नाँ वदे द्धृतवतीꣳ समाँ वदे द्धृतवतीꣳ समामिति।।
- चतुर्विꣳशोऽध्यायः (संहिता चतुष्टयम्, ज्ञान प्रशंसा)
- संहिता चतुष्टय निर्वचनम्
- 24.1 अथ चतस्र स्सꣳहिताः।
- 24.2 पद सꣳहिताऽक्षरसꣳहिता वर्णसꣳहिताऽङ्ग सꣳहिता

चेति।
- 24.3 नानापद सन्धान सँयोगꣷ पदसꣳहितेत्यभिधीयते।

- 24.4 यथा स्व मक्षर सꣳहिताऽऽदीना मप्येवम्।
- वेदाध्येतृ विज्ञेय विषय प्रकथनम्
- 24.5 गुरुत्वँ लघुता साम्यं ह्रस्वदीर्घ प्लुतानि च।
- लोपाऽऽगम विकाराश्च प्रकृति र्विक्रमꣳ क्रमः।
- 24.6 स्वरितोदात्त नीचत्वं श्वासो नादोऽङ्ग मेव च।
- एतत् सर्वन्तु विज्ञेय ञ्छन्दोभाषा मधीयता।।
- 24.7 पदक्रम विशेषज्ञो वर्णक्रम विचक्षणः।
- स्वरमात्रा विभागज्ञो गच्छे दाचार्य सꣳसद ङ्गच्छे दाचार्य सꣳसदमिति।।

समाप्तं तैत्तिरीय प्रातिशाख्यम्

---

## 11) व्यासशिक्षा

1. संज्ञाप्रकरणम्

- श्रीवासुदेवं वरदं प्रणम्य श्रीमद्गणेशं वचसाञ्च देवीम् ।। 1।।
- शिक्षां प्रवक्ष्ये श्रुतिकारणाङ्गं सुबोधकं लक्षणशीर्षभूषाम् ।।2।।

- अथ स्वराऽऽदिसंज्ञाश्च तत्प्रयोजनमेव हि ।। 3।।
- तत्फलञ्च प्रवक्ष्यामि विदुषां प्रमुदे यथा ।। 4।।
- अवर्णेवर्णकोवर्णा ऋवर्णौ ऌत्व मेत्व मैत् ।। 5।।
- ओदौद्रङ्गौ क्रमादेते स्वरास्स्यु र्व्यञ्जनान्यथ ।। 6।।
- कादि मान्ता स्स्मृता स्स्पर्शा अन्तस्था यादि वोत्तराः।। 7।।
- जिह्वामूल्यादि हान्ताश्च षडूष्माण उदीरिताः ।। 8।।
- स्पर्शानां पञ्च पञ्च स्यु र्वर्गा वर्गोत्तरस्य च ।। 9।।
- तत्प्रथमादि संज्ञास्स्युः पञ्चमस्योत्तमः क्रमात् ।। 10।।
- अघोषा स्स्यु र्विसर्गोष्म - द्वितीयप्रथमा न हः ।। 11 ।।
- गजडाद्या दबाद्याश्च घोषवन्तः परे हलः ।। 12।।
- सविशेषस्तु यस्तस्य ज्ञेयं वर्णान्तरं बुधैः ।। 13।।
- तुल्यरूपं सवर्णं स्या- ल्लोपस्स्या दप्रदर्शनम् ।। 14।।
- ऋवर्णस्य ऌकारस्य पृक्तसंज्ञा प्रकीर्तिता ।। 15।।
- अवसानेऽन्त्यवर्णाश्च नादा इति बुधै स्स्मृताः ।। 16।।
- आख्याऽनेकस्य वर्णोर्ध्वं स्स्वरस्य कारतोत्तरः ।। 17।।

- भवे दकारकारोर्ध्वौ हलामत्तु र एफगः ।। 18।।
- अदन्तं ग्रहणं वा स्यात् सन्देहे सन्निधि न्त्वपि ।। 19।।
- निर्देशाः कारमुख्याश्चा - न्वादेशावपि चेत्यधः ।। 20।।
- त्वथैवेति निवृत्तिस्थो ह्यधिकारोऽवधारकः ।। 21।।
- अन मा ना निषेधे स्यु - र्वेति वैभाषिको भवेत् ।। 22।।
- सम्मिश्रस्स्या द्यदेकत्वं सम्बन्ध श्श्रवणे द्वयोः ।। 23।।
- अनेक व्यञ्जनश्लिष्ट स्संयोगश्च प्रकीर्तितः ।। 24।।
- वर्णाभावो विरामश्चा - वसानं सार्धमात्रिकः ।। 25।।
- नानापदव दिङ्ग्श्चा - सङ्घाने चाद्यवग्रहः ।। 26।।
- वेदभागः क्रमेणैव स चाऽऽर्षः कथ्यते बुधैः ।। 27।।
- उच्छ्वासेऽनवसाना स्यात् संहिता चान्तगं पदम् ।। 28।।
- पद वर्ण स्वराङ्गानां द्विर्द्विर्युक्ते च संहिता ।। 29।।
- द्विधाऽऽदि संहिता ह्यत्र पञ्चैवं संहिता स्स्मृताः ।। 30।।
- पदवत् संहिता यत्र न कार्यं सांहितं यदि ।। 31।।
- विज्ञेया प्रकृति स्तस्या ज्ञानादेव फलं लभेत् ।। 32।।

- संहितावत् क्रमो ज्ञेयो द्वितीयं पदवद् द्वयोः ।। 33।।
- इतिगन्त्वादि चेदुक्त्वा द्वितीयं चोत्तरं तथा ।। 34।।
- आदन्तन्तु यदुच्चान्त मोपसर्गपरं यदि ।। 35।।
- परेण त्रिक्रम स्स्याद्धि षु पदं नः परन्त्वधः ।। 36।।
- सकृदादि द्वितीयं द्विः पठेच्चाऽऽदिपदं सकृत् ।। 37।।
- सन्धितः क्रमवच्चेति प्रोच्यते सा जटा बुधैः ।। 38।।
- त्रिक्रमस्य जटा ज्ञेया ह्युक्त्वा पूर्वं क्रमं तथा ।। 39।।
- पुनरन्तं मध्यमाऽऽदि पुनराद्यन्तरं परम् ।। 40।।
- अनुलोम स्स्वपाठस्स्या द्विलोम स्सन्धिनिर्मितः।। 41।।
- पदं पदं पठेत्ताभ्यां त्रिवार श्चोर्ध्वतः पुनः ।। 42।।
- प्रोपावापर्यधिव्युत्सु न्यन्वपाप्यत्यभि प्रति ।। 43।।
- परानिस्सं नव दशा - प्युपसर्गा स्स्यु रत्र हि ।। 44।।
- इति संज्ञाप्रकरणम्।। ।।
- 2. प्रग्रहप्रकरणम्
- अथ प्रग्रह एवान्त उच्यतेऽवग्रहो न चेत् ।।45।।

- ऊकार स्स्थित ओकारो ऽप्यकारव्यञ्जनोत्तरः ।।46।।
- स म ह द् थ पित्पूर्वो नित्योऽथेदेत् पती श्रुतिः ।।47।।
- कार्ष्णी धी चक्षुषी मुष्टी देवताफल्गुनी अमी ।।48।।
- अहनी श्रपणी हूती सुम्निनी सामनी हरी ।।49।।
- कल्पयन्ती तपसी ना- भ्यैक्षव्यापृषती हुरी ।।50।।
- रिष्यन्ती वाससी दर्वी नः पृथिवी व्यचस्वती ।।51।।
- जन्मनी वैष्णवी द्यावा - पृथिवी आहुती कृतौ ।।52।।
- रोदसी चोत्तरः पान्य- परो न्वती च ची प्र यत् ।।53।।
- न ह्यन्योर्ध्वौ समीची ग्नी घ्नी चक्रे पोर्ध्व आन्मही ।।54।।
- ऊर्ध्वे शाखे धृते श्रृङ्गे एने मेध्ये च देवते ।।55।।
- पार्श्वे एवोत्तरे अक्ते तृण्णे तृद्ये कनीनिके ।।56।।
- शिप्रे रथन्तरे शस्त्रेऽहोरात्रे चोत्तमे उभे ।।57।।
- सामे सदोहविर्धाने वजेऽधिषवणे शिवे ।।58।।
- विषुरस्य विरूपे च दृढे ध्वंसदने हुले ।।59।।
- अर्पिते रैवते पूर्ते भागधे च धृतव्रते ।।60।।

- अच्छिद्रेऽनृते प्रत्ते अ-स्मे त्वे इत्यन्निङ्ङ्गगम् ।।61।।
- एते वैसं हि तन्वेव यज्ञेष्टक् पत्परो द्वयोः ।।62।।
- द्वे परश्चैक व्यवेतः कृष्णो वीड्वार्यदा चराव् ।।63।।
- स्थः परः पूर्वतो वाऽपि ईदेकारोऽन्त एव च ।।64।।
- बहुस्वरस्य ते थे च आकारैकारपूर्वकः ।।65।।
- पूर्णे ब्रह्मजेमे आप- स्सजूः क्रूरं तथैषु च ।।66।।
- एव रसेन गर्भञ्च उपोत्तर इमे तथा ।।67।।
- ते तूपाह र्नमो गर्भे वायु र्मापैन मभ्यधः ।।68।।
- ते अस्या चर्क् छन्दस्वोर्वी येऽप्रयङ्कान्तरासु च ।।68।।
- सोमाय स्वेति चैतस्मिन्- वरी इत्याद्ययं परः ।।70।।
- इरावती प्रभृत्यैव दाधारान्त स्तथैव च ।।71।।
- कुर्यादिष्टि ष्वग्निं गानू-द्भवतोऽवान्तराऽकरोत् ।।72।।
- आस्तां गमयतोऽब्रूतां स्तभ्नीतां बिभृतस्त च ।।73।।
- वाचय त्यप्सुभाभ्याञ्च ताभ्यामेव तनू यदा ।।74।।
- प्रवर्तपर आषष्ठात् सदा प्रग्रहकार्यभाक् ।।75।।

- नाऽतेऽवेऽह्ने धत्ते र्याते ग्रामी ज्ञे वर्चसी थुनी ।।76।।
- लोके रून्धे मासे नित्यं पस्थे नीचस्त उर्वशी ।।77।।
- प्रग्रहेङ्ग्योपसर्गान्त इति स्यादप्यसांहिते ।।78।।
- पुनस्त्विवङ्ग्यं क्रमे चाऽऽदिर्विरामस्थं द्विधैक्यतः ।।79।।
- नोपसर्गोऽवसानस्थो निहतश्च द्वयोरधः ।।80।।
- अवानस्त्रिषु मध्यस्थोऽवग्रहो न क्रमे तु च ।।81।।
- इति प्रग्रहप्रकरणम्।।2।।
- 3.परिभाषाप्रकरणम्
- अथेयात् संहितायां यत् कार्यञ्चेत् सनिमित्तकम् ।।82।।
- विकृतञ्च पदेऽदाद्य-नाद्यनुस्वारयुक्पदम् ।।83।।
- ह्रस्वस्यानित्यदीर्घं स्यात् तद्वाऽस्याप्युपलक्षणम् ।।84।।
- पूर्वं पूर्वन्तु तत्रैव कर्तव्यं प्रथमं यथा ।।85।।
- सामान्योक्तस्तु सर्वत्र विशेषो नैव दृश्यते ।।86।।
- तयोरेकत्र चाल्पस्थो विशेषो बलवान् स्मृतः ।।87।।
- पुनरुक्तं यतः पञ्च - पदमित्युत्तरञ्च वा ।।88।।

- पूर्ववद्भवति ज्ञेयं सर्वत्रापि विचक्षणैः ।।89।।
- परि त्वा पुनरूर्जाऽय-न्नोऽस्यरातीयतोऽपि च ।।90।।
- सप्त तेऽपो अनु त्वग्ने त्वङ्गोमांश्वाऽधि रोचने ।।91।।
- चित्रं च भवतं द्रप्स - स्सहस्व पुनरैक्यतः ।।92।।
- आयुर्यज्ञेन वाजश्च प्राणम्म आयुरेव च ।।93।।
- पवस्व व्रतपा स्सूर्ये परोऽग्न आदयः पुनः ।।94।।
- येनाग्नेऽस्मिन् सधस्थे च वाज्यध्वन स्त्वनैक्यतः।।95।।
- एदोर्ध्यां वक्ष्यतेऽतश्च यदनेकपदे पुनः ।।96।।
- जटोच्यतेऽन्यशब्देन तत्रानैक्यं न विद्यते ।।97।।
- ग्रहणन्त्वेक मुद्दिश्य पदं वै क्रियते यतः ।।98।।
- तदन्यत्र तु न ग्राह्यं यज्जटाभिमतै रिति ।।99।।
- संहितावत्क्रमो ज्ञेयो जटा च विकृताऽऽदिषु ।।100।।
- आर्षे तूक्तं मुखेऽन्ते च - अन्यत् स्यादुभयत्र हि ।।101।।
- इति परिभाषाप्रकरणम्।।3।।
- 3. दीर्घप्रकरणम्

- अथाऽऽदावन्त आर्षे तु ह्रस्वो दीर्घं भजेद्धलि ।।102।।
- सदेङ्गे तु व्यानोदान- शब्दयोस्तु सुबन्तयोः ।।103।।
- लोक एवेष्ट चाऽद्याश्वात् तस्य देवायते युवम् ।।104।।
- वयुना हृदयाऽश्वा वि- द्रर्षाह्वा मुत्तरस्तथा ।।105।।
- चित्रर्ता-वय-वात-त्व-द्रविण-प्रस्थ-भङ्गुर ।।106।।
- पुष्प-ष्णिय-र्णक-शक्ति-श्वदेव्य-विषु-चेन्द्रिय ।।07।।
- वीर्याश्व-वद्वन्वानूर्ध्वो वनान्योर्ध्वेषु चेन्द्र चेत् ।।108।।
- सत्राज्युक्थायुम त्सुम्ना यन् सुगोप रथीतम ।।109।।
- स्वाधियं धी रुहं राज्यं परो दीर्घाधियः परः ।।110।।
- शीक शुद्ध च मेघाऽघ वसु शत्रु च योत्तरः ।।111।।
- विश्वाराड्वसु मित्रापि साह हा पुषवत्परः ।।112।।
- परी णसमधी वासं प्रावणेभि स्सहोत्तरः ।।113।।
- रात्र्योषध्याहुति श्रोणि चिति व्याहृति पृष्टि चेत् ।।114।।
- स्वाहाकृति शच्यृक्साम हनु ह्रादुनि भोत्तरः ।।115।।
- चर्षणी धृत्पारीण् पूती गाभीवृत्सह सूयव ।।116।।

- त्विषि वाशिम्यनूब्याञ्चात् काश्विभूदाववग्रहः ।।117।।
- ऋक्ष्वथा तेस्वयं धत्तं सपत्नान्नो रयिं भव ।।118।।
- देवानां शतसोमस्य जीवो यूयं पितृन् परः ।।119।।
- अधा ते च यथा ह्यूर्ध्व -स्तिष्ठादेवशरीर चेत् ।।120।।
- अच्छा वोचो जिगा नक्षि पित दैंवा न्नियुद्वद ।।121।।
- चकृमा सु-जुषध्वं क-द्वयं दैव्येऽत्र पूष्ण ते ।।122।।
- सृजा ररा दृतिं वृष्टिं सं रक्षा माकिराज च ।।123।।
- भवा तोकाय नस्त्वं पा वाज्यत्रा ते नियुन्नरः ।।124।।
- ससादा पिद्यजी मुञ्चा विस्वस्त शिक्षन स्सखि ।।125।।
- क्षामा रेभिरु घा स्यालात् सत्यं मृडा जरित्र नः ।।126।।
- धारया रयिं वसूनि मय्यवता हवे वचः ।।127।।
- विद्मा ते तं हि बोधा स- नोऽद्या देवान् हुवे च वृण् ।।128।।
- भरता वस् बृहज्जात- वर्धया त्वं रयिं परः ।।129।।
- सचस्व नुद वर्धावा नोऽत्तधामाह ना ह दे ।।130।।
- युक्ष्व स्वेन जनिष्वा हि मधूर्ध्व स्सिञ्चथोक्षत ।।131।।

- घुष्याश्वस्य वि पाथा दि-वाऽऽरिथा मुञ्चता यज ।।132।।
- पिबा चरा सोम हिष्ठां वर्तयर्ष यथा पु चेत् ।।133।।
- जनयथा च दीयार ऋध्यामा ते हरा नि चेत् ।।134।।
- तत्रा रथं जयता नर कुत्राचिद्य तरा मृधः ।।135।।
- याता हिर पृणस्वा घृ-ते भरा दद्यपा वृधि ।।136।।
- वोचता मेऽनदता ह-घेना सहस् चृताब चेत् ।।137।।
- भजा त्वं जनया दैव्यं दक्षिणेना वसून्यपि ।।138।।
- रुहेमा स्व स्तरीमाजु भवता मृड धर्ष मान् ।।139।।
- बिभृता स्वीरयथा म-रु भरेमा मनीष चेत् ।।140।।
- हन्तना तं जगामा प-रस्याश्वे त्तपता सुवृक् ।।141।।
- जुहुता विश्व तरता रजांसि श्रृणुता हवम् ।।142।।
- पारया नव्य स्सादया यज्ञ ञ्चेत्कृणुता बृहत् ।।143।।
- क्रयी पोश्मसी ग यदी भू कृधी स्वस् श्रुधी हवम् ।।144।।
- मोष्वा तु नू रणे मक्षू दे थू करूषु बल् सु नु ।।145।।
- इति दीर्घप्रकरणम्।।4।।

- 5. आगम प्रकरणम्
- आगमस्त्रपु पूर्वस्स्या न्मिथ्वधश्शोऽपि चोत्तरः ।।146।।
- सु पूर्वश्शोऽपि चन्द्रोर्ध्व - स्सम्पूर्वस्सः कुरूत्तरः ।।147।।
- समपूर्वश्च कुर्वोर्ध्वो नीचापूर्वो द उच्परः ।।148।।
- ङपूर्वः कस्सषोर्ध्वश्चे- ट्टनपूर्वश्च तो भवेत् ।।149।।
- इति आगमप्रकरणम्।।
- 6. लोपप्रकरणम्
- लोपो विसर्ग स्सोऽनिङ्घ- स्स्य उच्चोऽथैष चेद्धलि ।।150।।
- एनौषधी रिद्विदग्न इमान्नः परतश्च सः ।।151।।
- मकारः पदमीं पूर्व- श्चाऽऽदौ व उच्चतुन्वधः ।।152।।
- मश्चावग्रह इत्येकं या तिष्ठन्त्येकयोर्ध्वतः ।।153।।
- रेफोष्मोर्ध्वोऽन्तगो मस्तु नाऽऽदौ संसाञ्च रापरे ।।154।।
- वर्तमानस्स उत्पूर्व - स्थस्तयोरित्यनोत्परे ।।155।।
- इति लोपप्रकरणम्।।
- 7. वैकृत प्रकरणम्

- अथ वैकृत माप्नोति पदासम्पूर्व ऋत्वरम्         ।।156।।
- विसर्गोऽवग्रहेष्वाशी - स्सुवर्धू रं परस्स षम्         ।।157।।
- नकार श्शमिया च्चोर्ध्वो नैरय न्नार्घ्नुवन्नपि         ।।158।।
- एवास्मि न्ननङ्वा नायन् घृणीवान् वारुणानिति    ।।159।।
- हकारः प्रथमा दूर्ध्व स्तत् सस्थान श्चतुर्थकम्         ।।160।।
- स्पर्शपूर्व श्शकारश्छं लन्त श्चाऽऽप्नोति लोत्तरः         ।।161।।
- तवर्गश्च टवर्गाद्यौ भजे दन्तोऽन्त मूर्ध्वयोः         ।।162।।
- नकारो लपरस्तस्य सवर्ण मनुनासिकम्         ।।163।।
- स्पर्शोत्तरो मकारस्तु यवलोत्तर एव च         ।।164।।
- अनुनासिक मेतेषां सवर्णं प्रतिपद्यते         ।।165।।
- ज्ञघ्नोत्तरो मकारश्चे - दनुस्वरोऽत्र केवलः         ।।166।।
- द्विमात्र इति विज्ञेयो ह्यन्यधर्मविवर्जितः         ।।167।।

- इति वैकृतप्रकरणम्।।

- 8. षत्वप्रकरणम्

- अथेत स्सविसर्गौ षं पदि मह्योहि मो द्यवि         ।।168।।

- सोदिव्ययं कमू प्रोत्री पूर्वोऽवग्रहपूर्वकः ।।169।।
- असिश्च न्नसदामापि ह्यनयो रादिपूर्वके ।।170।।
- परि वि प्रति निर्ण्यध्य- भि पूर्वो निहते पदे ।।171।।
- तोर्ध्वो वेस्सुमति र्माकि- रीयु रार्यु र्नकि र्विदुः ।।172।।
- प्रेसोऽग्नि रविदु र्मीढु- र्निराभिः पायुभि स्सधिः ।।173।।
- नावर्ण हल्लिमौ मृत्यु- स्पति कुन्त्यृतु पल्यधः ।।174।।
- ध्यन्यपूर्व स्सव स्थान मृद्रवत्यप्यवग्रहः ।।175।।
- सन्तानेभ्य स्स्पश स्सीतं सप्ताभि स्संमितां स्तनाम् ।।176।।
- समेय स्सत्वा सस्यायै सक्सनिश्च सनी स्सनि ।।177।।
- न स्तुप् स्तरी स्वर स्पर्धा स्फुरं साहस्र सारथिः ।।178।।
- ज्योति रायु श्चतुःपूर्व स्स्तो प्रतिप्रसवस्त्विति ।।179।।
- टन्तो वाघाष पूर्वष्षात् थाकार श्चैव ठं भजेत् ।।180।।
- विद्वांस्तांस्त्रीनृतून् लोकां – स्तर्हा स्तस्मिन्पितृ ननान्।।181।।
- युष्मा नूर्ध्वा नश्मन् कृण्वन् कपाला नम्बकानपि ।।182।।
- तिष्ठन्नाद्युच्चके नेमिर्देवां श्चेत्सवने पशून् ।।183।।

- नकारः प्राकृतश्चैषु नित्य तोर्ध्व स्समाप्नुयात् ।।184।।

- इति षत्वप्रकरणम्।।

- 9. णत्वप्रकरणम्

- अथैति नो णमस्थूरि षु ग्रामोरु समिन्द्र वाः ।।185।।
- धिसुव स्त्रिटपूर्वौ नि- ष्पूर्वौ हन्योप्यमान च ।।186।।
- पारी परि प्र पूर्वश्च तदवर्ण व्यवेतकः ।।187।।
- प्राधो वन्नुह्यमानोऽयन् यानं यवेन वाहनः ।।188।।
- षुम्नाऽन्योऽनित्य षत्वस्थ इन्द्रोऽध एनमत्र च ।।189।।
- केनेत्यत्रायजुः पूर्वौ नृश्रीपूर्वौ मना अपि ।।190।।
- अङ्गनां ग्यानि गान्योने गानां यामेन षण्ण च ।।191।।
- रषः पूर्वौ हवन्यह्ने हन्नृ पूर्वौ मयान्यनी ।।192।।
- न नूनं नृत्य नह्यत्य- न्वाऽन्यशब्दे न्य उच्चकः ।।193।।
- नकारो द्वित्वगो लक्ष्यात् तकारोर्ध्वोऽपि वान्तगः ।।194।।
- उत्तमं प्रथमोऽन्त्योर्ध्व - स्तृतीयं घोषवत्परः ।।195।।
- अन्तोऽचि वा सवर्गीयं ककु दन्त्यश्च मोत्तरः ।।196।।

- इति णत्वप्रकरणम्।।9।।

- 10. रेफप्रकरणम्

- अथ विसर्ग आप्नोति रेफ मज्घोषवत्परः ।।197।।
- ह्वारेष्ट रबिभ र्वार्हा रनन्त स्सवित स्त्वकः ।।198।।
- अजीग श्शमित स्त्वष्टः प्रात श्चाहरह स्त्वभाः ।।199।।
- नेष्ट र्यष्ट र्विव र्वस्त स्सनुत स्तनुतः पुनः ।।200।।
- स्तोत र्होतः पित र्मातः कराव रनुदात्तयोः ।।201।।
- आवृत्परोऽय मित्यूर्ध्व - श्चानाद्युच्चेऽन्तरेव हि ।।202।।
- अनिङ्ख्रान्ता स्सुवश्चाहा- स्त्वह र्न भ्यां भिरुत्तरः।।203।।
- रेफोर्ध्वो लुप्यते रेफ - स्तत्पूर्वो दीर्घ माप्नुयात् ।।204।।
- द्वन्द्वेऽहो रात्परे ओत्वं याति रोर्ध्वे सुवस्त्वपि ।।205।।
- अःकारश्च त्वकारोर्ध्वो घोषवत्पर एव वा ।।206।।

- इति रेफप्रकरणम्।।10।।

- 11. विसर्जनीयसन्धि प्रकरणम्

- क ख पे षं तथावर्ण पूर्व- स्संया त्यवग्रहः ।।207।।

- अत्र देवरिषश्चाऽवि र्निरिड श्शश्वतोऽपसः ।।208।।
- विश्वतोंऽहसोऽतिदिवो- ऽप्यश्मन स्तमस स्त्विति ।।209।।
- स क घान्योत्तरः पिन्व पथे कृध्युत्तर स्तथा ।।210।।
- पत्नीवे पतिशब्दे द्विः पुत् पर्यूर्ध्वे दिवोहसः ।।211।।
- वसुष्कोर्ध्वश्च रायस्पो परो नमस्करो परः ।।212।।
- नाध्वरं विश्वतोऽन्तश्च पुनस्तु विविशुः परुः ।।213।।
- जातोऽत्र धषवत्यूर्ध्वे परि वा प्रोत्तरे ननिः ।।214।।
- लुप्यते संयुतोष्मोर्ध्वो -ऽप्यवर्णाद् घोषवत्परः ।।215।।
- ऊष्माण मप्यघोषोर्ध्व स्तस्य सस्थान माप्नुयात् ।।216।।
- जिह्वामूलीय माप्नोति उपघ्मानीयमेव वा ।।217।।
- कखे पफे परे न क्षे अवर्णाद्यत्व मच्परे ।।218।।
  - इति विसर्जनीयसन्धि प्रकरणम्।।।।
- 12. यत्वप्रकरणम्
- ग्रहे हिरण्यवर्णीये पृष्ठये याज्योख्ययोरपि ।।219।।
- नित्याचिनो यमात् पूर्व - मीदूत्पूर्वोऽन्त एति रम् ।।220।।

- सोमान्यपूर्व न्दुर्यांस्तु मर्त्यान् पोषा न्वशा नरान् ।।221।।
- मधुमा नविमान् गोमा- नमित्रा नमृता न्महान् ।।222।।
- सो अस्मान् हविष्मान् कक्षी- वानिडावांश्च बाणवान् ।।223।।
- चिकित्वान् हि पयस्वांश्च विदत्रानुदयान् हि यम् ।।224।।
- इन्द्रोमाचोद्व मीडेऽन्यान् अप्येत्वकुर्वतादुहत् ।।225।।
- अधरान्त्सर्त्वगन्माऽक रग्रेऽलञ्चाऽऽदितिः परः ।।226।।
- नार्चान् पतङ्गान् यजीयान् समानांश्च तथा यमान् ।।227।।
- रश्मीन् हि श्रपयांश्चात्र पदञ्चे दुदथा परः ।।228।।
- उक्तौ विधिनिषेधौ च यत्व रत्वे स्वरे परे ।।229।।
- विलोमेऽप्येव तौ ज्ञेयौ प्रकृतौ नैव नो हलि ।।230।।
- अयवावेदोदायावा - वैत्वमौत्वं स्वरेऽनति ।।231।।
- तत्तस्मा दयुतादुत्वात् स्वकालाद्धः पदात्परः ।।232।।
- यमिवर्णोऽसवर्णे व-मुन्नश्येती मिथुन्यचि ।।233।।
- यकारोऽवर्णपूर्वोऽचि ह्यादेशो यदि लुप्यते ।।234।।
- न प्लुते प्रग्रहे सन्धि- विधि र्यत्वे तु लुप्तके ।।235।।

- रोष्मभावात्तु नात्पूर्वं लुप्ता न्माच्च तदुत्तरात् ।।236।।
- नकाराद्याकृते र्लुप्ता – दनुस्वाराऽगमो भवेत् ।।237।।
- अनुस्वारो यजुष्येव - मध्यायेऽपि यदा भवेत् ।।238।।
- तदा गकारसंयुक्तो न शान्तिश्शासरूपरः

।।239।।

- इति यत्वप्रकरणम्।।12।।

- 13. अच् सन्धिप्रकरणम्

- अथ स्वरावुभावेक माप्नुतोऽच्सन्धि रुच्यते ।।240।।
- आद्यष्टसु सवर्णोर्ध्वे दीर्घ मप्लुत पूर्वके ।।241।।
- अथात्रावर्णपूर्वे ता - वेत्वञ्चेवर्ण उत्तरे ।।242।।
- उ वर्णोत्तर ओत्वञ्च ऐत्वमेदैत्परे तथा ।।243।।
- औत्व मोदौत् परेऽरमृ- त्यारं प्रोपावपूर्वके ।।244।।
- न स्वधा मा प्रपाऽस्यूर्ध्व आपूषा ज्या प्रबुघ्निया ।।245।।
- अमिनन्त स्वपाठेऽचि पदं मानो यदा षुसाम् ।।246।।
- ओष्ठेतनेव एष्टश्चे – देम न्नोद्मन् परं पदम् ।।247।।

- अच्सन्धिप्रकरणम्।।13।।
- 14. अथ अनैक्यप्रकरणम्
- एदोत्पूर्वेऽप्यकारोर्ध्व एकं पूर्वसमन्वितः ।।248।।
- अथ प्राकृत उख्येयु र्याज्या द्रापे हिरण्यव ।।249।।
- धाता जुष्टो विकर्षोऽग्नि- र्मू र्विहव्येयमे नमः ।।250।।
- वाजपेय महापृष्ठ्ये श्येनायोप ध्रुवक्षितिः ।।251।।
- तेष्वहन्यनिष्ट्वद्या- दवन्त्वसंहसोंऽहतिः ।।252।।
- अन्वापस्त्वो वातो र्मासो मर्तो दत्ते रथस्त्वधः ।।253।।
- वातः पूर्वोऽभिवाऽपश्च अपः पूर्वोऽगमत्त्वनु ।।254।।
- आपः पूर्वोऽद्भि रस्मांश्चे- दपान्नपात् तथैव च ।।255।।
- अदूर्ध्वोऽस्मान् स इन्द्रोऽध- स्तेऽधोऽग्नेऽन्योंऽशुरद्य च।।256।।
- ग्न्यूर्ध्व आविन्न स्सोमोऽधो मेऽधोऽग्नेऽस्याश्विना परा।।257।।
- नः पूर्वोऽघाद्य पथ्यस्मि- न्नसदभ्यग्निरन्तमः ।।258।।
- नमः पूर्वोऽग्रियाग्रे तु अश्वेभ्य श्वेतरत्र तु ।।259।।
- धीरासोऽदब्धासोऽषाढ एकादशास एव च ।।260।।

- ऋषीणांपुत्र श्शार्याते पृथिवी यज्ञ एव च ।।261।।
- पितार आसते ये गो समिद्ध ऋषभः पुवः ।।262।।
- युवयोर्यो गृह्णाम्यग्रे जज्ञे वानेष एव च ।।263।।
- पतिर्वः पृष्ठे संस्फान- श्शुष्मो वृष्णो वचस्तथा ।।264।।
- वर्षिष्ठे जुषाणः पाथो यो रुद्रः पूर्व इत्यपि ।।265।।
- अरतिमस्य यज्ञस्य त्वतिद्रुतोऽतियन्ति च ।।266।।
- अविष्य न्ननमीवश्च अन्नेष्वर्चि स्तथाऽनृणः ।।267।।
- अप्सु योऽज्यानि मर्वन्त मजीता नह्निया स्तथा ।।268।।
- अम्बाल्यस्त्वङ्गिरोऽङ्गे च अस्कभाय त्तथाऽकृणोत् ।।269।।
- अश्वसनि रश्शिश्रेच्च अच्युतोऽस्थभि रघ्निय ।।270।।
- अध्वर स्वर ऊर्ध्वे चे- देष्वकार स्स्वभावतः ।।271।।
  - इति अनैक्यप्रकरणम्।।14।।
- 15. ऐक्य प्रकरणम्
- अथैतद्विषयेष्वेक - मेदोदित स्त्वसीति च ।।272।।
- न गर्भश्च यमो नद्धो भद्रः पूर्वस्त्वसीति च ।।273।।

- यवनहेष्वजूर्ध्वेषु ग्नजोर्ध्वोऽकार उच्चकः ।।274।।
- मो वचस्स्थे दधानोऽधो अग्नेत्यकार ऐक्यतः ।।275।।
- अभ्यावर्ति न्नभिद्रोह मधाय्यपि दधामि च ।।276।।
- अदिति श्शर्माग्ने र्जिह्वा - मग्नयः पप्रयोऽरथाः ।।277।।
- अद्यान्वस्माक मरिष्टा अश्माऽश्वाश्रुति रव्यथ ।।278।।
- अस्मत्पाशा नस्मिन् यज्ञे अङ्गिरस्व दथो अदः ।।279।।
- अस्ताऽस्मेधत्त चादुग्धा अर्चन्त्यत्रस्थ चार्यमन्।।280।।
- अन्तरस्या ममा ऽपूप मश्यामान्नाय चाकरम् ।।281।।
- गाहमानो जायमानो मन्यमान स्स्त्रिधोऽग्नयः ।।282।।
- तपसो भामितो धाव स्स्पतिभ्यो हेतयः पते ।।283।।
- आयोऽध्वर्यो क्रतोऽधश्वे न्नान्य प्रग्रह पूर्वकः ।।284।।
- ग्रन्थान्तरेऽप्यनार्षेऽयं स्वेच्छया वर्तते त्विति ।।285।।

- इति ऐक्यप्रकरणम्।।5।।

- 16. स्वरधर्म स्वरूप प्रकरणम्

- वर्णानां कारणं वेद उदात्तादिस्वरा स्ततः

    ।।286।।
- तेषां तत्स्वरसन्धेश्च लक्षणं कथ्यतेऽधुना ।।287।।
- उदात्तोच्चारणे तस्य देहदैर्घ्यं भवे द्यतः ।।288।।
- उच्चारणेऽनुदात्तस्य देहस्य ह्रस्वता भवेत् ।।289।।
- भवे त्तत्र समाहार स्स्वरितश्चोच्चनीचयोः ।।290।।
- प्रचयश्च बुधैः प्रोक्त उदात्तश्रुति रित्यपि ।।291।।
- स्वारश्शीर्षे मुखेऽप्युच्च- प्रचयौ निहतो हृदि ।।292।।
- नीचोच्चस्वारप्रचयाः क्रमाज्ज्ञेयाः प्रजापतौ ।।293।।
- इति स्वरधर्मस्वरूपप्रकरणम्।।16।।
- 17. स्वरसन्धिप्रकरणम्
- मध्यस्थ एकनीचोऽतिप्रयत्नो विक्रमो भवेत् ।।294।।
- उच्चसन्धि र्भवे दुच्च स्स्वरित स्स्वारनीचयोः ।।295।।
- नीचोर्ध्वाकार सम्मिश्र उच्च एङ् स्वरितो भवेत् ।।296।।
- अत्राभिनिहतश्चाय - मिति संज्ञायते बुधैः ।।297।।

- यवत्वे ह्युच्चयो र्यत्र इवर्णोकारयोरपि ।।298।।
- परत स्स्वर्यते नीच - स्स्वरितः क्षैप्र उच्यते ।।299।।
- उच्चोत्वा न्नीच उत्वे स्यात् प्रश्लिष्ट स्सन्धितो यमः ।।300।।
- अखण्डे सयवो नित्यो नीचपूर्व स्स्वयञ्च वा ।।301।।
- स्थितस्वारस्य चान्त्योऽणु - र्नीच स्स्यात् प्रवणोत्तरे ।।302।।
- स्वरद्वयस्य चैकस्मिन् कम्पसंज्ञाऽस्ति दीर्घता ।।303।।
- क्षैप्रकम्प श्चतुर्धैव - मादूदेदैद्भि रुच्यते ।।304।।
- प्रश्लिष्टो नित्य ऊदाद्या- मेङाऽभिनिहत स्समृतः ।।305।।
- उच्चोर्ध्वौ यददीव्याऽऽदि त्रिके न कञ्चनेति च ।।306।।
- उच्चकम्पौ स्थितेङ्रूपौ स्वाराः कम्पाश्च सांहिताः ।।307।।
- उच्चा दुत्तरतो नीच स्स्वरितं प्रतिपद्यते ।।308।।
- स्वारोऽयं प्रचयश्चैव नोदात्तस्वरितोत्तरे ।।309।।
- स्वारा दुपरि नीचानां प्रचयः परिकीर्तितः ।।310।।
- यस्समानपदे स्वार स्तैरोव्यञ्जन उच्यते ।।311।।
- पादवृत्त स्तयो र्व्यक्ता - वन्यः प्रातिहत स्स्मृतः ।।312।।

- नित्योऽत्युच्च नीचः क्षैप्र स्तत्समो न्यूनतः परः ।।313।।
- दृढतर प्रयत्नस्स्या न्नित्ये क्षैप्रे च वा दृढः ।।314।।
- प्रश्लिष्टे चाभिनिहते मृदुता स्वल्पताऽन्यतः ।।315।।
- नादानुस्वारयोः पूर्व स्स्वारभा गुच्चवत् स्थितः ।।316।।
- स्वर्यैतेऽस्मात् परावेव नादानुस्वारकावपि ।।317।।
- भक्तिस्वारात् तदङ्गानज् - धृतवद्दपरे च रः ।।318।।
- आयपूर्वेऽथ चोच्चस्स्याद् भक्ते र्नीचो डधू अधः ।।319।।
- स्वार श्चाऽऽरण्यके भक्ते - रत्र शीर्षे स्त्रपूर्वके ।।320।।
- स्वर्यते चाऽऽदितो ह्रस्वो दीर्घमध्यं तथैव च ।।321।।
- संयुतोर्ध्वे तु दीर्घश्चे- दन्त्यस्वारो भवे त्तदा ।।322।।
- ऋकारोत्तर रेफोर्ध्वेऽवसाने दीर्घ एव च ।।323।।
- यो जटामात्रविद्ब्रह्मा सन्धिज्ञो विष्णु रुच्यते ।।324।।
- ईश्वर स्सर्वसन्धिज्ञ इत्येवर्षिभि रीरितः ।।325।।

- इति स्वरसन्धिप्रकरणम्।। 17

- 18. हस्तस्वर विन्यास प्रकरणम्

- कनिष्ठानामिका मध्या तर्जनीषूत्तमे करे ।।326।।
- नीच स्वार धृतोदात्ता - नङ्गुष्ठाग्रेण निर्दिशेत् ।।327।।
- आद्यन्त मध्या मध्यासु तद्रेखासु च तान् क्रमात् ।।328।।
- पृथक् तदङ्गुलि स्थानं भक्ते र्यस्स्वर उच्यते ।।329।।
- स्वार मुच्चमिवोर्ध्वञ्च ह्यनामिकाऽन्तरान्त्ययोः ।।330।।
- स्वारकम्पे स्वरावेता – वनामिकोत्तमाऽऽद्ययोः ।।331।।
- निर्दिशे दुच्चकम्पे च तर्जनीमध्यामाऽऽद्ययोः ।।332।।
- विरामे व्यन्जनस्यैव पृथक्स्थानं न विद्यते ।।333।।
- एवं हस्तस्वरन्यासे कथितश्च विनिर्णयः ।।334।।
- सुहस्त स्वरविन्यासा- न्निर्मलाध्ययनं भवेत् ।।335।।
- तत्पूतो ब्राह्मणो यस्तु ब्रह्मणा सह मोदते ।।336।।
- इति हस्तस्वर विन्यास प्रकरणम्।। 18
- 19. द्वित्वप्रकरणम्
- स्वरपूर्व इयाद् द्वित्वं व्यञ्जनं व्यञ्जनोत्तरे ।।337।।
- लपूर्वे च वपूर्वे च द्वित्वं स्पर्श उपाऽऽप्नुयात् ।।338।।

- अच्पूर्वा द्रादियाद् द्वित्वं वर्णमात्रोदये च हल् ।।339।।
- ह्रस्वा दन्तौ नङौ द्वित्व माप्नुतो ह्यच्परावपि ।।340।।
- ह्रस्वाद् द्वित्व मनुस्वारः प्राप्नुयात् संयुते परे ।।341।।
- तदनुस्वारपूर्वश्च संयोगाऽऽदि र्द्विरुच्यते ।।342।।
- इति द्वित्वप्रकरणम्।।19।।
- 20. पूर्वाऽऽगमप्रकरणम्
- व्यञ्जनं यन्निमित्तेन द्विवर्णमिति वर्णितम् ।।343।।
- द्वितीय तुर्ययो स्तेन भवेत् पूर्वाऽऽगमस्त्विह ।।344।।
- धामाननूपसर्गाश्च भूते थ एष आति च ।।345।।
- परमैभ्यः पराः पूर्व ञ्छखि भुजा इयु स्तथा ।।346।।
- समाने स्वरयो र्मध्ये लक्ष्याद् द्वित्वं हलः क्वचित्।।347।।
- द्वितीयस्य चतुर्थस्य तथा पूर्वाऽऽगम स्स्मृतः ।।348।।
- काठके तु पूर्णच्छिद्र - ञ्छकारः पूर्व माप्नुयात् ।।349।।
- शात् तैत्तिरीयके नस्य ञो भवे त्काठके न चेत् ।।350।।
- हकारान्योष्मण स्स्पर्श उत्तरे सकृदेव हि ।।351।।

- तन्मध्ये प्रथम स्स्यात् तत् -स्पर्श सस्थान आगमः ।।352।।
- ङ्कारादेव चानन्त्यात् तपरे धपरे सति ।।353।।
- ककारश्च गकारश्चे – त्यागमस्स्या द्यथाक्रमम् ।।354।।
- यत्रोष्मा विकृते स्पर्शा - दुत्तमोर्ध्वे त्वनुत्तमात् ।।355।।
- आनुपूर्व्या द्यमानेतान् वर्णय न्त्यागमान् बुधाः ।।356।।
- ऊष्मोत्तरे द्वितीय स्स्या- दादेशः प्रथमस्य तु ।।357।।
- ह्रस्वाद् द्विरूपव न्नादो यद्येनं सकृदुच्चरेत् ।।358।।
  - इति पूर्वाऽऽगमप्रकरणम्।। 20
- 21. द्वित्वनिषेध प्रकरणम्
- अथैतस्य प्रसक्तस्य प्रतिषेधस्तु कथ्यते ।।359।।
- ईदै त्पूर्वो यकारश्च विसर्गो रेफ एव च ।।360।।
- प्रथमोर्ध्वेऽच्परे चोष्मा वकार स्स्पर्श उत्तरे ।।361।।
- ऊष्मस्पर्शपरस्थे तु लकारश्च तथैव हि ।।362।।
- वर्गीया नुत्तमोर्ध्वे हल् सवर्णोत्तर एव वा ।।363।।
- यवहेषु परस्थेषु नकार श्चान्तगस्त्विति ।।364।।

- नस्यान्तगस्य दीर्घात्तु यवहे हे च हल् परे ।।365।।
- परे रेभि र्हि तस्यैव न स्यात् संयुतता तथा ।।366।।
- स्वरायुक्तस्य वर्णस्य वाचकं नाम कथ्यते ।।367।।
- वर्णक्रमोक्तिकाले तु नान्यसंज्ञां समुच्चरेत् ।।368।।
- सर्ववर्णान् वदन्त्येवं ज्ञातौ द्वित्वाऽऽगमौ न तु ।।369।।
- ततोऽफलं, फलं प्रोक्तं द्वित्वाद्युच्चारणाद् बुधैः ।।370।।
- इति द्वित्वनिषेध प्रकरणम्।। 21

- 22. अङ्गसंहिता प्रकरणम्

- स्वराणां पूर्वतश्चैव ह्युदात्तादिस्वरा स्स्मृताः ।।371।।
- व्यञ्जनानां तदाप्त्यर्थ - मङ्गताऽद्य विधीयते ।।372।।
- परस्य व्यञ्जनश्चाङ्गं पूर्वस्याचोऽवसानगम् ।।373।।
- ऋकारे परभूते च रेफः पूर्वाङ्गता मियात् ।।374।।
- अनुस्वारो विसर्गश्च स्वरभक्ति रसंयुतः ।।375।।
- योगाऽऽदि च परायुक्तं पूर्वस्याङ्गं तथा स्मृतम् ।।376।।
- न पूर्वाङ्गं भवेत् स्पर्श ऊष्मणो विकृतिर्यदि ।।377।।

- पराङ्गं प्रचयाद् भक्तिः प्रचये त्वृपरे च रः ।।378।।
- अन्तस्थोदय मङ्गं स्या - दसवर्णं परस्य च ।।379।।
- ऊष्मण्यूर्ध्वे पराङ्गे तु स्पर्शश्चैव यमास्त्विवति ।।380।।
- इति अङ्गसंहिताप्रकरणम्।।22।।
- 23. स्वरभक्तिप्रकरणम्
- स्वरोर्ध्वोष्मणि रेफस्य लस्यापि स्वरभक्तिता ।।381।।
- तन्मध्ये ऋत्व ऌत्वे च स्वरभक्तिं प्रकल्पयेत् ।।382।।
- हपरे तु हलन्ता स्यात् स्वरभक्तिस्तु संवृता ।।383।।
- अजन्ता शषसोर्ध्वे च विवृता समुदीरिता ।।384।।
- स्वरभक्तिः करेणू रो होर्ध्वो लः कर्विणी भवेत् ।।385।।
- हरिणी शषसोर्ध्वो रो लकारो हारितोच्यते ।।386।।
- दीर्घात्स्वारा दनन्त्या च स्वाराद् भक्तिः पृथग्भवेत् ।।387।।
- प्रत्येकस्वरभाग् यश्च न भक्ति र्निहते च हे ।।388।।
- इति स्वरभक्तिप्रकरणम्।।23।।
- 24. स्थान करण प्रयत्न प्रकरणम्

- वायौ चरत्युरस्यन्त र्मन्द्र उद्भवति ध्वनिः ।।389।।
- कण्ठे च मध्यमो ज्ञेय श्शीर्षे तार स्स्वशक्तितः ।।390।।
- उच्चार्यते त्रिभि स्तैस्तु याव दध्ययनं क्रमात् ।।391।।
- नाद श्श्वासो हकाराकौं कण्ठेऽल्पे विवृतेऽधिके ।।392।।
- अज्घोषा नादतो जाता ह्चतुर्था हकारजाः ।।393।।
- प्रथमा श्श्वासतोऽन्येऽर्का - दघोषाश्च ततो यमाः ।।394।।
- कण्ठो वक्रादि मध्यान्तं दन्तमूलान्त नासिकम् ।।395।।
- ताल्वोष्ठ मुर स्स्थानानि वर्णानां करणान्यधः ।।396।।
- उवर्णप्रकृते रोष्ठौ दीर्घौ स्त औत् परस्य च ।।397।।
- अव्यञ्जन स्वराणाञ्च आदौ कण्ठ इतीरितः ।।398।।
- ओष्ठताल्ववर्णेवर्णे व्यस्त संवृतमैत्यपि ।।399।।
- औति चोष्ठौ स्त ओत्यल्पा- धिकावेत्योष्ठतालु च ।।400।।
- कवर्गाऽऽदिषु जिह्वादि- मध्यान्तोष्ठे न चोपरि ।।401।।
- टवर्गे वक्रमध्ये ळे जिह्वाग्रेणोपरि स्पृशेत् ।।402।।
- मध्यान्ताभ्याञ्च तालौ ये रेफे जिह्वाऽग्रमध्यतः ।।403।।

- लकारे दन्तमूलेषु जिह्वाग्रेणोपरि स्पृशेत् ।।404।।
- वे चोष्ठान्तेन दन्तेषु स्पर्शस्थाना य ऊष्मकाः ।।405।।
- हकारश्च विसर्गश्च कण्ठस्थाना वितीरितौ ।।406।।
- प्रयत्नश्चोष्मणां व्यस्त इणोऽन्येषा मचां भवेत् ।।407।।
- केवलानाञ्च सर्वेषा मत्यल्पस्पृष्टता स्मृता ।।408।।
- स्पृष्टत्वं स्पर्शसंज्ञानां परेषां किञ्चि दुच्यते ।।409।।
- अतिस्पृष्टो द्वितीयेषु चतुर्थेषु च तत्समः ।।410।।
- हकारं तत्र नासिक्य - मुत्तमोत्तरमेव च ।।411।।
- अन्तस्थापर मित्यत्र उरस्यञ्च विदु र्बुधाः ।।412।।
- विज्ञेया नित्यनासिक्या यमानुस्वार पञ्चमाः ।।413।।
- अजन्तस्था हकारश्च निमित्तेन तु कीर्तिताः ।।414।।
- इति स्थान करण प्रयत्न प्रकरणम्।।24।।
- 25. प्लुत प्रकरणम्
- अकारान्तः प्लुतो यश्चे दनुनासिक उच्यते ।।415।।
- अमत्र ध्वनि तुल्यश्च रङ्गसंज्ञ इतीर्यते ।।416।।

- श्लोकाँ गलाँ ममाँ ह्रताँ यद्धाँ एवेति च प्लुताः ।।417।।
- दीर्घा देवाँ उ ताँ इम्य- मृवाँ अ स्वाँ अहं कठे ।।418।।
- पत्नीवा श्चेतव्याः कार्या- श्चित्यारभ्याः प ता उ च ।।419।।
- होतव्याँ सत्यराजांश्च सृज्याँ प्राश्यांश्च मीयताम् ।।420।।
- कर्तव्या सहस्रा3 मद्राक् सो क्रामाश्च हा इति ।।421।।
- ब्रह्मान् त्वं द्विपदां हौषां स्थेया अग्ना इवत्यगान् ।।422।।
- हावरत्नी श्छिनत्ती च जुहवानी च गच्छती ।।423।।
- एती लाजी ञ्छाचीन् सर्वे त्वन्तोदात्ताः प्लुता इमे ।।424।।
- पत्या इति गृहा इ त्वी उत्ताना इत्यवेरपाः ।।425।।
- सोमपा असोमपा द्वा- वश्नुता उवतिष्ठिपाय् ।।426।।
- सावित्रान्न वेत्था द्वौ व्यमग्निहोत्रा न्न चेति च ।।427।।
- अवेत्योऽवभृथा ना द्वौ रभ्यः पशू श्श्रृतं हवीः ।।428।।
- स्थेयोऽग्नीर्ध स्विदासीद्वा - वस्तु ही इव विन्दती ।।429।।
- नकं त्रिपञ्चाश दूर्ध्वं चतुर्णां दशमाः प्लुताः ।।430।।
- नवदशाज्झलोळश्चा - प्यनुस्वारौ विसर्गजौ ।।431।।

- चतुर्भक्ति यमाश्चेति वर्णा ष्षड्वष्टि रीरिताः ।।432।।
- इति प्लुतप्रकरणम्।।24।।
- 25. ओष्ठ्य प्रकरणम्
- मध्ये वकारेऽनुस्वारे विरामे ऽसंयुते स्थिते ।।433।।
- अप्यौकारे परे व्यक्तौ द्विरोष्ठ्याविति निश्चितौ ।।434।।
- संयुत श्चोष्ठ्यमध्ये हो विसर्गा दुत्तरश्च पः ।।435।।
- तालुभ्यां वायु मापूर्य माण्डूकोष्ठ्यः पर स्स्मृतः ।।436।।
- स्पर्शयो स्संयुते यत्र पाठे चावसरे यदि ।।437।।
- आदे रीषच्छ्रुति र्ज्ञेया विरामे मस्य चैव हि ।।438।।
- विरामे वर्ग्यपूर्वस्य प्रयत्नः क्रियते पृथक् ।।439।।
- ओमः पवर्ग ऊर्ध्वे च न प्रयत्नः पृथक्तथा ।।440।।
- इति ओष्ठ्यप्रकरणम्।।26।।
- 27. काल निर्णय प्रकरणम्
- चाषोक्त एकमात्रस्स्या- द्वायसेन द्विमात्रिकः ।।441।।
- मयूरेण त्रिमात्रश्च जानीयात् काललक्षणम् ।।442।।

- कालोऽतिसूक्ष्मकोऽणु स्स्या- न्मात्रार्द्धं व्यक्तमात्रिकम् ।।443।।
- अङ्गुलिस्फोटनं यावान् तावान् कालस्तु मात्रिकः ।।444।।
- हल्युक्तं हलुत्तरं त - दणुमात्रं प्रकीर्तितम् ।।445।।
- विरामे वर्णयो र्मध्ये ह्यणुकालो ऽप्यसंयुते ।।446।।
- हलो भक्ति र्विसर्गोऽन्तो ह्रस्वा न्नो यवहोत्तरः ।।447।।
- स्पर्शोर्ध्वो वोऽर्धमात्रास्ते ऽवसाने लस्त्रिपादता ।।448।।
- विसर्गान्ते ऽर्धमात्रस्स्या- द्विरामः क्षपरेऽपि च ।।449।।
- संयुतोर्ध्वे च पूर्वत्र द्विरोष्ठ्येऽप्यौवयो स्तथा ।।450।।
- पिपीलिका दीर्घसमेच मध्यमा सवर्णता पाकवती पदैक्ये।।451।।
- दृष्टाऽचि वत्सानुसृति – स्त्वसाम्ये
- प्यधोऽणुमुख्यास्तु विरामकालाः ।।452।
- स्वरोदये त्वनुस्वारो भवे दध्यणुमात्रिकः ।।453।।
- विरामश्च तयो र्मध्ये वैशेषिका विदीर्घयोः ।।454।।
- प्रणवान्ते पवर्गोर्ध्वे - ऽवग्रहस्यान्त एव च ।।455।।
- वाक्यान्ते तु विरामश्च सार्धमात्रः प्रकीर्तितः ।।456।।

- पदप्रणवयो र्नित्यं विराम स्स्याद् द्विमात्रिकः ।।457।।
- द्रुता द्धल् स्वरसम्बन्धे तयो स्तत्स्वरकालवत् ।।458।।
- अनुस्वारो द्विमात्रस्स्या - द्रेफोष्मसु परेषु च ।।459।।
- संयुतोत्तर इत्येष एकमात्रः प्रकीर्तितः ।।460।।
- स्यातां सोर्ध्व खथोर्ध्वे च ङनौ ह्रस्वाद्विमात्रिकौ ।।461।।
- षपरा नित्य खथोर्ध्वे हकारे हल्परे तथा ।।462।।
- असंयुतश्च नो दीर्घा - न्मात्रिको यवहोत्तरे ।।463।।
- ह्रस्वा न्नादो द्विमात्रस्स्या - दन्यत्राप्येकमात्रिकः।।464।।
- केवलप्रणवे तु स्यात् स्वर स्सार्द्ध द्विमात्रिकः ।।465।।
- मकारान्तो यजुष्युच्च स्स्वरिता ओम् तदादिषट्।।466।।
- अजेक द्वि त्रि मात्रा स्त्रि - रेको द्विश्चैकगो द्विगाः।।467।।
- त्रिमात्रत्वं विरामस्य ऋगन्तेऽर्धान्त एव च ।।468।।
- होता यक्षदिति त्वन्ते देवं बर्हिश्च पञ्चमे ।।469।।
- सहाम्भसि पितृप्रश्न ऋक्स्याद् वाङ्निधनेन चेत् ।।470।।
- काण्डप्रश्नानुवाकान्ते दशाष्टपञ्च मात्रिकाः ।।471।।

- ग्रन्थानां परिपूर्णे तु त्रिगुणः काल उच्यते ।।472।।
- ह्रस्वस्स्या देकमात्रस्य द्विमात्रस्य तु दीर्घता ।।473।।
- त्रिमात्रस्य प्लुतोऽचां हि पादो मात्राचतुर्थकः ।।474।।
- शीघ्रं विलम्बितं मध्यं तिस्रो वाक्यस्य वृत्तयः ।।475।।
- कालान्यता च यद्वृत्तौ तदा कर्मान्यता भवेत् ।।476।।
- प्रयत्नात् कालतश्चोक्ता स्तद्वर्णा उद्भवन्ति हि ।।477।।
- तदभावे वर्णाभाव स्सम्यग्ज्ञेयं द्वयं ततः ।।478।।
- मध्यमां वृत्ति माश्रित्य चैवं काला स्सुनिश्चिताः ।।479।।
- प्रातिशाख्याऽऽदिषु ह्यत्र वृत्तिस्सैव समाश्रिता ।।480।।
- इति कालनिर्णयप्रकरणम्।।27।।
- 28. उच्चारण फल प्रकरणम्
- न विश्रम श्चैकपदे प्रोन्न्या निस्सुविसं परम् ।।481।।
- च न ह्यु वा स्म ह त्वीं वै न्वेतेभ्योऽधश्च कूटतः ।।482।।
- व श्रीर्दैघ धया उच्चा स्स्थापितव्या स्स्वरं गताः ।।483।।
- नैवं तृतीयसम्बन्धाः प्रयोगान्तर इत्यपि ।।484।।

- युक्तोर्ध्वं व्यञ्जनान्तञ्च दीर्घं गुर्वितरल्लघु ।।485।।
- तत् त्रिस्त्रिरक्षरा श्चैव गणा इति बुधैस्स्मृताः ।।486।।
- त्रिलो न स्स्वस्त्रिगुरुर्मो भू - रादौ केन्दू यभौ शुभम् ।।487।।
- द्यौस्तोऽन्ते सोऽनिल स्तापं मध्येऽग्न्यर्कौ रजौ क्रमात्।।488।।
- अदादे त्प्रथमयषा ल्नासिक्याः क्षशोत्तराः ।।489।।
- अनिलाग्नि महीन्द्वर्काः पञ्चानां त्वधिदेवताः ।।490।।
- ब्रह्मजाति र्भवे दुच्चः क्षत्रजातिस्तु नीचकः ।।491।।
- वैश्यजाति र्भवेत् स्वार श्शूद्रस्तु प्रचय स्स्मृतः ।।492।।
- उदात्त स्सात्त्विकः प्रोक्त स्स्वरितो राजस स्स्मृतः ।।493।।
- निहतप्रचयावेतौ तामसौ तु विदु र्बुधाः ।।494।।
- स्वराश्च प्रथमाश्चैव द्वितीया ब्रह्मजातयः ।।495।।
- तृतीयाश्च चतुर्थाश्च क्षत्रजातय ईरिताः ।।496।।
- उत्तमाश्चैव मन्तस्था वैश्या हि परिकीर्तिताः ।।497।।
- अनुस्वारो विसर्गश्च ह्यूष्माणोऽवरजा स्स्मृताः ।।498।।
- यदन्यजाति रुच्येत तत्तत्संहारको भवेत् ।।499।।

- यज्ञात्युच्चारणे तेषां तज्ज्ञाति परिरक्षणम् ।।500।।
- वर्णोच्चारण इत्यत्र समग्रं लक्षणं स्मृतम् ।।501।।
- न्यूनातिरेकराहित्यं ब्रह्म भक्ति र्यथोच्चरेत् ।।502।।
- सुव्यक्त स्सुस्वरो धैर्यं तच्चित्तत्वं चतुर्गणाः ।।503।।
- एतद्युक्तः पठे द्वेदं स वेदफल मश्नुते ।।504।।
- अध्यायस्य मुखे चान्ते भूत्वा विद्वा नतन्द्रितः ।।505।।
- संरक्षणाय वेदाना मोङ्कारं तूच्चरेत् सदा ।।506।।
- स्रवत्यादा वनुक्ते च तस्यान्ते तु विशीर्यते ।।507।।
- आद्यान्तप्रणवौ तस्य स्याता मङ्गानि वै ततः ।।508।।
- संहिता पदसन्धीनां वर्णानां लक्षणन्त्वपि ।।509।।
- छन्द आदीनि शास्त्राणि ह्युपाङ्गानि बिदु र्बुधाः ।।510।।
- ध्वनि स्स्थानञ्च करणं प्रयत्नः कालता स्वरः ।।511।।
- देवता जाति रेतैश्च वर्णा ज्ञेया विचक्षणैः ।।512।।
- यजुर्वेदः पिङ्गलाक्षः कृशमध्यो बृहद्गलः ।।513।।
- बृहत्कपोलः कृष्णाङ्घ्रि - स्ताम्रः काश्यपगोत्रजः ।।514।।

- लक्षणेन विनाऽध्यायं यः पठेदपि सर्वदा ।।515।।
- नैव तत्फल माप्नोति स विप्र स्सुजनोऽपि हि ।।516।।
- संहिता पद वर्णानां कालाऽऽदीनाञ्च लक्षणम् ।।517।।
- हल् विसर्गाच् स्वराणाञ्च सन्धे र्लक्षणमेव च ।।518।।
- एतानि सम्यगष्टौ च विदित्वा लक्षणानि यः ।।519।।
- अध्यायं स पठत्येव द्वितीयं ब्रह्म कथ्यते ।।520।।
- संहिताञ्च पदं वाऽपि क्रमञ्चैव जटां पठन् ।।521।।
- लक्षणज्ञ स्तदाप्नोति ब्रह्मज्ञानं हि शाश्वतम् ।।522।।
- वेदामृतं पिबे द्यस्तु स तस्माद् भूसुरो भवेत् ।।523।।
- एवञ्च व्यासशिक्षाविद् भूसुरेन्द्रस्स कथ्यते ।।524।।
- श्रीमत्परब्रह्म सुपूर्णचित्त श्रीव्यासकण्ठ प्रसृताञ्च शिक्षाम्।
- एता मभिज्ञः प्रयतः पठेद्य स्सर्वा नभीष्टांश्च समश्नुते वै।।525।।

समाप्ता व्यासशिक्षा

## 12)    शुक्लयजुःप्रातिशाख्यम्

अथ प्रथमोऽध्यायः

- जपादौ नाधिकारोऽस्ति सम्यक्पाठमजानतः ।
- प्रातिशाख्यमतो ज्ञेयं सम्यक्पाठस्य सिद्धये ॥
- स्वरसंस्कारयोश्छन्दसि नियमः १
- लौकिकानामर्थपूर्वकत्वात् २
- न समत्वात् ३
- ख्याद्वाम्नायधर्मित्वाच्छन्दसि नियमः ४
- यत्तत्र ५
- वायु खात् ६
- शब्दस्तत् ७
- सङ्करोपहितः ८
- स सङ्घातादीन् वाक् ९
- त्रीणि स्थानानि १०
- द्वे करणे ११

- शरीरात् १२
- शरीरम् १३
- शरीरे १४
- तेषां समूहात् स उदयंस्त्रैकाल्यम् १५
- ओंकारः स्वाध्यायादौ १६
- ओंकाराथकारौ १७
- ओंकारं वेदेषु १८
- अथकारं भाष्येषु १९
- प्रयतः २०
- शुचौ २१
- इष्टम् २२
- ऋतुं प्राप्य २३
- योजनान्न परम् २४
- भोजनं मधुरं स्निग्धम् २५
- वर्णदोषविवेकार्थम् २६

- तिङ्कृत्तद्धितचतुष्टयसमासाः शब्दमयम् २७
- तां वाचमोंकारं पृच्छामः २८
- अथ शिक्षा विहिताः २९
- सवनक्रमेणोरःकण्ठभ्रूमध्यानि ३०
- आयाममार्दवाभिघाताः ३१
- उच्चनीचविशेषः ३२
- अथाख्याः समाम्नायाधिकाः प्राग्निफितात् ३३
- उपदिष्टा वर्णाः ३४
- अन्त्याद्वर्णात् पूर्व उपधा ३५
- निर्देश इतिना ३६
- कारेण च ३७
- अव्यवहितेन व्यञ्जनस्य ३८
- र एफेन च ३९
- स्वरैपि ४०
- नानुस्वारयमविसर्जनीयजिह्वामूलीयोपध्मानीयाः४१

- दन्त्यस्य मूर्द्धन्यापत्तिर्नतिः ४२
- समानस्थानकरणास्यप्रयत्नः सवर्णः ४३
- सिमादितोऽष्टौ स्वराणाम् ४४
- सन्ध्यक्षरं परम् ४५
- अकण्ठ्यो भावी ४६
- व्यञ्जनं कादि ४७
- अनन्तरं संयोगः ४८
- स्पर्शोष्वेव संख्या ४९
- द्वौ द्वौ प्रथमौ जित् ५०
- ऊष्माणश्च हवर्जम् ५१
- मुच्च ५२
- धि शेषः ५३
- द्वितीयचतुर्थाः सोष्माणः ५४
- अमात्रस्वरो ह्रस्वः ५५
- मात्रा च ५६

- द्विस्तावान् दीर्घ ५७
- प्लुतस्त्रिः ५८
- व्यञ्जनमर्धमात्रा ५९
- तदर्धमणु ६०
- परमाणवर्धाणुमात्रा ६१
- स्थाने ६२
- हस्तग्रहणे दीर्घप्लुतौ प्रतीयात् ६३
- प्रथमग्रहणे वर्गम् ६४
- ऋ::कौ जिह्वामूले ६५
- इचशेयास्तालौ ६६
- षटौ मूर्धनि ६७
- रो दन्तमूले ६८
- लृलसिता दन्ते ६९
- उवोःप्पा ओष्ठे ७०
- अहविसर्जनीयाः कण्ठे ७१

- सवर्णवच्च ७२
- ऐकारौकारयोः कण्ठ्या पूर्वा मात्रा ताल्वोष्ठ्योरुत्तरा ७३
- यमानुस्वारनासिक्याना नासिके ७४
- मुखनासिकाकरणोऽनुनासिकः ७५
- दन्त्या जिह्वाग्रकरणाः ७६
- रश्च ७७
- मूर्द्धन्याः प्रतिवेष्ट्याग्रम् ७८
- तालुस्थाना मध्येन ७९
- समानस्थानकरणा नासिक्यौष्ठ्याः ८०
- वो दन्ताग्रैः ८१
- नासिकामूलेन यमाः ८२
- जिह्वामूलीयानुस्वारा हनुमूलेन ८३
- कण्ठ्या मध्येन ८४
- प्रथमोत्तमाः पदान्तीया अचञौ ८५
- विसर्जनीयः ८६

- स्वराश्च लृकारवर्जम् ८७
- णकारर्कविवग्रहे ८८
- अनुनासिकाश्चोत्तमाः ८९
- स्पर्शान्तस्य स्थानकरणविमोक्षः ९०
- अवसाने च ९१
- प्रगृह्यम् ९२
- एकारेकारोकारा द्विवचनान्ताः ९३
- ओकारश्च पदान्तेऽनवग्रहः ९४
- उकारोऽपृक्तः ९५
- चमू अस्मे त्वे ९६
- मे उदात्तम् ९७
- अमी पदम् ९८
- स्वरोऽक्षरम् ९९
- सहाद्यैर्व्यञ्जनैः १००
- उत्तरैश्चावसितैः १०१

- संयोगादि पूर्वस्य १०२
- यमश्च १०३
- क्रमजं च १०४
- तस्माच्चोत्तरं स्पर्शे १०५
- अवसितं च १०६
- व्यञ्जनं स्वरेण सस्वरम् १०७
- उच्चैरुदात्तः १०८
- नीचैरनुदात्तः १०९
- उभयवान् स्वरितः ११०
- एकपदे नीचपूर्वः सयवो जात्यः १११
- उदात्तादयः परे सप्त ११२
- त्रयो नीचस्वरपराः ११३
- एतोऽद्यामकारो लुगभिनिहितः ११४
- युवर्णौ यवौ क्षैप्रः ११५
- इवर्ण उभयतोह्रस्वः प्रश्लिष्टः ११६

- स्वरो व्यञ्जनयुतस्तैरोव्यञ्जनः ११७
- उदवग्रहस्तैरोविरामः ११८
- विहत्तिलक्षणः पादवृत्तः ११९
- उदाद्यन्तो न्यवग्रहस्ताथाभाव्यः १२०
- हस्तेन ते १२१
- चत्वारस्तिर्यक् स्वरिताः १२२
- अनुदात्तं चेत्पूर्वं तिर्यङ् निहत्य काण्वस्य १२३
- ऋजुं निहत्य प्रणिहन्यन्त उदात्ते १२४
- तीक्ष्णोऽभिनिहितः परस्परं मृदुस्त्वन्यः १२५
- तस्यादित उदात्तं स्वरार्धमात्रम् १२६
- सप्त १२७
- त्रीन् १२८
- द्वौ १२९
- एकम् १३०
- सामजपन्यूङ्खवर्जम् १३१

- प्रावचनो वा यजुषि १३२
- तमिति विकारः १३३
- तस्मिन्निति निर्दिष्टे पूर्वस्य १३४
- तस्मादित्युत्तरम्यादेः १३५
- षष्ठी स्थानेयोगा १३६
- तेनेत्यागमः १३७
- अन्तरेण पर्वणी १३८
- पर एकस्मात् १३९
- उभयोर्विकारः १४०
- वर्णस्यादर्शनं लोपः १४१
- विकारी यथासन्नम् १४२
- संख्यातानामनुदेशो यथासंख्यम् १४३
- सन्निकृष्टविप्रकृष्टयोः सन्निकृष्टस्य १४४
- पूर्वोत्तरयोरुत्तरस्य १४५
- द्विरुक्तमाम्रेडितं पदम् १४६

- संहितं स्थितोपस्थितम् १४७
- संहितावदवग्रहः स्वरविधौ परं च सर्वं चेदनुदात्तम् १४८
- इतिपरस्तिर्यङ्नीचोऽन्तोदात्ते मध्योदात्ते पर्वणि काण्वस्य वा १४९
- उदात्तमयोऽन्यत्र नीच एव १५०
- एकवर्णं पदमपृक्तम् १५१
- स एवादिरन्तश्च १५२
- अवग्रहः पदान्तवत् १५३
- न त्वितिकरणम् १५४
- पूर्वेणोत्तरः संहितः १५५
- पदविच्छेदोऽसंहितः १५६
- एकपदद्विपदत्रिपदचतुष्पदानेकपदाः पादाः १५७
- वर्णानामेकप्राणयोगः संहिता १५८
- विप्रतिषेध उत्तर बलवदलोपे १५९
- विसर्जनीयो रिफित १६०

- करनुदात्तम् १६१
- अन्तरनाद्युदात्तम् १६२
- अहरभकारपरम् १६३
- आवर्वरिति समानर्चि १६४
- स्तोतर्वस्तः सनुतरभार्वाद्वाः १६५
- स्वः पदमनरणे १६६
- पदादिश्चाजित्परः १६७
- ह्वाः सवितः पुनस्त्वष्टर्नेष्टरकर्होतर्मातःप्रातर्जामातरजीगः प्रणेतरिति च १६८
- वृद्धं वृद्धिः १६९
- इति कात्यायनप्रातिशाख्यसूत्रे प्रथमोऽध्यायः
- द्वितीयोऽध्यायः
- [सम्पाद्यताम्]
- अथ द्वितीयोऽध्यायः
- स्वरितवर्जमेकोदात्तं पदम् १

- अनुदात्तम् २
- नो नौ मे मदर्थे त्रिद्व्येकेषु ३
- मा च ४
- वो वान्ते त्वदर्थे ५
- त्वा च ६
- पूर्ववाननुदेशः ७
- असि ८
- यथा गृभोभुवोऽग्निभ्यः ९
- गिर्वणः १०
- अग्ने घृतेनेति च ११
- प्रचिकितश्च १२
- एनोऽपापे १३
- इहपूर्वं श्रतम् १४
- मन्ये पदपूर्वं सर्वत्र १५

- वा च कमु चित्समस्मात् च ह स्म त्व ईम्मर्या अरे स्विन्नि पाताश्चेत् १६
- पदपूर्वमामन्त्रितमनानार्थेऽपादादौ १७
- तेनानन्तरा षष्ठ्येकपदवत् १८
- न पृथिवि देवयजन्योषध्यादेवभूरेःपवित्रपतेपवित्रपूतस्यापान्नृणां नृपते सोमाग्नेःसोमेन्द्रस्यसोमसुवीर्यस्यसोमविश्वेषां देवानां प्रजा पते यस्य यस्य देवाग्रे तवाग्ने वाजस्याग्ने वरुणस्यापो अस्मा कम् १९
- सुमङ्गलसत्यराजन्विकिरिद्रविलोहितदरिद्रनीललोहितश्रेयस्कर भू यस्कराम्बेअम्बिकेऽम्बालिकेशरव्येब्रह्मसंशितेमरुतोअश्विना यव्ये गव्येद्यावापृथिवीउरोअग्ना३इपह्वीवंह्लाजी३ञ्छची३न्मीदुष्टम शिव तमसहस्त्राक्षशतेषुधेवसुपतेवसुदावन् २०
- इडोत्तराणि नव स्वानोत्तराणि षडग्न्युत्तराणि चत्वारि भगोत्तराणि चेन्द्रोत्तरमेकं सिनीवाल्युत्तरं च प्रजापतये बह्मन्निति च २१

- भूतिराद्युदात्तम् २२
- कदा नरिष्येमपूर्वम् २३
- आमन्त्रितं च २४
- कृष्णो मृगसंयोगे २५
- व्ययवांश्चान्तः २६
- परः प्रधाने २७
- मात्रा च परिमाणे २८
- दक्षिणा च २९
- न दशविश्वकर्मानिषद्येन्द्रस्यपातुसदः सञ्ज्ञेषु ३०
- कर्णः स्वाङ्गे ३१
- महो नपुंसके ३२
- श्रवश्च ३३
- अन्धो वीर्ये ३४
- एता वर्णे ३५
- रोहितश्च केवलः ३६

- यन्त्री राट् ३७
- ओषधीरनामन्त्रिते ३८
- सर्व विश्व मानुषाशाः स्वाहा वाजःपयो नमः ३९
- असिशिवासुषदापयस्वतीयत्तेमधुमतीर्वर्चस्वानोजिष्ठोभ्राजिष्ठःशुष्मिणीभद्रवाच्यायवन्योमेध्योयमआदित्यस्त्रितःसोमेनस्वसेत्येतेषु ४०
- धनदारत्नधाम्यां च ४१
- रायोऽपोषे ४२
- न भागमीशिषयोः ४३
- त्रिधा बद्धहितयोः ४४
- सुकृतं भूते ४५
- द्विरुदात्तानि ४६
- बृहस्पतिर्वनस्पतिर्नराशंसस्तनूनप्त्रेतनूनपान्नक्तोषासोषासानक्ताद्यावापृथिवीद्यावाक्षामाक्रतूदक्षाभ्यामेतवाअन्वेतवा इति च ४७
- देवताद्वन्द्वानि चानामन्त्रितानि ४८

- इन्द्राबृहस्पतिभ्यामिन्द्राबृहस्पती इति त्रीणि ४९
- सर्वमग्ना३इ लाञ्जीञ्छाची३नीति त्रिमात्राणि च ५०
- प्रणवश्च ५१
- विवेशा३ इति चानुदात्तम् ५२
- आसी३दिति चोत्तर विचारे ५३
- पूर्वमन्तोदात्तम् ५४
- द्वन्द्वं चेह्मद्रसोमपूर्वं पूषाग्निवायुषु ५५
- अग्निश्चेन्द्रे ५६
- ऋक्साम्नि च ७७
- यतो गतौ ५८
- पायोर्विशः ५९
- आयुरर्यमोर्वश्यस्तिभ्यः ६०
- अस्य रोचनासौबोधा मेपारंपुर एतारोदिवः कोऽहंत्वंमहीं?य ईश ईशानेभ्यः ६१

- प्रत्नांयज्ञस्यहविषः

  पाहीत्पातंमध्वोयजमानस्यहोतुरजरासोलोकेषु च ६२
- अनुदात्तमन्यत् ६३
- पक्तोर्हसयोरन्त उदात्त आदिर्वा ६४
- वृद्धं वृद्धिः ६५
- इति कात्यायनप्रातिशाख्यसूत्रे द्वितीयोऽध्यायः
- तृतीयोऽध्यायः
- [सम्पाद्यताम्]
- अथ तृतीयोऽध्यायः
- संहितायाम् १
- अर्थः पदम् २
- पदान्तपदाद्योः सन्धिः ३
- न परकालः पूर्वकाले पुनः ४
- द्व्यन्तराः कालाः ५
- विसर्जनीयः ६

- चछयोः शम् ७
- तथयोः सम् ८
- प्रत्ययसवर्णं मुदि शाकटायनः ९
- अविकारं शाकल्यः शषसेषु १०
- प्रकृत्या कखयोः पफयोश्च ११
- जिह्वामूलीयोपध्मानीयौ शाकटायनः १२
- लुङ् मुदि जत्परे १३
- उपवसने पीवः १४
- स ओषधीमयोः १५
- व्यञ्जने च १६
- स्य एष च १७
- निशब्दो बहुलम् १८
- अनितावध्याये १९
- इतिवच्चर्चायाम् २०
- ककारपकारयोः सकारम् २१

- भाव्युपधः षकारम् २२
- आविर्निरिड इडाया वसतिर्वरिवः २३
- दिवोऽककुत्पृथिव्योः २४
- रायः सहसः पोषपुत्रयोः २५
- तमसोऽपरस्तात् २६
- तपसस्पृथिव्याम् २७
- अध्वनो रजसो रिषः स्पृशस्पतौ २८
- अध्वनस्कुर्विति च २९
- समानपदे च ३०
- परावसाने ३१
- कविः करत्कृधिषु ३२
- कृषीश्च कृधौ सकारम् ३३
- सदो द्यौर्नमस्कृतंपितापथेषु ३४
- पति तालव्यस्वरोदये ३५
- पदे च ३६

- न परुषः परुषि ३७
- वाजपतिर्वास एदिधिषुरन्तः पर्शव्येनान्तः पार्श्व्यमिति च ३८
- अहः पतौ रेफम् ३९
- परश्च मूर्धन्यम् ४०
- स्वर्धूः सांसहयोः ४१
- उकारं दुर्दे ४२
- नाशे च ४३
- पुरो दाशे ४४
- अनसो वाहौ सकारो डकारम् ४५
- ओकारमितः सिञ्चतौ सोपधः ४६
- षड् दशदन्तयोः संख्यावयोऽर्थयोश्च ४७
- त आघादनाडम्बरात् ४८
- वनसदोऽवेटो रेफेण ४९
- पत्यौ च सकारेण ५०
- ऋतावरौ च पतिपरयोः ५१

- तद्बृहतौ करपत्योस्तलोपश्च ५२
- परि कृते षकारेण ५३
- चन्द्रे सु शकारेण ५४
- दुधुक्षन्धो दकारम् ५५
- भाविभ्यः सह् षं समानपदे ५६
- अनुस्वाराच्च तत्पूर्वात् ५७
- करेफाभ्यां च ५८
- नेः सीदतेः ५९
- ससाद् च ६०
- ओकारात्सु ६१
- ओश्चापृक्तम् ६२
- अभेश्च ६३
- परेश्च सिञ्चतेः ६४
- अभेश्च ६५
- अव्यवहितोऽपि ६६

- वेर्युदयः ६७
- हेर्मिथोदयः ६८
- द्यवेश्च ६९
- नेः स्त्यास्तनो ७०
- ततक्षौ ७१
- अनोः स्तुवनत्याम् ७२
- दुःष्वप्न्यम् ७३
- वन्दारुर्माकिः ७४
- सहेः पृतनायाः ७५
- सधिरंशुरदितिः ७६
- वायुरग्निरग्नेरेकाक्षरे ७७
- सकारपरे च ७८
- मातृभिरर्चिभिः पायभिर्वरुत्रीः ७९
- षात्तथौ मूर्धन्यम् ८०
- प्रकृत्या नानापदस्थे तकारे ८१

- अनुसन्तनोतु बृहस्पतिसुतस्य सुसमिद्धाय सुसंदृशमभिसत्त्वाभि संविशन्तु सुसस्या अतिस्थूलं मुसले पत्नीसंयाजान् क्रतुस्थलाञ्जिसक्थो दिवस्पृशा हृदिस्पृशं हंसीर्ऋक्सामयोर्ऋक्सामाभ्यां तित्तिरिः सीसेन सीसाः सीसं पशुसनि गोसनिः प्रतिसदृङ् प्रतिसदृक्षासश्चतुस्त्रिंशत् ८२
- धकाररेफारुदयः ८३
- पृथिविदिव्युपरिचर्षणिशकुनियासिभ्यः ८४
- ऋषरेभ्यो नकारो णकारं समानपदे ८५
- स्वरयवहकपैश्च ८६
- निषण्णाय रथवाहणमिन्द्र एणं परिणीयते समिन्द्र ण उरुष्या णो रक्षा णः षू णः षु णः षु णासत्या स्वर्णास्थूरि णौ प्र ण आयूंषि ८७
- परि ण इति शाकटायनः ८८
- प्र नेतिनुदतिहिनोमीनाम् ८९
- प्रकृत्या पदान्तीयः ९०

- नि वनि नसः प्रपीनम् ९१
- श्रीमना इत्येके ९२
- इन्द्राग्नी चित्रभानो वार्त्रघ्नं दुष्वप्न्यं ध्रुवयोनिः पुरोऽनुवाक्याभिः पुरोऽनुवाक्याश्चर्मम्रम् ९३
- तवर्गे च ९४
- षादनन्तर ऋकारे ९५
- शिलिसिवर्गमध्यमव्यवहितोऽपि ९६
- दीर्घम् ९७
- अश्व रश्मि मति सुमति श्व सुत चारय घृणि सेदिमेन्द्रिय धारय चित्र भङ्गुर वयुनाश्वस्य हृदय घुष्यर्ताभ्यवताध्यर्च शक्ति पुरु शचि वकारे ९८
- नाश्ववद्धिण्यात् ९९
- अभि विख्येषंवीरविश्ववत्सवृत्रवाजयन्तेषु १००
- अश्वस्य वाजिन इति च १०१
- विश्व सहभुवपुषवसुषु १०२

- नरहामित्रेषु च १०३
- तिष्ठाद्युदात्तम् १०४
- प्र वणश्शृङ्ग्यासेषु १०५
- नि वारहारयोरनवग्रहे १०६
- नाव नयामि १०७
- धारयाम योजाव सचस्व नुद मो षु जयतोरुष्य रक्ष यज यच्छ मत्सथ पिपृत गायता तु येन नकारे १०८
- भव च १०९
- सचावरूथ्यवाजस्यपायुषु च ११०
- अपृक्तः सौ १११
- रथि तकारनकारयोः ११२
- श्रथोदारिथ शोच पनय सादयर्जु भूष शत्रु सलक्ष्म घाघारात्यृत भवत यकारे ११३
- व वृधवृजोः ११४
- अद्यतंःहकारचकारभवतवृणीमहेदेवेषु ११५

- न होतरि ११६
- श्रृणुतत्विषिध्रजिभवतपिबेतस्मतिष्ठरक्षा मकारे ११७
- विश्वदेव्यसोमौ वत्त्याम् ११८
- उष महोभिर्नक्तेमीकारैकारौकारनकारेभ्यः ११९
- पूरुषोऽवसाने १२०
- पूष्णोजहीमस्तेष्वत्र १२१
- नरस्सप्तऋषीन्नस्त आहुर्नियुद्भिष्षु यत्र १२२
- अभिमातिपृतनासुसपह्नधूर्विश्वसमत्सुपृतनावातेभ्य सहेः १२३
- उक्थाञ्च शसेः १२४
- एवाच्छ चकृमाथ १२५
- विद्मासौत्रामरायाम् १२६
- अधायत्स्मग्नावायुषु १२७
- पूर्वौ द्वन्द्वेष्ववायुषु १२८
- हरि शयेत्येके १२९

- पिबा सोमं पिबा सुतस्य स्था मयोभुवो नू रणे शमीष्व मामहानो मामहन्तामशीतम रीरिषो रीरिषत यामयन्ति हि ष्मा ते वर्धया रयि श्रुधी हवं चरा सोम सूयवसिनी श्रोता ग्रावाणो धर्षा मानुषः पाथा दिवो युक्ष्वा हि गमया तमः सिञ्चता सुतं परीवाप उक्था शस्त्राण्यत्ता हवींष्याच्या जानु क्षामा रेरिहत् क्षामा भिन्दन्तो रुहेमा स्वस्तये जनयथा च धारया मयि तरा मृधो बोधा मे विचृता बन्धमवता हवेषु श्रृणुधी गिरो रक्षा तोकं चर्षणीसहां चर्षणीधृतो येना समत्सु वनेमा त ऋध्यामा ते शिक्षा सखिभ्यस्तत्रा रथं दीया रथेनेता जयत वर्धया त्वं प्रब्रवामा घृतस्याजगन्ता परस्या ररिमा हि पुरीतता प्लीहाकर्णशुण्ठाकर्णौ । प्रकृतिदीर्घावित्येके । नीकाशा अनूकाशेन चक्रा जरसं मिथू कस्तरता सखायः सासह्वानपामार्गोभयादत ऋतीषहमभी षु सुष्टरीमा जुषाणा यजा देवान् येना पावकाश्वायन्तो यदी सरमा स्वदया सुजिह्व निषद्या दधिष्व सदतना रणिष्टन भग

चिकित्वांश्चिकित्सा गविष्टाववादद्द्रक्षा चायुनक् सृजा रराण सादन्यमिति च १३०

- अनुनासिकमुपधा प्रागन्तः स्थायाः १३१
- स्वर औपशिविः १३२
- अनुस्वारेण व्यञ्जने १३३
- नुः १३४
- चछयोः शम् १३५
- तथयोः सम् १३६
- दधन्वान् स्ववान् यकारे लोपम् १३७
- रयिवृधे च १३८
- नपुंसकादिकारस्य १३९
- न सप्तम्यामन्त्रितयोः १४०
- नृन् पकारे विसर्जनीयम् १४१
- शत्रून् परिधीन् क्रतून् वनस्पतीन् स्वरे रेफम् १४२
- आकारोपधो यकारम् १४३

- न तमे १४४
- निर्जगन्वान् तमसि १४५
- धामञ्छत्रूंश्चिचिकित्वान् त्वं पूषन्नर्वन्निति च १४६
- अश्वादौ चाध्याये १४७
- मनुष्यांस्तांल्लोकानामित्रानुदि १४८
- आप्नोतीत्योश्च १४९
- संक्रमे च वैष्णवान् १५०
- गृहानैमि गृहानुपह्वयामहे वर्चस्वानहं मनुष्यानन्तरिक्षमग्निष्वात्तानृतुमतः पयस्वानग्ने तानश्विना पतङ्गानसन्दितः स्वर्गानपांपतिः सपत्नानिन्द्रः सपत्नानिन्द्राग्नी नभस्वानार्द्रदानुर्विद्वानग्नेर्देवानस्त्रेधतानङ्वानाशुरथैतानष्टौ विरुपानालभत एतावान स्यायुष्मानग्ने वायव्यानारण्याः प्रविद्वानग्निनानङ्वानधोरामौ शत्रूननु यं यातुधानानस्थादस्मानरिष्टेभिरिति १५१
- वृद्धं वृद्धिः १५२

- इति कात्यायनप्रातिशाख्यसूत्रे तृतीयोऽध्यायः
- चतुर्थोऽध्यायः
- [सम्पाद्यताम्]
- अथ चतुर्थोऽध्यायः
- अनुस्वारं रोष्मसु मकारः १
- नुश्चान्त पदेऽरेफे २
- अनुनासिका चोपधा ३
- लोप काश्यपशाकटायनौ ४
- प्रकृत्या सम्राड्वाम्राजि ५
- शं चे पकारादुकारोदयात् ६
- समन्तःपदे कखपफेष्वनूष्मपरेषु ७
- नुश्चाम्रेडिते ८
- अन्तःस्थामन्तःस्थास्वनुनासिकां परसस्थानाम् ९
- हि १०
- स्पर्शे परपञ्चमम् ११

- पकारो ले लम् १२
- नुश्चानुनासिकम् १३
- ङ्णौ क्ताभ्यां सकारे १४
- न दाल्भ्यस्य १५
- रलावृतलृवर्णाभ्यामूष्मणि स्वरोदये सर्वत्र १६
- प्रगृह्यं चर्चायामितिना पदेषु १७
- रिफितं च संहितायामनिरुक्तम् १८
- पदावृत्तौ चान्तरेण १९
- क्रमोक्तावृत्तिः पदेषु २०
- सुपदावसानवर्जम् २१
- अनितावन्तर्विकारागमं प्रागुक्त्वा २२
- विश्वपतीवेति च २३
- स्वरश्छकारे चकारेण सर्वत्र २४
- यस्यातिहाय सहेति न २५

- विश्वा ऊष्मान्तं परि द्विषस्त्वं त्वां यद्जयो विराजत्यनिरा अवीवृधन् परिष्ठाः सुक्षितय आशा ओषधीराभाह्यमीवा हि मायास्तेऽसीत्येतेषु २६
- पृथिव्या स्वरान्तं सम्भव शुक्रो मन्थी पृथिवीं परो देवभित्येतेषु २७
- च विश्वा वो ब्रह्म विश्वा हरी युक्तास्ते शफानां जजान नु कामित्येतेष्विमा २८
- हवेमोतेमा च २९
- विष्णो ते बच्छूव नासत्या भिषजा न आवोढं या देवा हविषो नो मृडातो नो अच्छ विमुञ्चेत्येतेषु ता ३०
- ता ता च ३१
- धिष्ण्या वरिवोविदं धिष्ण्या युवमिति च ३२
- भाव्युषधश्च रिद्विसर्जनीयः ३३
- रेफे लुप्यते दीर्घं चोपधा ३४
- रेफं स्वरधौ ३५

- कण्ठ्यपूर्वो यकारमरिफितः ३६
- लोपं धौ ३७
- भूमेश्चाकारेऽपृक्ते ३८
- यकाराकारयोर्जास्पत्ये पदे ३९
- अलोपो मांस्पचन्याः ४०
- सर्वो अःकार ओकारम् ४१
- चकारे च ४२
- एषो ह च ४३
- स्वो रुहावहश्च रात्र्याम् ४४
- स्वरे भाव्यन्तः स्थाम् ४५
- सन्ध्यक्षरमयवायावम् ४६
- उदात्तस्यान्तःस्थीभावे स्वरितं परमनुदात्तम् ४७
- कन्ठ्य ऋकारे ह्रस्वम् ४८
- अथैकमुत्तरश्च ४९
- सिं सवर्णे दीर्घम् ५०

- अनुनासिकवत्यनुनासिकम् ५१
- कण्ठ्यादिवर्ण एकारम् ५२
- उवर्ण ओकारम् ५३
- समुद्रस्येमंस्त्वैमंस्त्वौद्मन्निति च ५४
- एजत्योजोरेकेषाम् ५५
- सन्ध्यक्षर एकारौकारौ ५६
- वाहौ च स्वरभूते ५७
- आरमृकारोऽपृक्तात् ५८
- ऌकारश्चाल्कारम् ५९
- एदोर्ध्वां पूर्वमकारः ६०
- तौ चेदुदात्तावनुदात्ते स्वरितौ ६१
- न देशेऽभवति ६२
- गाहमानः शिवो भरन्तो द्वेषोभ्यो जम्भयन्तो वाजे वाजजितो मदन्तः शोचेऽवसे सुषुवे ज्योते सुपर्णो वीरुधः सुवीरो धातवे सूनवे द्रूणान आशवो वहत संक्रन्दनो बाहवोऽयुध्योऽदुहः ६३

- वोऽहं सोऽहं सोऽस्माकम् तेऽभिगरो वोऽर्वाची ६४
- येऽन्नात्रयोः ६५
- अविद्यासंभूत्योश्च ६६
- उपस्थेऽन्तस्तेभ्योऽकरम् ६७
- नमोऽस्त्वसौत्रामण्याम् ६८
- विश्वेऽग्ने विशो रायोऽनग्नौ ६९
- सूर्योऽग्नेऽभौ ७०
- रिषो यवसे पुरुप्रियोऽन्नपतेऽर्णवे ७१
- व्यपरे च ७२
- गवे मे मनसो वाजयन्तः सोम्यासः पाशिनो विदानोऽनृते मूजवतो वृष्णेऽपाको दीदिवस्त्रयस्त्रिंशे ब्रह्मणे यको रथो विश्वतः पादो वसन्तः ७३
- अवोस्त्वग्ने गृहपतेऽभि सत्वानोऽहं नोऽजस्त्रया विमानोऽजस्त्रः सुतेऽश्विना नमोऽग्नये तेऽग्नं तेऽग्ने वृक्षस्य प्रथमोऽन्तस्तेऽन्येन ७४

- पणयो जहीमोऽम्बिके ७५
- नोनुमोऽदुग्धा इव प्रचेतसोऽश्वान्नरोऽस्माकं वृषपाणयोऽश्वाः प्रदिशोऽनूदितेऽनागा अन्धसोऽर्चा पनस्यतेऽद्धा यज्ञियेभ्योऽमृतत्वं विपश्चितोऽभि जनोऽनमीव आयवोऽनु नोऽद्य देशोऽभवत् वयुनेऽजनिष्ट विघ्नापसोऽजायन्त पू॰र्यासोऽरेणवो नोऽश्मा नोऽदितिर्नोऽहिः ७६
- ब्राह्मणः ७७
- यजुष्षु च ७८
- संक्रमे च सर्वत्र ७९
- प्रकृतिभाव ऋक्षु ८०
- जुषाणश्चानध्वनि ८१
- ते चानुदात्तमनुदात्ते ८२
- हेड आपो गुवोऽपाग्ने धीरासो देवास उरो रक्षा णो मो वौश्वानरो वृषभो वचः प्राण उदानोऽङ्ग इमा मे वृष्णे दशमास्योन्ध आवित्तोऽरिष्टो अर्जुनः प्रत्याश्रावः स्विष्टो घासे प्रणीतस्तेभ्यो

नमो अस्तु दूरे नो अद्य यज्ञे सधस्थे नो अध्वरायेन्द्रे हिरण्यपर्णो द्वारो देवोऽब्दो रथिभ्यो महत्भ्यः संसदः ८३

- छन्दो अङ्कुपमङ्काङ्कमस्त्रीवयः ८४
- का ध्रुवोती सदना होतारा ज्या स्वधा पृथिवी प्रतिमेमसदन्नश्यामाकर्मोर्ध्वमियमवस्तादुतास्तिष ८५
- प्रगृह्यं स्वरे ८६
- न रोदसीमे ८७
- विश्पतीवोपस्थिते ८८
- उकारोऽपृक्तोऽस्पर्शात् ८९
- प्लुतमितौ ९०
- ओकारश्च ९१
- उकारोऽपृक्तो दीर्घमनुनासिकम् ९२
- इतेश्च परं पदं चर्चायाम् ९३
- तकारवर्गश्चकारवर्गे चकारवर्गम् ९४
- शकारे च ९५

- परश्चास्पर्शपरश्छम् ९६
- उदः स्तभाने लोपम् ९७
- अश्वात् स्थे तकारं संज्ञायाम् ९८
- स्वरात् संयोगादिर्द्विरुच्यते सर्वत्र ९९
- परं तु रेफहकाराभ्याम् १००
- ऊष्मान्तःस्थाभ्यश्च स्पर्शः १०१
- जिह्वामूलीयोपध्मानीयाभ्यां च १०२
- यैस्तु परं तैर्न पूर्वम् १०३
- नास्वरपूर्वा ऊष्मान्तःस्थाः १०४
- विसर्जनीयात् व्यञ्जनपरः १०५
- इतौ चेद्ध्रस्वपूर्वौ स्वरे पदान्तौ १०६
- संयोगपूर्वव्यञ्जनान्तावसानगताः स्वरा द्विमात्राः १०७
- प्रथमैर्द्वितीयास्तृतीयैश्चतुर्थाः १०८
- नानुस्वारः १०९
- सवर्णे ११०

- ऋवर्णे १११
- लृवर्णे ११२
- यमे ११३
- विसर्जनीयः ११४
- स्ववर्गीये चानुत्तमे ११५
- अवसितं च ११६
- नान्तःपदे स्वरपञ्चमान्तः स्थासु ११७
- स्पर्शोऽपञ्चमः स्वरधौ तृतीयम् ११८
- जिति प्रथमम् ११९
- असस्थाने मुदि द्वितीयं शौनकस्य १२०
- पञ्चमे पञ्चमम् १२१
- हश्च तस्मात् पूर्वचतुर्थम् १२२
- नकारपरो जातूकर्ण्यस्य १२३
- हि १२४
- यवयोः पदान्तयोः स्वरमध्ये लोपः १२५

- न वकारस्यासस्थान एकेषाम् १२६
- असौ च शाकटायनः १२७
- प्रउगमिति यकारलोपः १२८
- अनादेशेऽविकारः १२९
- प्रागुवर्णादक्षराणामेकीभावः १३०
- स्वरितवान् स्वरितः १३१
- उदात्तवानुदात्तः १३२
- इवर्णमुभयतोह्रस्वमुदात्तपूर्वमनुदात्तपरं स्वरितम् १३३
- वीक्षितायेति च १३४
- उदात्ताच्चानुदात्तं स्वरितम् १३५
- निहितमुदात्तस्वरितपरम् १३६
- अनवग्रहे १३७
- स्वरितस्य चोत्तरो देशः प्रणिहन्यते १३८
- स्वरितात्परमनुदात्तमुदात्तमयम् १३९
- अनेकमपि १४०

- नोदात्तस्वरितोदयम् १४१
- द्विवर्णमेकवर्णवद्धारणात् स्वरमध्ये समानपदे १४२
- ऐकारौकारौ च १४३
- डढौ ळळ्हावेकेषाम् १४४
- द्विसकारं शास्स्व रास्स्वेति १४५
- ऋऌवर्णे रेफलकारौ संश्लिष्टावश्रुतिधरावेकवर्णौ १४६
- मात्रर्धमात्राणुमात्रा वर्णा?पत्तीनाम् १४७
- अनुस्वारो ह्रस्वपूर्वोऽध्यर्धमात्रा पूर्वा चार्धमात्रा १४८
- दीर्घादर्धमात्रा पूर्वा चाध्यर्धा १४९
- द्वियकारम् १५०
- आप्याख्यमानो यमो रय्यै धाच्चास्त्यथ श्रवाय्यं नृपाय्यं पौरुषेय्या हृदय्याय सह रय्या निचाय्य सान्नाय्य सन्ताच्चेति च १५१
- एकः १५२
- ज्योतिश्च्यवनः श्येनः श्यामं श्यामाकाः श्येतो ज्येष्ठो ज्योग् ज्या च्छ्र्यति १५३

- जुषस्व यविष्ठ्य शोचा यविष्ठ्येति च १५४
- स्येति ण्यत्वं च १५५
- स्वरपूर्वाश्च शचजाः समानपदे द्विरुक्ताः १५६
- व्यञ्जनपराश्च न १५७
- कश्यपस्यानार्षेये जातूकर्ण्यस्य १५८
- उच्चैरज्जुमज्ज्ञानश्च १५९
- मर्त्तो वुरीत मर्त्तेष्वग्निः परो मर्त्तस्ते मर्त्त इति च १६०
- अन्तःपदेऽपञ्चमः पञ्चमेषु विच्छेदम् १६१
- ऊष्मभ्यः पञ्चमेषु यमापत्तिर्दोषः १६२
- स्फोटनं च ककारवर्गे वा स्पर्शात् १६३
- स्वरात् स्वरे समानपदे जो यं न तु ऋकारे १६४
- ख्यातेः खयौ कशौ गार्ग्यः सख्योरख्यमुख्यवर्जम् १६५
- त्रिपदाद्यावर्तमाने संक्रमः १६६
- द्विपदैकपदान्यप्यनुवाके १६७
- अनन्तरे १६८

- अपराह्णे १६९
- अस्वरविकारे १७०
- अलिङ्गविकारे १७१
- असमाने १७२
- त्रिरावृत्ते १७३
- गूढे १७४
- पदसमूहे १७५
- संहितायां च १७६
- अवसानार्थं पुनर्ग्रहणम् १७७
- अविकारार्थं च १७८
- ऊत्सर्गश्च १७९
- क्रमः स्मृतिप्रयोजनः १८०
- द्वे द्वे पदे सन्दधात्युत्तरेणोत्तरमावसानादपृक्तवर्जम् १८१
- अपृक्तमध्यानि त्रीणि स त्रिक्रमः १८२
- पुनराकारेणोत्तरम् १८३

- मोषूणाभीषुणौ च १८४
- चत्वार्यपुक्तपूर्वे नकारपरे सौ १८५
- मकारपरे चैके १८६
- पुनः सुपदेनोत्तरम् १८७
- पूर्वस्योत्तरसंहितस्य स्थितोपस्थितमवगृह्यस्य १८८
- सुपदे शाकटायनः १८९
- अन्तःपददीर्घीभावे १९०
- विनामे १९१
- प्रगृह्ये १९२
- रिफियेऽनिरुक्ते १९३
- अवसाने च १९४
- यथास्माम्नातं क्रमावसानं सक्रमेषु १९५
- वृद्धं वृद्धिः १९६
- इति कात्यायनप्रातिशाख्यसूत्रे चतुर्थोध्यायः
- पञ्चमोऽध्यायः

- [सम्पाद्यताम्]
- अथ पञ्चमोऽध्यायः
- समासेऽवग्रहो ह्रस्वसमकालः १
- तरतमयोश्चातिशयेऽदक्षिणप्रत्यासङ्गे २
- वीतमहूतमसूतमगोपातमरत्नधातमवसुधातमाः पूर्वेण ३
- सर्वदेवजनेभ्यश्च ४
- तूणवध्ममुत्तरेण ५
- रायस्पोषदे विजावेति च ६
- बहुप्रकृतावागन्तुना पर्वणा ७
- तद्धति तद्धिते न्यायसंहितं चेत् ८
- शस्त्वं त्रातातिषु च ९
- धात्वर्थे यकारे स्वरपूर्वे १०
- वांसौ च भूतकाले स्वरेण ह्रस्वादनुषि ११
- प्रत्नपूर्वविश्वेमर्तुभ्यस्था १२
- ह्रस्वव्यञ्जनाभ्यां भकारादौ विभक्तिप्रत्यये १३

- स्विति चानतौ १४
- वर्नसंख्येऽन्यतरतः १५
- अनुदात्तोपसर्गे चाख्याते १६
- गिरि त्रशयोः १७
- इवकाराम्रेडितायनेषु च १८
- एकात्समीची १९
- त्वायवः शंयोर्बहिर्धास्मयुं मृन्मयीं सुमयाशुया साधुया धृष्णुया विशालमनुया २०
- मृगयुमुभयादतोऽपामार्गकिम्पूरुषमिति च २१
- पारावतानाग्निमारुताश्चेति जातूकर्ण्यस्य २२
- अधीवासमित्येके २३
- प्रतिषेधेनानवग्रहः २४
- उत्तरेण चाकारेण २५
- द्वापूर्वम् २६
- संख्यापूर्वश्च धा २७

- द्वन्द्वानि द्विवचनान्तानि स्वरान्तपूर्वपदानि २८
- तद्धिते चैकाक्षरवृद्धावनिहिते २९
- अञ्चतिसहत्योः कृल्लोपे ३०
- अनुरुसुभ्याम् ३१
- समिदाभ्यां वत्सर ३२
- प्राग्निभ्यामनिन्धौ प्रश्लेषे ३३
- पाङ्गानुद्रोऽभ्राय संशयात् ३४
- जनयत्या ओषधयो वृषायिषत नहि चनास्मभ्यमजावयो वलयम् ३५
- समानोऽनश्वमेधे ३६
- वायुरसजातः समुद्रमहोरात्रे विश्वानरो विश्वाहाग्रयणोऽसपत्ना गोधा गोधूमा आशुशुक्षणिर्न्यग्रोध पुरोडाशः प्रावणेभिरशीतम तस्करा मस्मसाश्वत्थ उपस्तिर्माकिर्विश्वामित्रो गोपां प्रउगमङ्गानि कक्षीवन्तमदधात्पवीरवन्नीहारेण प्रावृता घनाघन ईदृङ् चान्यादृङ् शूघनासः कुयवं कुचरः प्रियङ्गवो नीवारो

एकादश षोडश चन्द्रमा आयुवो व्याघ्रोऽनड्वान् गविष्ठिरः कपर्दिने पुल- स्तये निषङ्गिणे कुलालेभ्य कर्मारेभ्यः पुञ्जिष्ठेभ्यो द्वीप्याय नीप्याय किंशिलायैलबृदाः शूकराय शूकृताय चराचरेभ्यः पारावतान् गोलत्तिकाखुरजगरो विपन्यवो दाक्षायणा आयुधं सुरामं बृहस्पतिर्वनस्पतिर्नराशंसः सुरभिर्नरिष्ठायै ३७

- उत्तम्भनादीन्यादिसंशयात् ३८
- विशौजा इत्यन्यायसमासात् ३९
- दित्यौही तुर्यौही पष्ठौही हृदयौपशेनेति च ४०
- दुष्टरो विष्टरो विष्टपो विष्टम्भो विष्टम्भनीम् ४१
- ऊवध्यमुगणा उरव इष्कृतिरिष्कर्तारमुदरमित्युपसर्गैकदेशलोपात् ४२
- संस्कृतं संस्कृतिर्मांस्पचन्याः षुँश्चलूमित्यनुनासिकोपधत्वात् ४३
- अनुस्वारागमत्वादित्येके ४४
- परीत्तोऽवत्तानां सुविताय सध्धिरिति च ४५

- वृद्धं वृद्धिः ४६
- इति कात्यायनप्रातिशाख्यसूत्रे पञ्चमोऽध्यायः
- षष्ठोऽध्यायः
- [सम्पाद्यताम्]
- अथ षष्ठोऽध्यायः
- अनुदात्तमाख्यातमामन्त्रितवत् १
- उय?सर्ग उपसर्गे २
- आम्रेडिते चोत्तरः ३
- कृदाख्यातयोश्चोदात्तयोः ४
- नाभ्येकाक्षरश्च स्वरसन्धेयेऽकृति ५
- आ पूतजातयोः ६
- अधि नि प्र प्रति श्रितात्रिणं भानवः पचतेषु ७
- उज्जेषमावर्त आपनीफणत् संसनिष्यदत् संवतं प्रयाणं सञ्चरन्तं संरभध्वं प्रसितिं विक्रमस्वेत्येतेष्वनु ८
- ओघ प्रोदात्ते ९

- अभिप्रेह्युपसंप्रयात प्रत्यातनुष्वासुषाव १०
- प्रकृत्याख्यातमाख्यातपूवम् ११
- उदात्ताच्चामन्त्रितादनन्तरम् १२
- एकान्तरादपि १३
- यद्धूत्तोपपदाच्च १४
- हेश्च १५
- उत्तरेऽपि १६
- नेत् १७
- समनसस्करत् १८
- द्वयोः पूर्वं समुच्चये १९
- वा विचारणे २०
- अह विनियोगे २१
- एवावधारणे २२
- उपपदाप्रयोगेऽपि च २३
- परोपापाव प्रति पर्यन्वप्यध्याङ् प्र सं निर्दुरुन्नि वि स्वभि २४

- द्विस्पर्शम् २५
- वेत्तु वित्त्वास्माद्ग्यक् पात्त्रमधित्त्यम् मृत्तिका द्धं दात्त्रं समाववर्त्त्यृद्धिरराघ्या अर्द्धशुद्धबुद्ध नक्क्तं निषण्णस्विन्नान्नसन्नाश्च २६
- न क्षवृचिश्विसतयेभ्यस्त्रैकम् २७
- इध्यायवार्ध्रीनसोद्राश्चराश्चेत् २८
- उपोत्थित उत्त्तम्भनमुत्त्तभानोत्त्थायोत्त्थितायेति त्रीणि २९
- बर्हिरङ्क्गाम् भद्रेण पुङ्क्गं पङ्क्गिः समङ्क्ग्धि परिवृङ्क्ग्धि पाङ्क्गानिति द्वावनुनासिकौ पूर्वावारपन्तीवर्जमिति ३०
- वृद्धं वृद्धिः ३१
- इति कात्यायनप्रातिशाख्यसूत्रे षष्ठोऽध्यायः
- सप्तमोऽध्यायः
- [सम्पाद्यताम्]
- अथ सप्तमोऽध्यायः
- अथावसानानि १

- कण्ठ्यस्वरमेकारेण परिगृह्णीयात् प्लुतवर्जम् २
- इवर्णमीकारेण ३
- उवर्णं वकारेण ४
- औकारं च ५
- ह्रस्वकण्ठ्योपधं विसर्जनीयान्तमरिफितं विवृत्त्या ६
- दीर्घकण्ठ्योपधं विसर्जनीयान्तमेकारान्तमैकारान्तं प्लुतं प्रगृह्यं च ७
- औकारान्तं चैके ८
- भाव्युपधरिद्विसर्जनीयान्तानि रेफेण ९
- प्रथमान्तं तृतीयेन १०
- उत्तमान्तमुत्तमेन ११
- वृद्धं वृद्धिः १२
- इति कात्यायनप्रातिशाख्यसूत्रे सप्तमोऽध्यायः

- अष्टमोऽध्यायः
- [सम्पाद्यताम्]
- अथ अष्टमोऽध्यायः
- अथातो वर्णसमाम्नायं व्याख्यास्यामः १
- तत्र स्वराः प्रथमम् २
- अ इति आ इति आ३ इति ३
- इ इति ई इति ई३ इति ४
- उ इति ऊ इति ऊ३ इति ५
- ऋ इति ॠ इति ॠ३ इति ६
- ऌ इति ॡ इति ॡ३ इति ७
- अथ सन्ध्यक्षराणि ८
- ए इति ए३ इति ९
- ओ इति ओ३ इति १०
- ऐ इति ऐ३ इति ११
- औ इति औ३ इति १२

- इति स्वराः १३
- अथ व्यञ्जनानि १४
- किति खिति गिति घिति ङिति कवर्गः १५
- चिति छिति जिति झिति ञिति चवर्गः १६
- टिति ठिति डिति ढिति णिति टवर्गः १७
- तिति थिति दिति धिति निति तवर्गः १८
- पिति फिति बिति भिति मिति पवर्गः १९
- इति स्पर्शाः २०
- अथान्तःस्थाः २१
- यिति रिति लिति विति २२
- अथोष्माणः २३
- शिति षिति सिति हिति २४
- अथायोगवाहाः २५
- अः इति विसर्जनीयः २६
- ःक इति जिह्वामूलीयः २७

- ःप इत्युपध्मानीयः २८
- अं इत्त्यनुस्वारः २९
- हुं इति नासिक्यः ३०
- कुं खुं गुं घुं इति यमाः ३१
- एते पञ्चषष्टिवर्णाः ब्रह्मराशिरात्मा वाचः ३२
- यत्किञ्चिद्वाङ्मयं लोके सर्वमत्र प्रयुज्यते ३३
- शुचिना ३४
- शुचौ देशे ३५
- शूद्रपतितयोरसंश्रावं स्वाध्यायोऽध्येतव्यः ३६
- ज्ञाने ३७
- पौरुष्यम् ३८
- स्वार्थम् ३९
- यशस्यम् ४०
- आयुष्यम् ४१
- अथापि भवति ४२

- वेदस्याध्ययनात् धर्मः संप्रदानात्तथा श्रुतेः ।
- वर्णशोऽक्षरशो ज्ञानाद्विभक्तिपदशोऽपि च ॥ ४३
- त्रयोविंशतिरुच्यन्ते स्वरा शब्दार्थचिन्तकैः ।
- द्विचत्वारिंशत् व्यञ्जनान्येतावान्वर्णसंग्रहः ॥ ४४
- तस्मिन् ळळ्हजिह्वामलीयोपध्मानीयनासिक्या न सन्ति माध्यन्दिनानाम् ४५
- ऌकारो दीर्घः प्लुताश्चोक्तवर्जम् ४६
- अथ वर्णदेवताः ४७
- आग्नेयाः कण्ठ्याः ४८
- नैर्ऋत्या जिह्वामूलीयाः ४९
- सौम्यास्तालव्याः ५०
- रौद्रा दन्त्याः ५१
- ओष्ठ्या आश्विनाः ५२
- वायव्या मूर्धन्याः ८३
- शेषा वैश्वदेवाः ५४

- तत्समुदायोऽक्षरम् ५५
- वर्णो वा ५६
- अक्षरसमुदायः पदम् ८७
- अक्षरं वा ५८
- तच्चतुर्धा ५९
- नामाख्यातोपसर्गनिपाताः ६०
- तत्र प्रतिविशेषः ६१
- क्रियावाचकमाख्यातमुपसर्गो विशेषकृत ।
- सत्त्वाभिधायकं नाम निपातः पादपूरणः ॥ ६२
- चतुर्दश निपाता येऽनुदात्तास्तेऽपि सञ्चिताः ।
- निहन्यते खल्वाख्यानमुपसर्गाणां चतुष्टये ॥ ६३
- अथ पदगोत्रानि ६४
- भारद्वाजकमाख्यातं भार्गवं नाम भाष्यते ।
- वासिष्ट उपसर्गस्तु निपातः काश्यपः स्मृतः ॥६५
- अथ पददेवताः ६६

- सर्वं तु सौम्यमाख्यातं नाम वायव्यमिष्यते ।
- आग्नेयस्तूपसर्गः स्यान्निपातो वारुणः स्मृतः ॥ ६७
- इत्याह स्वरसंस्कारप्रतिष्ठापयिता भगवान् कात्यायनः ६८
- वृद्धं वृद्धिः ६९ ४
- इति कात्यायनप्रातिशाख्यसूत्रेऽष्टमोऽध्यायः
- शुक्लयजुःप्रातिशाख्यम् समाप्तम्

## 13) याज्ञवल्क्यशिक्षा

- अथातस्त्रैस्वर्यलक्षणं व्याख्यास्यामः
- उदात्तश्चानुदात्तश्च स्वरितश्च तथैव च ।
- लक्षणं वर्णयिष्यामि दैवतं स्थानमेव च ।। १
- शुक्लमुच्चं विजानीयान्नीचं लोहितमुच्यते ।
- श्यामं तु स्वरितं विन्द्यादग्निमुच्चस्य दैवतम् ।।२
- नीचे सोमं विजानीयात्स्वरिते सविता भवेत् ।
- उदात्तं ब्राह्मणं विन्द्यान्नीचं क्षत्रियमुच्यते ।। ३

- वैश्यं तु स्वरितं विन्द्याद्भारद्वाजमुदात्तकम्
- नीचं गौतममित्याहुर्गार्ग्यं च स्वरितं विदुः ।। ४
- विन्द्यादुदात्तं गायत्रं नीचं त्रैष्टुभमुच्यते
- जागतं स्वरितं विन्द्यादत एवं नियोगतः ।। ५
- गान्धर्ववेदे ये प्रोक्ताः सप्त षड्जादयः स्वराः
- त एव वेदे विज्ञेयास्त्रय उच्चादयः स्वराः ।। ६
- उच्चौ निषादगान्धारौ नीचौ ऋषभधैवतौ
- शेषास्तु स्वरिता ज्ञेयाः षड्जमध्यमपञ्चमाः ।। ७
- षड्जो वेदे शिखण्डिः स्यादृषभः स्यादजामुखे
- गवा रम्भन्ति गान्धारं कौञ्चाश्चैव तु मध्यमम् ।। ८
- कौकिलः पञ्चमो ज्ञेयो निषादं तु वदेद्गजः
- आश्वश्च धैवतो ज्ञेयः स्वराः सप्त विधीयते ।। ९
- निमेषमात्रः कालः स्याद्विद्युत्कालस्तथापरे
- अक्षरात्तुल्ययोगाच्च मतिः स्यात्सोमशर्मणः ।। १०
- सूर्यरश्मिप्रतीकाशात्कणिका यत्र दृश्यते
- अणवस्य तु सा मात्रा मात्रा च चतुराणवा ।। ११

- मानसे चाणवं विन्द्यात्कण्ठे विन्द्याद्विरावणम्
- त्रिराणवं तु जिह्वाग्रे निःसृतं मात्रिकं विदुः ।।१२
- अवग्रहे तु कालः स्यादर्धमात्रा विधीयते
- पदयोरन्तरे काल एकमात्रा विधीयते ।। १३
- ऋचोर्धे तु द्विमात्रः स्यात्त्रिमात्रः स्यादृगन्तके
- रिक्तं तु पाणिमुत्क्षिप्य द्वे मात्रे धारयेद्बुधः ।। १४
- एकमात्रो भवेद्ध्रस्वो द्विमात्रो दीर्घ उच्यते
- त्रिमात्रस्तु प्लुतो ज्ञेयो व्यञ्जनं चार्धमात्रकम् १५
- विवृतौ चावसाने च ऋचोर्धे च तथापरे
- पदे च पादसंस्थाने शून्यहस्तं विधीयते
- प्रणवं तु प्लुतं कुर्याद्व्याहृतीर्मातृका विदुः १६
- चाषस्तु वदते मात्रां द्विमात्रां वायसोऽब्रवीत्
- शिखी वदति त्रिमात्रां मात्राणामिति संस्थितिः १७
- वर्णो जातिश्च मात्रा च गोत्रं छन्दश्च दैवतम्
- एतत्सर्वं समाख्यातं याज्ञवल्क्येन धीमता १८
- हस्तौ तु संयतौ धार्यौ जानुभ्यामुपरि स्थितौ

- गुरोरनुमतं कुर्यात्पठन्नान्यमतिर्भवेत् १९
- ऊरुभागे तृतीये तु करं विन्यस्य दक्षिणम्
- प्रसन्नमानसो भूत्वा किंचिन्निम्नमधोमुखम् २०
- प्रणवं प्राक् प्रयुञ्जीत व्याहृतीस्तदनन्तरम्
- सावित्रीं चानुपूर्व्येण ततो वेदान्समारभेत् २१
- कूर्मोऽङ्गानीव संहृत्य चेष्टां दृष्टिं दृढं मनः
- स्वस्थः प्रशान्तो निर्भीको वर्णानुच्चारयेद्बुधः २२
- नाभ्याहन्यान्न निर्हन्यान्न गायेन्नैव कम्पयेत्
- यथैवोच्चारयेद्वर्णांस्तथैवैतान्समापयेत् २३
- निवेश्य दृष्टिं हस्ताग्रे शास्त्रार्थमनुचिन्तयेत्
- सममुच्चारयेद्वर्णान्हस्तेन च मुखेन च २४
- स्वरश्चैव तु हस्तश्च द्वावेतौ युगपद्भवेत्
- हस्तभ्रष्टः स्वरभ्रष्टो न वेदः फलमश्नुते २५
- न करालो न लम्बोष्ठो नाव्यक्तो नानुनासिकः
- गद्गदो बद्धजिह्वश्च न वर्णान्वक्तुमर्हति २६
- प्रकृतिर्यस्य कल्याणी दन्तष्ठौ यस्य शोभनौ

- प्रगल्भश्च विनीतश्च स वर्णान्वक्तुमर्हति २७
- शङ्कितं भीतमुद्धृष्टमव्यक्तमनुनासिकम्
- काकस्वरं मूर्ध्निगतं तथा स्थानविवर्जितम् २८
- विस्वरं विरसं चैव विश्लिष्टं विषमाहतम्
- व्याकुलं तालुहीनं च पाठदोषाश्चतुर्दश २९
- संहितासारबहुलः पदसंज्ञासमाकुलः
- क्रमसंधिसमाकीर्णो दुस्तरो मन्त्रसागरः ३०
- ऋक्संहितां त्रिरभ्यस्य यजुषां वा समाहितः
- साम्नां वा सरहस्यां च सर्वपापैः प्रमुच्यते ३१
- संहिता नयते सौर्यं पदं च शशिनः पदम्
- क्रमश्च नयते सूक्ष्मं यत्तत्पदमनामयम् ३२
- कालिन्दी संहिता ज्ञेया पदयुक्ता सरस्वती
- क्रमेणावर्तयेद्गङ्गा शंभोर्वाणी तु नान्यथा ३३
- यथा महाह्रदं प्राप्य क्षिप्तो लोष्टो विनश्यति
- एवं दुश्चरितं सर्वं वेदे त्रिवृति मज्जति ३४
- आम्रपालाशबिल्वानामपामार्गशिरीषयोः

- वाग्यतः प्रातरुत्थाय भक्षयेद्दन्तधावनम् ३५
- खदिरश्च कदम्बश्च करवीरकरञ्जकौ
- एते कण्टकिनः पुण्याः क्षीरिणस्तु यशस्विनः ३६
- तेनास्यकरणे सूक्ष्मं माधुर्यं चैव जायते
- त्रिफला लवणाक्तेन भक्षयेच्छिष्यकः सदा
- क्षीणमेधाजनन्येषा स्वरवर्णकरी तथा ३७
- हस्तहीनं तु योऽधीते मन्त्रं वेदविदो विदुः
- न साधयति यजूँषि भुक्तमव्यञ्जनं यथा ३८
- हस्तहीनं तु योऽधीते स्वरवर्णविवर्जितम्
- ऋग्यजुःसामभिर्दग्धो वियोनिमधिगच्छति ३९
- ऋचो यजूँषि सामानि हस्तहीनानि यः पठेत्
- अनृचो ब्राह्मणस्तावद्यावत्स्वारं न विन्दति ४०
- ज्ञातव्यश्च तथैवार्थो वेदानां कर्मसिद्धये
- पठन्मात्रापपाठात्तु पङ्के गौरिव सीदति ४१
- स्वरवर्णप्रयुञ्जानो हस्तेनाधीतमाचरन्
- ऋग्यजुःसामभिः पूतो ब्रह्मलोकमवाप्नुयात् ४२

- न कुर्वीत पदं दीर्घं न कुर्वीत विलम्बितम्
- पदस्य ग्रहमोक्षौ च यथा शीघ्रगतिर्हयः ४३
- आगमं कुरु यत्नेन कारणं हि तदात्मकम्
- आस्येन च शयं कुर्यात्पठन्नान्यमतिर्भवेत् ४४
- न चास्य मुष्टिबन्धी स्यान्न चात्युत्तममाचरेत्
- चुलुनौंका स्फुटो दण्डी स्वस्तिको मुष्टिराकृतिः
- एते वै हस्तदोषाः स्युः परशुश्चैव सप्तमः ४५
- यथा वाणी तथा पाणी रिक्तं तु परिवर्जयेत्
- यत्र यत्र स्थिता वाणी पाणिस्तत्रैव तिष्ठति ४६
- यथा धनुष्याविततै शरे क्षिप्ते पुनर्गुणः
- स्वस्थानं प्रतिपद्येत तद्वद्धस्तगतः स्वरः ४७
- उत्तानं सोन्नतं किंचित्सुव्यक्ताङ्गुलिरञ्जितम्
- स्वरविद्धं करं कुर्यात्प्रादेशोद्देशगामिनम् ४८
- अङ्गुष्ठस्योत्तरे पर्वे तर्जन्योपरि यद्भवेत्
- प्रादेशस्य तु सोद्देशस्तन्मात्रं चालयेत्करम् ४९
- मनुष्यतीर्थोच्चं कृत्वा पितृतीर्थोदकं व्रजेत्

- नामितं करपृष्ठे तु सुव्यक्ताङ्गुलिमोक्षणम् ५०
- स्वरिते त्र्यङ्गुलं विन्द्यान्निपाते तु षडङ्गुलम्
- उत्थाने तु नवाङ्गुल्यमेतत्स्वरस्य लक्षणम् ५१
- अभ्यासार्थे द्रुतां वृत्तिं प्रयोगार्थे तु मध्यमाम्
- शिष्याणामुपदेशार्थं कुर्याद्वृत्तिं विलम्बिताम् ५२
- ऐन्द्री तु मध्यमा वृत्तिः प्राजापत्या विलम्बिता
- अग्निमारुतयोर्वृत्तिः सर्वशास्त्रेषु निन्दिता ५३
- मुष्ट्याकृतिर्मकारे तु नकारे तु नखाग्रतः
- अनुस्वारेऽङ्गुष्ठक्षेप ऊष्मान्तेऽङ्गुलिमोक्षणम् ५४
- उदात्तं भुवि पातेन प्रचयं नोग्र एव च
- शेषं षडङ्गुलं विन्द्यान्निचितं तु विधीयते ५५
- षडङ्गुलं तु जात्यस्य हस्तस्यानुपथस्य च
- तच्चतुर्भागमात्रं तु हस्तस्तेनैव वर्तयेत् ५६
- ककारान्ते टकारान्ते ङणे चाङ्गुलि नामयेत्
- पञ्चाङ्गुल्यमकारे च तकारे कुण्डलाकृतिः ५७
- ऊर्ध्वक्षेपाच्च योष्मा च अधःक्षेपाच्च यो भवेत्

- एकैकमुत्सृजेद्धीरः स्वरिते तूभयं क्षिपेत् ५८
- अङ्गुष्ठाकुञ्चनं लब्धौ अनुस्वारे त्वपाँरसम्
- दीर्घे रङ्गे च तर्जन्याः प्रसारः परिकीर्तितः ५९
- तर्जन्यङ्गुष्ठयोः स्पर्शेऽप्युदात्तं प्रतिविद्यते
- नीचं तु मध्यमं कुर्याच्छेषं नीचतरं क्रमात् ६०
- स्वरितं यद्भवेत्किंचिद्धकारसहसंयुतम्
- ऊष्माणं तद्विजानीयान्निक्षिपेदुभयोरपि ६१
- स्वरिते च विनिक्षिप्ते संयोगो यत्र दृश्यते
- द्विमात्रिके भवेदेकमात्रिके तूभयं क्षिपेत् ६२ १.६७
- जात्ये च स्वरिते चैव वकारो यत्र दृश्यते
- कर्तव्यस्तूभयोः क्षेपो वायव्य इति दर्शनम् ६३
- शृङ्गवद्वाथ वत्सस्य कुमारीकुचयुग्मवत्
- उभक्षेपस्वरो यत्र स विसर्ग उदाहृतः ६४
- विसर्गान्तस्वरो यत्र स्वरितो यत्र दृश्यते
- दीर्घश्चैव तुकारश्च तत्रोभक्षेप उच्यते ६५
- त्रिविधस्तु भवेदूष्मा प्रचिता बलकान्तरा

- स्वरिते प्रचितां विद्यान्निपाते बलकां विदुः ६६
- उत्थाने तु तथा तारा एताभिस्त्रिभिरूष्मभिः
- मात्रामात्रां विदित्वा तु ततः क्षेपं प्रयोजयेत् ६७
- अक्षरं भजते काचित्काचिद्वित्ते प्रतिष्ठिता
- समाने जातिका काचित्काचिदूष्माप्रदायिका ६८
- यथा बालस्य सर्पस्य उच्छ्वासो लघुचेतसः
- एवमूष्मा प्रयोक्तव्यो हकारः परिवर्जितः ६९
- विवृतिं प्रत्यया ऊष्मां प्रवदन्ति मनीषिणः
- तामेव प्रतिषेधन्ति आईऊए इति निदर्शनम् ७०
- अष्टौ स्वरान्प्रवक्ष्यामि तेषामेव तु लक्षणम्
- जात्योऽभिनिहितः क्षैप्रः प्रश्लिष्टश्च तथापरः ७१
- पादवृत्तस्तथा भाव्य इतिस्वराः।
- एकपदे नीचपूर्वः सयवो जात्यः एकपद इत्याह ७२
- नीचपूर्वः सयकारवकारौ वा जात्यः स्वरितो भवति। यथाजात्यं मनुष्यानिति सुद्येति चम्वीव धान्यम् कन्या इव स्वः वीर्यं एवँह्याह यानि चान्यानीदृग्लक्षणानि पदानि भवन्ति।

आभ्यामुदात्ताभ्यामकारो रिफितश्च यः। अकारो यत्र लुप्येत तं चाभिनिहितं विदुः ७३

- यथा कुक्कुटः--असि कुक्कुटोसि। वेदः - असि वेदोसि। भागः— असि भागोसि। मारुतः-असि मारुतोसि। श्वात्रः-असि श्वात्रोसि। ते-अप्सरसाम् तेप्सरसाम्। ते-अवन्तु तेवन्तु। कः-असि कोसि। सः-अहं सोहं। एवँहि यानि चान्यानीदृग्लक्षणानि पदानि भवन्ति ।
- इउवर्णौ यदोदात्तावापद्येते यवौ क्वचित्। अनुदात्ते पदे नित्यं विन्द्यात्क्षैप्रस्य लक्षणम् ७४
- यथा त्रि-अम्बकम् त्र्यम्बकम्। द्रु-अन्नः द्रवन्नः। वीडु-अङ्गः वीड्वङ्गः
- वाजी-अर्वन् वाज्यर्वन्। एवँह्याह यानिचान्यानीदृग्लक्षणानि पदानि भवन्ति। इकारो यत्र दृश्येत इकारेणैव संयुतः। उदात्तश्चानुदा-
- त्तेन प्रश्लिष्टो भवति स्वरः ७५
- अभि-इन्धताम् अभीन्धताम्। अभि-इमं अभीमम्। वि-इहि वीहि ।
- स्रुचि-इव स्रुचीव। चम्वी-इव चम्वीवेति। एवँह्याह यानि चान्या-
- नीदृग्लक्षणानि पदानि भवन्ति ।
- उदात्तपूर्वं यत्किंचिच्छन्दसि स्वरितं पदम्

- एष सर्वं बहुस्वारस्तैरो व्यञ्जन उच्यते ७६
- इडे रन्ते हव्ये काम्ये चन्द्रे ज्योते अदिति सरस्वति महि विश्रुतीति भवन्ति ।
- एवँह्याह यानि चान्यानीदृग्लक्षणानि पदानि भवन्ति
- अवग्रहात्परो यस्तु स्वरितः स्यादनन्तरम्
- तैरो विरामं तं विन्द्यादुदात्तो यद्यवग्रहः ७७
- यथा गोमदिति गो-मत्। गोपताविति गो-पतौ। प्रप्रेति प्र-प्र। वि-
- ततेति वि-तता। समिद्ध इति सम्-इद्धः। एवँह्याह यानि चान्या-नीदृग्लक्षणानि पदानि भवन्ति। स्वरेति स्वरिते चैव विवृतिर्यत्र दृश्यते। पादवृत्तो भवेत्स्वारः श्वित्र आदित्येति निदर्शनम्। श्वित्रः-आदित्यानाम् श्वित्र आदित्यानां। पुत्रः-ईधे-पुत्रईधे। दात्रे-एधि दात्र एधि। कः-ईम् कईम्। ताः-अस्य ताअस्य। एवँह्याह यानि चान्यानीदृग्लक्षणानि पदानि भवन्ति। उदात्ताक्षरयोर्मध्ये भवेन्नीचस्त्ववग्रहः ।
- तथा भाव्यं भवेत्कम्पस्तनूनप्त्रेति निदर्शनम् ७८

- यथा तनूनप्त्र इति तनू-नप्त्रे। तनूनपादिति तनू-नपात्।
  तनूनपातमिति
- तनू-नपातम्। एवँह्याह यानि पदानि लक्षणानि भवन्ति ।
- इत्यष्टपदसमाम्नाये वैशेषिके याज्ञवल्क्यवचनानां पदानां पाठः
  समाप्तः ॥
- माध्यंदिनविरोधि स्यात्तथा भाव्यस्तु यः स्मृतः
- स्वरो नैवात्र दृश्येत भिन्नोदात्तानुदात्तकौ २.१
- स्वराः स्पर्शान्तः-स्थोष्माणः ।
- कण्ठ्यजिह्वामूलीयतालव्यमूर्धन्यदन्त्योष्ठ्ययमा
  विसर्जनीयनिपाताद्याश्च किंवर्णदैवत्यलिङ्गाः स्वराः शुक्लाः नानादैवत्याः। स्पर्शाः कृष्णाः। कपिला अन्तस्थाः। ऊष्माणोऽरुणाः। नीला यमाः। हरिता नासि-क्याः। पीतोऽनुस्वारः। रक्तो जिह्वामूलीयः। पीत उपध्मानीयः। श्वेतो विसर्जनीयः। शबलो रङ्गः। नीलोऽनुनासिक्यः। इत्यन्तर्मध्य-मयोर्नासिक्यं विद्यात्। द्विरुदात्ताख्या इति स्मृतः। उदमनुदनिपाते आद्ये चोपसर्गे नामाख्याते चोपसर्गनिपाताश्चेति किंदैवत्याः।

अक्षराणां च के पुरुषाः काः स्त्रियः कानि नपुंसकानीत्यत्र ब्रूमः। कण्ठ्या आग्नेया अकारादयः। जिह्वामूलीया नैरृत्याः ककारादयः। तालव्याः सौम्या-श्चकारादयः। वायव्या मूर्धन्याष्टकारादयः। रौद्रा दन्त्यास्तकारादयः ।

- औष्ठ्या आश्विन्याः पकारादयः। शेषा वैश्वदेवाः अं इत्येवमादयः ।
- स्वरास्तु ब्राह्मणा ज्ञेया वर्गाणां प्रथमाश्च ये
- द्वितीयाश्च तृतीयाश्च चतुर्थाश्चापि भूमिपाः २
- वर्गाणां पञ्चमा वैश्या अन्तस्थाश्च तथैव च
- ऊष्माणश्च हकारश्च शूद्रा एव प्रकीर्तिताः ३
- शुक्लवर्णानि नामानि आख्याता रोहिता मताः
- कपिञ्जलास्तूपसर्गाः कृष्णाश्चैव निपातकाः ४
- भार्गवगोत्राणि नामानि भारद्वाजा आख्याताः
- वासिष्ठा उपसर्गास्तु निपाताः काश्यपाः स्मृताः
- पीतवर्णश्चोपसर्गो निपातः कृष्णवर्णकः
- सर्वं तु सौम्यमाख्यातं नाम वायव्यं दृश्यते
- आग्नेयस्तूपसर्गः स्यान्निपातो वारुणः स्मृतः ५

- प्रथमाश्च तथान्तस्थाः स्त्रीलिङ्गाः परिकीर्तिताः
- शेषाक्षराणि षण्ढानि प्राहुर्लिङ्गविवेचकाः ६
- नाम्नामिन्द्रो देवता वरुणः उपसर्गाणामादित्यः सर्वस्याक्षरगणस्य स्वरा विसर्जनीयो यमाश्च पुँल्लिङ्गाः। ङञणनमा यरलवाः स्त्रीलिङ्गाः।
- शेषाण्यक्षराणि नपुंसकलिङ्गानीति। संधिश्चतुर्विधो भवति लोपागमौ वर्णविकारः प्रकृतिभावश्चेति। तद्यथा-तत्र लोपो भवति अयक्ष्माः-मा अयक्ष्मामा। शततेजाः-वायुः शततेजावायुः। तिग्मतेजाः-द्विषतः तिग्मतेजाद्विषतः ॥ इति लोपः ॥ आगमो भवति-यथा प्रत्यक् सोमः प्रत्यङ् सोमः प्राक्सोमः प्राङ्सोमः अस्मान् सीते अस्मान्त्सीते त्रीन् समुद्रान् त्रीन्त्समुद्रान्। इति आगमः। विकारो भवति आ-इदम् एदम्। आ-इमे एमे। आ-इष्टयः एष्टयः। प्र-इषितः प्रेषितः इति विकारः प्रकृतिभावः यथा-आशुः शिशानः। युञ्जानः प्रथमम्। अदितिः षोडशाक्षरेण। देवो वः सविता। इति प्रकृतिभावः ॥
- आकाशस्था यथा विद्युत्स्फुटितं मणिसूत्रवत्
- एष च्छेदो विवृतीनां यथा बालेषु कर्तरी ७

- द्वयोस्तु स्वरयोर्मध्ये संधिर्यत्र न दृश्यते
- विवृतिस्तत्र विज्ञेया यईशेति निदर्शनम् ८
- पिपीलिका पाकवती तथा वत्सानुसारिणी
- वत्सानुसंसृता चैव चतस्रस्तु विवृत्तयः ९
- पञ्च रङ्गाः प्रवर्तन्ते घातनिर्घातवज्रिणः
- अहरप्रहरो ज्ञेय ऐउऋओ-इति निदर्शनम् १०
- पिपीलिका आद्यन्तदीर्घा नाभ्या आसीदिति निदर्शनम्
- पाकवत्युभयोर्ह्रस्वा विन इन्द्रेति निदर्शनम् ११
- अन्ते च वत्सानुसृजता ता न आवोढमश्विनेति[१] निदर्शनम्
- वत्सानुसारिणी चादौ दीर्घा ताअस्येति निदर्शनम् १२
- करिणी कुर्विणी चैव हरिणी हारिणीति च
- तथाहंसपदा नाम पञ्चैताः स्वरभक्तयः १३ २.१३
- करिणी रहयोर्योगे कुर्विणी लहकारयोः
- हरिणी रषयोर्योगे[२] हारितं ऋषकारयोः १४
- या तु हंसपदा नाम सा तु रेफषकारयोः
- हरिणी हरयोर्विद्यात्कुर्विणी हलकारयोः १५

- देवं बर्हिरिति[३] करिणी उपवल्हेति[४] कुर्विणी
- हरिणी अरेपस इत्याहुर्हारिणी शतवल्शेति[५] च १६
- वर्षोवर्षीयतेसीति[६] तथा हंसपदेति च
- स्वरभक्तिं प्रयुञ्जानस्त्रीन्दोषान्परिवर्जयेत् १७
- इकारं चाप्युकारं च ग्रस्तदोषं तथैव च
- एतल्लक्षणमाख्यातं याज्ञवल्क्येन धीमता १८
- सम्यक् पाठस्य सिद्ध्यर्थं शिष्याणां हितकाम्यया
- अर्धमात्रास्वरं किंचित्पृथङ्नूनमिवोच्चरन्
- ऋकारे च हकारे च हृत्कण्ठमनसानि च १९
- नैतत्स्वरितपूर्वाङ्गे नापराङ्गे कथंचन
- न स्वरे न च मात्रायां कथं स्वारो विधीयते २०
- पराङ्गस्य तु यत्पूर्वं पूर्वाङ्गस्य तु यत्परम्
- उभयार्धार्धसंयोगे स्वारं कुर्याद्विचक्षणः २१
- संयोगे तु परं स्वार्थं परं संयोगनामकम्
- संयुक्तस्य तु वर्णस्य न स्वार्थं पूर्वमक्षरम् २२
- उदात्तेप्यनुदात्ते तु वामाया भ्रुव आरभेत्

- उदात्तात्स्वरितोदात्तौ क्रमाद्दक्षिणतो न्यसेत् २३
- स्वरितादनुदात्ता ये प्रचयांस्तान्प्रचक्षते
- एकस्वरंरापिचातानाहुस्तत्वार्थचिन्तिकाः २४
- प्रचयो यत्र दृश्येत तत्र हन्यात्स्वरं बुधः
- स्वरितः केवलो यत्र मृदुस्तत्र निपातयेत् २५
- दुर्बलस्य यथा राष्ट्रं हरते बलवान्नृपः
- एवं व्यञ्जनमासाद्य अकारो हरते स्वरम् २६
- उच्चादुच्चतरं नास्ति नीचान्नीचतरं तथा
- अक्षरात्तुल्ययोगाच्च नीचे नीचगतानि च २७
- स्वर उच्चः स्वरो नीचः स्वरः स्वरित एव च
- स्वरप्रधानैस्तैः स्वार्यं व्यञ्जनं तेन सस्वरम् २८
- व्यञ्जनान्यनुवर्तन्ते यत्र तिष्ठति स स्वरः
- स्वरप्रधानं त्रैस्वर्यमाचार्याः प्रवदन्ति हि २९
- मणिवद्व्यञ्जनं विद्यात्सूत्रवच्च स्वरं विदुः
- आचार्याः सममिच्छन्ति पदच्छेदं तु पण्डिताः ३०
- स्त्रियो मधुरमिच्छन्ति विकृष्टमितरे जनाः

- उदात्तं नानुवर्तन्ते नीचं न स्वरितं तथा ३१
- विस्वरं तं विजानीयाद्दीर्घह्रस्वविवर्जितम्
- हरिवरुणवरेण्येषु धारापुरुषेषु च
- स्वरिते रेफवैश्वानरो नकारः शेषाकारः स्वरिता नकाराः ३२
- द्वौ वरुणौ च स्वरितौ
- उदुत्तमं वरुणधारयंवरोरुधारा उरुधारा च होइते
- मात्रिकं वा द्विमात्रं वा स्वरितं यदिहाक्षरम्
- तस्यादितोऽर्धमात्रा वै शेषं च परतो भवेत् ३३
- नकारान्ते पदे पूर्वे श्मश्रुभिः परतः स्थिते
- छकारं न प्रयुञ्जीत ञशासंधिं समुच्चरेत् ३४
- ओकारं प्लुतविज्ञेयं प्लुतमग्ना द्वितीयकम्
- लाजीं छाचीं तृतीयं च विवेशोति चतुर्थकम् ३५
- अधःस्विदासीत्पञ्चमं चोपरिस्विदासीच्च षष्ठकम्
- सप्तमं तु भ्रुवोः स्मार अष्टमं नैव विद्यते ३६
- उच्चस्थानगते हस्ते स्वरितं नोपपद्यते
- अधस्था तु यदा गच्छेत्स्वरितं न तदा भवेत्

- कचटतपा दृश्यन्ते संधिस्थानेषु नित्यशः
- स्ववर्गेणैव संयुक्ता मोक्षं तत्र न कारयेत्
- तकारान्ते पदे पूर्वे सकारे परतः स्थिते
- प्रत्यारम्भं न कुर्वीत पापाविति निदर्शनम्
- ककारान्ते पदे पूर्वे सकारे परतः स्थिते
- खसवर्णं विजानीयात् भिखक्सेति निदर्शनम्
- तकारान्ते पदे पूर्वे चवर्गे परतः स्थिते
- मोक्षं तत्र च कुर्वीत यच्च पापौ निदर्शनम्
- ङकारान्ते पदे पूर्वे सकारे परतः स्थिते
- कसवर्णं विजानीयात्प्राङ्सोमेति निदर्शनम्
- टकारान्ते पदे पूर्वे सकारे परतः स्थिते
- टसवर्णं विजानीयात्संम्राट् संभृतेति निदर्शनम्
- तकारान्ते पदे पूर्वे सकारे परतः स्थिते
- छसवर्णं विजानीयात् तत्सवितुरिति निदर्शनम्
- नकारान्ते पदे पूर्वे सकारे परतः स्थिते
- तसवर्णं विजानीयात्त्रीन्त्समुद्रेति निदर्शनम्

- पकारान्ते पदे पूर्वे शकारे परतः स्थिते
- छासवर्णं विजानीयादनुष्टुच्छारदीति निदर्शनम्
- मकारान्ते पदे पूर्वे सवर्णे परतः स्थिते
- मसवर्णं विजानीयादिमंमेति निदर्श्नम्
- वर्णे तु मात्रिके पूर्वे अनुस्वारो द्विमात्रकः
- द्विमात्रे मात्रिको ज्ञेयः संयोगाद्यस्य यो भवेत् २.४२
- अनुस्वारो द्विमात्रः स्याद्दवर्णव्यञ्जनादिगः
- ह्रस्वाद्वा यदि वा दीर्घाद्देवानाँ हृदयेभ्य इति

  अनुस्वारस्योपरिष्टात्संवृतं यत्र दृश्यते
- दीर्घं तं तु विजानीयाच्छ्रोताग्रावाणेति निदर्शनम्
- अनुस्वारस्योपरिष्टात्संयोगो यत्र दृश्यते
- ह्रस्वं तं तु विजानीयात्सँस्थेति निदर्शनम्
- अनुस्वारश्च यो दीर्घादक्षराच्च भवेत्परः
- स तु ह्रस्व इति ज्ञेयो मन्त्रेष्वेव विभाषया
- ओभावश्च विवृत्तिश्च शषसा रेफ एव च
- जिह्वामूलमुपध्मा च गतिरष्टविधोष्मणः

- यथा भावप्रसंधानमुकारादिपरं पदम्
- स्वरान्तं तादृशं विद्याद्यन्यद्व्यक्तमूष्मणः
- उभावादुत्थितश्चोष्मा तां तु केलिं विनिर्दिशेत्
- विवृतं प्रति या ऊष्मा विज्ञेया विकटानना
- लीढातिलीढविद्युच्च शषसेषु प्रकीर्तिताः
- जिह्वामूले च रेफे च विज्ञेया विठकाशठा
- उपध्मानीयसहिता पुष्पिणीं तां विनिर्दिशेत्
- अन्यत्र यो भवेदूष्मा सुलभां तां विनिर्दिशेत्
- पादाद्यन्तं पदाद्यन्तं तथावग्रहकालिकम्
- ईषत्स्पृष्टं विजानीयात्तस्मिन्काले तु कारयेत्
- पादादौ च पदादौ च संयोगावग्रहेषु च
- यः शब्द इति विज्ञेयो योऽन्यः स य इति स्मृतः
- उपसर्गपरो यस्तु पदादिरपि दृश्यते
- ईषत्स्पृष्टं यथा विद्युत्पदच्छन्दात्परं भवेत्
- त्वदर्थवाचिनौ वोवां वावै यदि निपातजौ
- आदेराजविकल्पार्थौ ईषत्स्पृष्टा इति स्मृताः

- विभाषायामेकारः स्यात्तथा नेतैः पदात्परः
- भवन्तेत्यपि पूर्वैव तथा च स पदादपि
- यदेव लक्षणं यस्य वकारस्यापि तद्भवेत्
- यत्र यत्र विशेषः स्यादिदानीं स स कथ्यते
- वकारस्त्रिविधः प्रोक्तो गुरुर्लघुर्लघूत्तरः
- आदौ गुरुर्लघुर्मध्ये पदान्ते तु लघूत्तरः
- उपांशु त्वरितं चैव योऽधीते हृदि संज्ञकः
- अपि रूपसहस्त्रेषु सदेहेषु प्रवर्तते
- पञ्चविद्यां न गृह्णन्ति जडाः स्तब्धाश्च ये नराः
- आलस्याश्चैव रोगाश्च येषां च विस्मृतं मनः
- अहिरिव गुणाद्भीतः संमानान्नरकादिव
- राक्षसीभ्य इव स्त्रीभ्यः स विद्यामधिगच्छति
- न भोजनविलम्बी स्यान्न च नारीनिबन्धनः
- सुदूरमपि विद्यार्थी व्रजेद्गरुडहंसवत्
- यथा खनन्खनित्रेण नरो वार्यधिगच्छति
- तथा गुरुगतां विद्यां शुश्रूषुरधिगच्छति

- सुखार्थी चेत्त्यजेद्विद्यां विद्यार्थी चेत्त्यजेत्सुखम्
- सुखिनस्तु कुतो विद्या सुखं विद्यार्थिनः कुतः
- गुणिता शतशो विद्या सहस्रावर्तिता पुनः
- आगमिष्यति जिह्वाग्रे स्थलनिम्नमिवोदकम्
- शतेन गुणिता विद्या सहस्रेण च तिष्ठति
- शतानां च सहस्रेण प्रत्यञ्चदवतिष्ठति
- जलमभ्यासयोगेन शिलायाः कुरुते क्षयम्
- कर्कार्णामृदुतस्तस्य किमभ्यासान्न साध्यते
- गुरुशुश्रूषया विद्या पुष्कलेन धनेन वा
- अथवा विद्यया विद्या चतुर्थं नोपलभ्यते
- शुश्रूषारहिता विद्या ह्यल्पमेधागुणैः सह
- वन्ध्या च यौवनी तस्या न विद्या फलिनी भवेत्
- हयानामिव जात्यानामर्धमात्रार्धशायिनाम्
- न हि विद्यार्थिनां निद्रा चिरं नेत्रेषु तिष्ठति
- यथा पिपीलिकाभिः पांसुभिर्वल्मीकं क्रियते महत्
- न तत्र बलसामर्थ्यमुद्यमस्तत्र कारणम्

- अञ्जनस्य क्षयं दृष्ट्वा वल्मीकस्य तु संचयम्
- अवन्ध्यं दिवसं कुर्याद्दानाध्ययनकर्मसु
- अन्नव्यञ्जनयोर्भागस्तृतीयमुदकस्य च
- वायोः संचारणार्थाय चतुर्थमुपकल्पयेत्
- हकारं पञ्चमैर्युक्तमन्तस्थैश्चापि संयुतम्
- औरस्यं तं विजानीत्कण्ठ्यमाहुरसंयुतम्
- हकारो यत्र पूर्वस्थो ह्यन्तस्थाद्यो भवेत्परः
- पदकाले वियुज्येत संहितायां स औरसः
- मेघदुन्दुभिनिर्घोषो ज्ञायते पयसो ह्रदात्
- एवं नादं प्रयोक्तव्यं सिंहस्य रुदितं यथा
- मासे भाद्रपदे मेघाः शब्दं कुर्वन्ति यादृशम्
- एवं गह्वरमासाद्य शुक्रं दुदुह्नेति दर्शनम्
- शेषाणां वानरा युद्धमुत्पतन्ति पतन्ति च
- एवं वर्णाः प्रथोक्तव्या इहेहैषां निदर्शनम्
- यथा पुत्रवती स्नेहाच्चुम्बते निजमौरसम्
- एवं वर्णाः प्रयोक्तव्या युञ्जानेति निदर्शनम्

- दुर्दरो जयदेशे च प्रफतेषुर्नयाप्यया
- एवं वर्णाः प्रयोक्तव्या अपां फेनेति निदर्शनम्
- यथा भारभराक्रान्ता निश्वसन्ति नरा भुवि
- एवं वर्णाः प्रयोक्तव्या अद्भ्यः संभृत इत्यपि
- कुक्कुटः कामलुब्धश्च ककारद्वयमुच्चरेत्
- एवं वर्णाः प्रयोक्तव्याः कुक्कुटोसीति दर्शनम्
- वडवा च हयं दृष्ट्वा योनिं विकुरुते यथा
- एवं वर्णाः प्रयोक्तव्याः सदुन्दुभेति दर्शनम्
- रङ्गे चैव समुत्पन्ने नो ग्रसेत्पूर्वमक्षरम्
- स्वरं दीर्घं प्रयुञ्जीत पश्चान्नासिक्यमाचरेत्
- यथा सौराष्ट्रिका नारी अराँ इत्यभिभाषते
- एवं रङ्गः प्रवक्तव्यो ङ्कारः परिवर्जितः
- द्विमात्रिको मात्रिको वा नासामूलं समाश्रितः
- अन्ते प्रयुञ्जते रङ्गः पञ्चमैः सानुनासिकः २.७१
- यथा सौराष्ट्रिका नारी आराँ इत्यभिभाषते
- एवं रङ्गं विजानीयात् ङ्कारपरिवर्जितम्

- अनन्तरं मकारस्य यो रङ्गस्तत्र रज्यते
- सर्वानुनासिकं विन्द्यादेषा मध्योपधानिका
- यरलवशषसहरज्यन्ते चोपधानिका
- गर्वान्ते रङ्गते यस्तु सर्वैः सर्वानुनासिका
- नासादुत्पद्यते रङ्गः कांस्येन समनिःस्वनः
- मृदुश्चैव द्विमात्रः स्याद्दृष्टिमान्स्यान्निदर्शनम्
- यथा व्याघ्री हरेत्पुत्रान्दंष्ट्राभिर्न च पीडयेत्
- भीता पतनभेदाभ्यां तद्वद्वर्णान्प्रयोजयेत्
- मधुरं च न चाव्यक्तं व्यक्तं चापि न पीडितम्
- सनाथस्यैकदेशस्य न वर्णाः शंकरं गताः
- यथा सुमत्तनागेन्द्रः पदात्पदं निधापयेत्
- एवं पदं पदाद्यन्तं दर्शनीयं पृथक् पृथक्
- गीती शीघ्री शिरःकम्पी यथा लिखितपाठकः
- अनर्थज्ञोल्पकण्ठश्च षडेते पाठकाधमाः
- माधुर्यमक्षरव्यक्तिः पदच्छेदस्तु सुस्वरः
- धैर्यं लयसमत्वं च षडेते पाठका गुणाः

- चतुरक्षरषट्कं च निवर्तेत पुनःपुनः
- आवर्तते पदं यच्च द्विस्त्रिराम्रेडितं हि तत्
- यथा धाम्ने धाम्नेति यजुषे यजुषेति निदर्शनम्
- हीयते वर्धते चापि पदं यत्र कृशोदरम्
- उपचारः स विज्ञेय उभे सुश्चन्द्रेति निदर्शनम् ॥

- अथ सप्तविधाः संयोगपिण्डाः ।
- अयःपिण्डो दारुपिण्ड ऊर्णापिण्डो ज्वालापिण्डो मृत्पिण्डो वायुपिण्डो वज्रपिण्डश्चेति ।
- यमान्विद्यादयःपिण्डान् सान्तस्थं दारुपिण्डवत्
- अन्तस्थं यमवर्जं तु ऊर्णापिण्डं विनिर्दिशेत्
- अन्तस्थं यमसंयोगे विशेषो नोपलभ्यते
- अशरीरं यमं विन्द्यादन्तस्थः पिण्डनायकम्
- ज्वालापिण्डान्सनासिक्यान्सानुस्वारांस्तु मृन्मयान्
- सोपध्मा वायुपिण्डाश्च जिह्वामूले तु वज्रिणः

- अयःपिण्डो नाम यथा
- अग्नीः पक्तीः नातनच्मि
- दारुपिण्डो नाम यथा
- अश्वः सूर्यः विश्वाजतीति भवति
- तत्र ऊर्णापिण्डो नाम यथा
- यस्मिन् अत्यस्मिन् अमुष्मिन् इति भवति
- तत्र ज्वालापिण्डो नाम यथा
- ब्रह्मा वह्निः गृह्णामीति भवति
- तत्र मृत्पिण्डो नाम यथा
- साँस्था सँस्कर्तारः सँस्वर्त इति। तत्र वायुपिण्डो नाम यथा ।
- देव सवितः
- युञ्जानः प्रथमम्
- प्रादिवः ककुत्सुप्तमिति भवति
- तत्र वज्रपिण्डो नाम यथा
- इष्कृतिः निष्कृतिः ऋक्साम इति भवति
- प्रथममेव षकारेण सकारेणैव संयुतम्

- एतत्स्वरं समासाद्य अग्निष्वात्ता निदर्शनम्
- प्रथमेन ठकारेण थकारेणैव संयुतम्
- एतत्स्वरं समासाद्य अधिष्ठाननिदर्शनम्
- प्रथममेव णकारेण नकारेणैव संयुतम्
- एतत्स्वरं समासाद्य त्रिणवत्रयस्त्रिँशाविति निदर्शनम्
- प्रथममेव रङ्गेण नकारेणैव संयुतम्
- एतद्रञ्जितमासाद्य वृष्टिमानिति निदर्शनम्
- एते ककारादयो मकारपर्यवसानाः कृष्णा व्याख्याताः शनैश्चरदैवत्याः
- सप्तचक्राणि चत्वार्यन्तस्था यरलवाः कपिलवर्णा[७] अग्निदैवत्याः
- चत्वार्यूष्माणः शषसहा अरुणवर्णा आदित्यदैवत्याः
- त्रयस्त्रिँशद्व्यञ्जनानि स्पर्शा अन्तस्था ऊष्माणश्चेति
- चतुर्विधं करणं स्पृष्टमस्पृष्टं संवृतं निवृतं चेति
- संवृतो घोषा विवृता अघोषाः
- विँशतिर्घोषास्ते गजडदबा घझढधभा ङञणनमाः यरलवाश्चेति
- त्रयोदश अघोषास्ते कचटतपाः खछठथफाः शषसाश्चेति

- अष्टौ वर्णस्थानानि भवन्ति
- उरःकण्ठ्यमूर्धन्यतालुदन्त्यजिह्वामूलयमानुनासिक्याश्चेति
- द्वौ औरस्यौ हहा इति
- अ आ आ३ त्रयः कण्ठ्याः
- षण्मूर्धन्याः ऋटठडढणष इति
- दश तालव्याः चछजझञयशैईई३ इति
- अष्ट दन्त्याः तथदधनऌलसाः
- एकादश ओष्ठ्याः पफबभममाउऊऊ३ छौपध्माचेत्यादयः
- एको दन्तमूलीयो रेफः
- जिह्वामूलीयाः पञ्च कुंखुंगुंघुंङुं इति
- क्मख्मग्मघ्मकुंखुंगुंघुं इति यमाश्चत्वारः
- रुक्मेति प्रथमो ज्ञेयः सक् इत्यपरो भवेत्
- तृतीयः सद्म इत्याहुरुपध्मेति चतुर्थकः
- प्रथमौ चौष्ठनासिक्यावोष्ठनासे उपाश्रितौ
- द्वितीयः कण्ठ्यदन्त्यश्च नासामूलमुपाश्रितः
- तृतीयः कण्ठ्यजिह्वाग्रे नासायामेव निर्दिशेत्

- चतुर्थो हृदि नासिक्यः कण्ठे चाभिहिता यमाः
- आपञ्चमैश्चैकपादः संयुक्तं पञ्चमाक्षरम्
- यस्मात्तत्र निवर्तन्ते श्मशानादिव बान्धवाः
- यत्किंचिद्वाङ्मयं लोके सर्वमत्र प्रतिष्ठितं सर्वमत्र प्रतिष्ठितमिति
- ऋवर्णे तित्परे सादावनुस्वारो द्विमात्रकः
- संयोगे परभूतेषु ह्रस्व एवोच्यते बुधैः ॥

।। इति श्रीयाज्ञवल्क्यशिक्षा समाप्ता ॥

## 14) नारदीया शिक्षा

- अथातः स्वरशास्त्राणां सर्वेषां वेदनिश्चयम्
- उच्चनीचविशेषाद्धि स्वरान्यत्वं प्रवर्त्तते १
- आर्चिकं गाथिकं चैव सामिकं च स्वरान्तरम्
- कृतान्ते स्वरशास्त्राणां प्रयोक्तव्यं विशेषतः २
- एकान्तरस्वरो ह्यृक्षु गाथासु द्व्यन्तरःस्वरः
- सामसु त्र्यन्तरं विद्यादेतावत्स्वरतोऽन्तरम् ३
- ऋक्सामयजुरङ्गानि ये यज्ञेषु प्रयुञ्जते
- अविज्ञानाद्धि शास्त्राणां तेषां भवति विस्वरः ४
- मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह
- स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात् ५
- प्रहीणः स्वरवर्णाभ्यां यो वै मन्त्रः प्रयुज्यते
- यज्ञेषु यजमानस्य रुषत्यायुः प्रजां पशून् ६
- उरः कण्ठः शिरश्चैव स्थानानि त्रीणि वाङ्मये
- सवनान्याहुरेतानि साम वाप्यर्थतोन्तरम् ७

- उरः सप्तविचारं स्यात्तथा कण्ठस्तथा शिरः
- न च सप्तोरसि व्यक्तास्तथा प्रावचनो विधिः ८
- कठकालापप्रवृत्तेषु तैत्तिरीयाह्वरकेषु च
- ऋग्वेदे सामवेदे च वक्तव्यः प्रथमः स्वरः ९
- ऋग्वेदस्तु द्वितीयेन तृतीयेन च वर्तते
- उच्चमध्यमसंघातः स्वरो भवति पार्थिवः १०
- तृतीयप्रथमक्रुष्टान् कुर्वन्त्याह्वरकाः स्वरान्
- द्वितीयाद्यांस्तु मन्द्रान्तांस्तैत्तिरीयाश्चतुरः स्वरान् ११
- प्रथमश्च द्वितीयश्च तृतीयश्च चतुर्थकः
- मन्द्रः क्रुष्टो ह्यतिस्वार एतान्कुर्वन्ति सामगाः १२
- द्वितीयप्रथमावेतौ तांडिभाल्लविनां स्वरौ
- तथाशातपथावेतौ स्वरौ वाजसनेयिनाम् १३
- एतेविशेषतः प्रोक्ताः स्वरावै सार्ववैदिकाः
- इत्येतच्चारितं सर्वं स्वराणां सार्ववैदिकम् १४

इति प्रथमा कण्डिका

## कण्डिका २

- सामवेदे तु वक्ष्यामि स्वराणां चरितं यथा
- अल्पग्रन्थं प्रभूतार्थं श्रव्यं वेदाङ्गमुत्तमम् १
- तानरागस्वरग्राममूर्छनानां तु लक्षणम्
- पवित्रं पावनं पुण्यं नारदेन प्रकीर्तितम् २
- शिक्षामाहुर्द्विजातीनामृग्यजुःसामलक्षणम्
- नारदीयमशेषेण निरुक्तमनुपूर्वशः ३
- सप्तस्वरास्त्रयो ग्रामामूर्छनास्त्वेकविंशतिः
- ताना एकोनपञ्चाशदित्येतत्स्वरमण्डलम् ४
- षड्जश्च ऋषभश्चैव गान्धारो मध्यमस्तथा
- पञ्चमो धैवतश्चैव निषादः सप्तमः स्वरः ५
- षड्जमध्यमगान्धारास्त्रयो ग्रामाः प्रकीर्तिताः
- भूर्लोकाज्जायते षड्जो भुवर्लोकाच्च मध्यमः ६
- स्वर्गान्नान्यत्र गान्धारो नारदस्य मतं यथा
- स्वररागविशेषेण ग्रामरागा इति स्मृताः ७

- विंशतिर्मध्यमग्रामे षड्जग्रामे चतुर्दश
- तानान् पञ्चदशेच्छन्ति गान्धारग्राममाश्रितान् ८
- नन्दी विशाला सुमुखी चित्रा चित्रवती मुखा
- बला या चाथ विज्ञेया देवानां सप्त मूर्छनाः ९
- आप्यायनी विश्वभृता चन्द्रा हेमा कपर्दिनी
- मैत्री वार्हती चैव पितृणां सप्त मूर्छनाः १०
- षड्जेतूत्तरमन्द्रा स्यादृषभे चाभिरुद्गता
- अश्वक्रान्ता तु गान्धारे तृतीया मूर्छना स्मृता ११
- मध्यमे खलु सौवीरा हृष्यका पञ्चमे स्वरे
- धैवते चापिविज्ञेया मूर्छना तूत्तरायता १२
- निषादाद्रजनी विद्यादृषीणां सप्तमूर्छनाः
- उपजीवन्ति गन्धर्वादेवानां सप्तमूर्छनाः १३
- पितृणां मूर्छनाः सप्त तथा यक्षा न संशयः
- ऋषीणां मूर्छनाः सप्त यास्त्विमा लौकिकाः स्मृताः १४
- षड्जः प्रीणाति वै देवानृषीन् प्रीणाति चर्षभः

- पितॄन्प्रीणातिगान्धारो गन्धर्वान्मध्यमः स्वरः १५
- देवान पितॄन्नृषींश्चैव स्वरः प्रीणाति पञ्चमः
- यक्षान् निषादः प्रीणाति भूतग्रामं च धैवत इति १६
- इति प्रथमे द्वितीयाकण्डिका

कण्डिका ३

- गानस्य तु दशविधा गुणवृत्तिस्तद्यथा
- रक्तं पूर्णमलङ्कृतं प्रसन्नं व्यक्तंविक्रुष्टं श्लक्ष्णं समं सुकुमारं मधुरमिति गुणाः१
- तत्र रक्तं नाम वेणुवीणास्वराणामेकीभावे रक्तमित्युच्यते २
- पूर्णं नाम स्वरश्रुतिपूरणाच्छन्दः पादाक्षर संयोगात्पूर्णमित्युच्यते ३
- अलङ्कृतं नामोरसि शिरसि कण्ठयुक्तमित्यलङ्कृतम् ४
- प्रसन्नं नामापगतगद्गदनिर्विशङ्कं प्रसन्नमित्युच्यते ५
- व्यक्तं नाम पदपदार्थप्रकृतिविकारागमलोपकृत्तद्धितसमासधातुनिपातोपस-

- र्गस्वरलिङ्गवृत्तिवार्त्तिकविभक्त्यर्थवचनानां सम्यगुपपादने व्यक्तमित्युच्यते ६
- विक्रुष्टं नामोच्चैरुच्चारितं व्यक्तपदाक्षरमिति विक्रुष्टम् ७
- श्लक्ष्णं नामाद्रुतमविलम्बितमुच्चनीचप्लुतसमाहार-
- हेलतारवोपनयानादिभिरुपपादनादिभिः श्लक्ष्णमित्युच्यते ८
- समं नामावापनिर्वापप्रदेशे प्रत्यन्तरस्थानानां समासः सममित्युच्यते ९
- असुकुमारं नाम मृदुपदवर्णस्वरकुहरणयुक्तं सुकुमारमित्युच्यते १०
- मधुरं नाम स्वभावोपनीतललितपदाक्षर गुणसमृद्धं मधुरमित्युच्यते ११
- शङ्कितं भीतमुद्धृष्टमव्यक्तमनुनासिकम्
- काकस्वरं शिरसिगतं तथास्थान विवर्जितम् १२
- विस्वरं विरसं चैव विश्लिष्टं विषमाहतम्
- व्याकुलं तालुहीनं च गीतिदोषाश्चतुर्दश १३
- आचार्याः सममिच्छन्ति पदच्छेदन्तु पण्डिताः

- स्त्रियो मधुरमिच्छन्ति विक्रुष्टमितरे जनाः १४
- इति तृतीया कण्डिका

कण्डिका ४

- पद्मपत्रप्रभःषड्जऋषभः शुकपिंजरः
- कनकाभस्तु गान्धारो मध्यमः कुन्दसप्रभः १
- पञ्चमस्तु भवेत्कृष्णः पीतकं धैवतं विदुः
- निषादः सर्ववर्णः स्यादित्येताः स्वरवर्णताः २
- पञ्चमोमध्यमः षड्जैत्येते ब्राह्मणाः स्मृताः
- ऋषभो धैवतश्चापीत्येतौ क्षत्रियावुभौ ३
- गान्धारश्च निषादश्च वैश्यावर्धेन वै स्मृतौ
- शूद्रत्वं विद्धि चार्धेन पतितत्वान्न संशयः ४
- ऋषभोत्थितः षड्जहतो धैवतसहितश्च पञ्चमो यत्र
- निपतति मध्यमरागे तन्निषादं षाडवं विद्यात् ५
- यदि पञ्चमो विरमते गान्धारश्चान्तरस्वरो भवति
- ऋषभो निषादसहितस्तं पञ्चममीदृशं विद्यात् ६

- गान्धारस्याधिपत्येन निषादस्य गतागतैः
- धैवतस्य च दौर्वल्यान् मध्यमग्राममुच्यते ७
- ईषत्स्पृष्टो निषादस्तु गान्धारश्चाधिको भवेत्
- धैवतः कंपितो यत्र षड्ज ग्रामं तु निर्द्दिशेत् ८
- अन्तरस्वरसंयुक्ता काकलिर्पत्र दृश्यते
- तं तु साधारितं विद्यात्पञ्चमस्थं तु कैशिकम् ९
- कैशिकं भावयित्वा तु स्वरैः सर्वैः समन्ततः
- यस्मात्तु मध्यमे न्यासस्तस्मात्कैशिक मध्यमः १०
- काकलिर्दृश्यते यत्र प्राधान्यं पञ्चमस्य तु
- कश्यपः कैशिकं प्राह मध्यमग्रामसम्भवम् ११
- गेति गेयं विदुः प्राज्ञा धेतिकारुप्रवादनम्
- वेति वाद्यस्य विज्ञेयं गान्धर्वस्य विरोचनमिति १२
- इति चतुर्थी कण्डिका
- कण्डिका ५
- यः सामगानां प्रथमः स वेणोर्मध्यमः स्वरः

- यो द्वितीयः स गान्धारस्तृतीयस्त्वृषभः स्मृतः १
- चतुर्थः षड्ज इत्याहु पञ्चमो धैवतो भवेत्
- षष्ठो निषादो विज्ञेयः सप्तमः पञ्चमः स्मृतः २
- षड्जं वदति मयूरो गावो रम्भन्ति चर्षभम्
- अजाविके तु गान्धरं क्रौञ्चो वदति मध्यमम् ३
- पूष्पसाधारणे माले कोकिलो वक्ति पञ्चमम्
- अश्वस्तु धैवतं वक्ति निषादं वक्ति कुञ्जरः ४
- कण्ठादुत्तिष्ठते षड्जः शिरसस्त्वृषभः स्मृतः
- गान्धारस्त्वानुनासिक्य उरसो मध्यमः स्वरः ५
- उरसः शिरसः कण्ठादुच्छ्रितः पञ्चमः स्वरः
- ललाटाद्धैवतं विद्यान्निषादं सर्वसन्धिजम् ६
- नासां कण्ठमुरस्तालुजिह्वादन्तांश्च संश्रितः
- षड्भिः सञ्जायते यस्मात्तस्मात् षड्ज इति स्मृतः ७
- वायुः समुत्थितो नाभेः कण्ठशीर्षसमाहतः
- नर्दत्यृषभवद्यस्मात्तस्मादृषभ उच्यते ८

- वायुः समुत्थितो नाभेः कण्ठशीर्ष समाहतः
- नासागन्धावहः पुण्यो गान्धारस्तेनहेतुना ९
- वायुः समुच्छ्रितो नाभेरुरोहृदि समाहतः
- नाभिं प्राप्तो महानादो मध्यमत्वं समश्नुते १०
- वायुः समुत्थितोनाभेरूरोहृत्कण्ठशिरोहतः
- पञ्चस्थानोत्थितस्यास्य पञ्चमत्वं विधीयते ११
- धैवतं च निषादं च वर्ज्जयित्वा स्वरद्वयम्
- शेषान्पञ्चस्वरांस्त्वन्यान्पञ्चस्थानोच्छ्रितान्विदुः १२
- अग्निगीतः स्वरः षड्ज ऋषभो ब्रह्मणोच्यते
- सोमेन गीती गान्धारो विष्णुना मध्यमः स्वरः १३
- पञ्चमस्तु स्वरो गीतो नारदेन महात्मना
- धैवतश्च निषादश्च गीतौ तुम्बुरुणा स्वरौ १४
- आद्यस्य दैवतं ब्रह्मा षड्जस्याप्युच्यते बुधैः
- तीक्ष्णदीप्तिप्रकाशत्वाद् ऋषभस्य हुताशनः १५
- गावः प्रगीते तुष्यन्ति गान्धारस्तेन हेतुना

- श्रुत्वा चैवोपतिष्ठन्ति सौरभेया न संशयः १६
- सोमस्तुपञ्चमस्यापि दैवतं ब्रह्मराट्स्मृतम्
- निर्ह्रासो यस्य वृद्धिश्च ग्राममासाद्य सोमवत् १७
- अति सन्धीयते यस्मादेतान् पूर्वोत्थितान् स्वरान्
- तस्मादस्य स्वरस्यापि धैवतत्वं विधीयते १८
- निषीदन्ति स्वरा यस्मान्निषादस्तेन हेतुना
- सर्वांश्चाभिभवत्येष यदादित्योऽस्य दैवतमिति १९
- इति पञ्चमी कण्डिका
- कण्डिका ६
- दारवी गात्रवीणा च द्वे वीणे गानजातिषु
- सामिकी गात्रवीणा तु तस्याः श्रृणुत लक्षणम् १
- गात्रवीणा तु सा प्रोक्ता यस्यां गायन्ति सामगाः
- स्वरव्यञ्जनसंयुक्ता अङ्गुल्यङ्गुष्ठरञ्जिता २
- हस्तौ सुसंयुतैधायौ जानुभ्यामुपरिस्थितौ
- गुरोरनुकृतिं कुर्याद्यथाज्ञानमतिर्भवेत् ३

- प्रणवं प्राक् प्रयुञ्जीतव्याहृत्तीस्तदनन्तरम्
- सावित्रीं चानुवचनं ततो वृत्तान्तमारभेत् ४
- प्रसार्यं चाङ्गुलीः सर्वा रोपयेत्स्वरमण्डलम्
- न चाङ्गुलिभिरङ्गुष्ठमङ्गुष्ठेनाङ्गुलीः स्पृशेत् ५
- विरला नाङ्गुलीः कुर्यान्मूले चैनां न संस्पृशेत्
- अङ्गुष्ठाग्रेण ता नित्यं मध्यमे पर्वणि स्पृशेत् ६
- मात्रद्विमात्रवृद्धानां विभागार्थं विभागवित्
- अङ्गुलीभिर्द्विमात्रं तु पाणौः सव्यस्य दर्शयेत् ७
- त्रिरेखा यत्र दृश्येत सन्धिं तत्र विनिर्दिशेत्
- स पर्व इति विज्ञेयः शेषमन्तरमन्तरम् ८
- यवान्तरं तु सामस्त्वृक्षु कुर्यात्तिलान्तरम्
- स्वरान्मध्यमपर्वसु सुनिविष्टान्निवेशयेत् ९
- न चात्र कम्पयेत्किञ्चिदङ्गस्यावयवं बुधः
- अधस्तनं मृदुन्यस्य हस्तमास्ते यथाक्रमम् १०
- अभ्रमध्ये यथा विद्युद्दृश्यते मणिसूत्रवत्

- एषच्छेदो विवृत्तीनां यथा बालेषु कर्तरि ११
- कूर्मोऽङ्गानीव संहृत्य चेष्टां दृष्टिं दिशन् मनः
- स्वस्थः प्रशान्तो निर्भितो वर्णानुच्चारयेद्बुधः १२
- नासिकायास्तु पूर्वेण हस्तं गोकर्णवद्धरेत्
- निवेश्यदृष्टिं हस्ताग्रे शास्त्रार्थमनुचिन्तयेत् १३
- सममुच्चारयेद्वाक्यं हस्तेन च मुखेन च
- यथैवोच्चारयेद्वर्णांस्तथैवैनान् समापयेत् १४
- नाभ्याइत्यात्र निर्हन्यात्र प्रयोगन्न कम्पयेत्
- समं सामानि गायेत व्योम्नि श्येनगतिर्यथा १५
- यथाप्सु चरतां मार्गो मीनानां नोपलभ्यते
- आकाशे वा विहङ्गानां तद्वत्स्वरगता श्रुतिः १६
- यथादधनि सर्पिः स्यात्काष्ठस्थोवा यथानलः
- प्रयत्नेनोपलम्येत तद्वत्स्वरगता श्रुतिः १७
- स्वरात्स्वरं सङ्क्रमस्तु स्वरसन्धिमनुल्बणम्
- अविच्छिन्नं समंकुर्यात्सूक्ष्मं छायातपोपमम् १८

- अनागतमतिक्रान्तं विच्छिन्नं विषमाहतम्
- तन्वन्तमस्थितान्तं च वर्ज्जयेत्कर्षणं बुधः १९
- स्वरस्थानाच्च्युतोयस्तुस्वं स्थानमतिवर्त्तते
- विस्वरं सामगाः कुर्युर्विरक्तमतिवीणिनः २०
- आभ्यासार्थे द्रुतां बृत्तिं प्रयोगार्थे तु मध्यमाम्
- शिष्याणामुपदेशार्थे कुर्याद्बृत्तिं विलम्बिताम् २१
- गृहीतग्रन्थ एवं तु ग्रन्थोच्चारणशिक्षकान्
- हस्तेनाध्यापयेच्छिष्यान् शैक्षेण विधिना द्विजः २२
- इति षष्ठी कण्डिका
- कण्डिका ७
- क्रुष्टस्यमूर्द्ध नि स्थानं ललाटे प्रथमस्य तु
- भ्रुवोर्मध्ये द्वितीयस्य तृतीयस्य च कर्णयोः १
- कण्ठस्थानं चतुर्थस्य मन्द्रस्योरसि तूच्यते
- अतिस्वारस्य नीचस्य हृदिस्थानं विधीयते २
- अङ्गुष्ठस्योत्तमे क्रुष्टो ह्यङ्गुष्ठे प्रथमः स्वरः

- प्रादेशिन्यां तु गान्धार ऋषभस्तदनन्तरम् ३
- अनामिकायां षड्जस्तु कनिष्ठिकायां च धैवतः
- तस्याधस्ताच्च योन्यास्तु निषादं तत्र विन्यसेत् ४
- अपर्वत्वादसञ्ज्ञत्वादव्ययत्वाच्च नित्यशः
- मन्द्रो हि नहि भूतस्तु परिस्वार इति स्मृतः ५
- क्रुष्टेन देवा जीवन्ति प्रथमेन तु मानुषाः
- पशवस्तु द्वितीयेन गन्धर्वाप्सरसस्त्वनु ६
- आण्डजाः पितरश्चैव चतुर्थस्वरजीविनः
- मन्द्रश्चैवोपजीवन्ति पिशाचासुरराक्षसाः ७
- अतिस्वारेण नीचेन अगत्स्थावरजङ्गमम्
- सर्वाणि खलु भूतानि धार्यन्ते सामिकैः स्वरैः ८
- दीप्तायता करुणानां मृदुमध्यमयोस्तथा
- श्रुतीनां यो विशेषज्ञो न स आचार्य उच्यते ९
- दीप्तामन्द्रे द्वितीये च प्रचतुर्थे तथैव तु
- अति स्वारे तृतीये च क्रुष्टे तु करुणा श्रुतिः १०

- श्रुतयोऽन्या द्वितीयस्य मृदुमध्यायताः स्मृताः
- तासामपि तु वक्ष्यामि लक्षणानि पृथक् पृथक् ११
- आयतात्वं भवेन्नोच्चैर्मृदुत्वं तु विपर्यये
- स्वे स्वरे मध्यमत्वं तु तत्समीक्ष्य प्रयोजयेत् १२
- द्वितीये विरताया तु कुष्टश्च परतो भवेत्
- दीप्तां तां तु विजानीयात्प्रथमेन मृदुस्मृता १३
- अत्रैव विरताया तु चतुर्थेन प्रवर्त्तते
- तथा मन्द्रे भवेद्दीप्ता साम्नश्चैव समापने १४
- नाभिरते श्रुतिं कुर्यात्स्वरयोर्नापि चान्तरे
- न च ह्रस्वे च दीर्घे च न चापि घुटसञ्ज्ञिके १५
- द्विविधागतिः पदान्तः स्थितसन्धिः सहोष्मभिः
- पञ्चस्वेतेषु स्थानेषु विज्ञेयं घुटसञ्ज्ञतम् १६
- स्वरान्तराविरतानि ह्रस्वदीर्घघुटानि च
- श्रुतिस्थानेष्वशेषाणि श्रुतिवत् स्वरतो भवेत् १७
- दीप्तामुदात्ते जानीयाद्दीप्तां च स्वरिते विदुः

- आनुदात्ते मृदुज्ञेया गन्धर्वा श्रुतिसम्पदः १८
- उदात्तश्चानुदात्तश्च स्वरितप्रचिते तथा
- निघातश्चेति विज्ञेयः स्वरभेदस्तु पञ्चधा १९
- इति सप्तमी कण्डिका
- कण्डिका ८
- अत ऊर्ध्वं प्रवक्ष्याम्यार्च्चिकस्य स्वरत्रयम्
- उदात्तश्चानुदात्तश्च तृतीयः स्वरितः स्वरः १
- य एवोदात्त इत्युक्तः स एव स्वरितात्परः
- प्रचयः प्रोच्यते तज्ज्ञैर्न चात्रान्यत्स्वरान्तरम् २
- वर्णस्वारोऽतीतः स्वारः स्वरितो द्विविधः स्मृतः
- मात्रिकोवर्ण एवं नु दीर्घस्तूच्चरितादनु ३
- स तु सप्तविधो ज्ञेयःस्वरः प्रत्ययदर्शनात्
- पदेन तु स विज्ञेयो भवेद्यो यत्र यादृशः ४
- सप्तस्वरान्प्रयुञ्जीत दक्षिणं श्रवणं प्रति
- आचार्यैर्विहितं शास्त्रं पुत्रशिष्यहितैषिभिः ५

- उच्चादुच्चतरं नास्ति नीचान्नीचतरं तथा
- वैस्वर्यै स्वारसंज्ञायां किं स्थानं स्वारौच्यते ६
- उच्चनीचस्य यन्मध्ये साधारणमिति श्रुतिः
- तं स्वारं स्वारसञ्ज्ञायां प्रतिजानन्ति शैक्षिकाः ७
- उदात्ते निषादगान्धारावनुदात्तः ऋषभधैवतौ
- स्वरितप्रभवा ह्येते षड्जमध्यमपञ्चमाः ८
- यत्र कखपरा ऊष्मा जिह्वामूलप्रयोजनाः
- तामथाज्ञापयेन्मात्रां प्रकृत्यैव तु सा कला ९
- जात्यः क्षैप्रोऽभिनिहितस्तैरव्यञ्जन एव च
- तिरोविरामः प्रश्लिष्टः पादवृत्तश्च सप्तमः १०
- स्वाराणामहमेतेषां पृथग्वक्ष्यामि लक्षणम्
- उद्दिष्टानां यथान्यायमुदाहरणमेव च ११
- इति प्रथमस्याष्टमी कण्डिका
- प्रथमः प्रपाठकः समाप्तः
- द्वितीयः प्रपाठकः

- कण्डिका १
- सयकारं सर्वं वाप्यक्षरं स्वरितं भवेत्
- न चोदात्तं पुरस्तस्य जात्यः स्वारः स उच्यते १
- इ उ वर्णौ यदोदात्तावापद्येते यवौ क्वचित्
- अनुदात्ते प्रत्यये नित्यं विद्यात्क्षैप्रस्य लक्षणम् २
- ए ओ आभ्यामुदात्ताभ्यामकारो निहितश्चयः
- अकारं यत्र लुम्पति तमभिनिहितं विदुः ३
- उदात्तपूर्वं यात्किञ्चिच्छन्दसि स्वरितं भवेत्
- एव सर्वत्रह्लस्वारस्तैरव्यञ्जन उच्यते ४
- अवग्रहात्परं यत्र स्वरितं स्यादनन्तरम्
- तिरोविरामं तं विद्यादुदात्तो यद्यवग्रहः ५
- इकारं यत्र पश्येयुरिकारेणैव संयुतम्
- उदात्तमनुदात्तेन प्रश्लिष्टं तं निबोधत ६
- स्वरे चेत् स्वरितं यत्र विवृत्ता यत्र संहिता
- एतत्पादान्तवृत्तस्य लक्षणं शास्त्रचोदितम् ७

- जात्यः स्वारः स जात्येन श्रुष्यग्रे क्षैप्र उच्यते
- ते मन्वताभिनिहितस्तैरव्यञ्जन ऊतये ८
- तिरोविरामो विष्कभिते प्राश्लिष्टो हीन्द्रगिर्वणः
- पादवृत्तः क ईं वेद स्वाराःसप्तैवमादयः ९
- उच्चादेकाक्षरात्पूर्वात्स्वर्यते यदिहाक्षरम्
- स्वाराणां जात्यवर्ज्जानामेषा प्रकृतिरुच्यते १०
- चत्वारस्त्वादितः स्वाराः कम्पं पुष्यन्ति शास्त्रतः
- उदात्ते वैकनीचे वाजुह्वग्रिस्तत्र दर्शनम् ११
- इति प्रथमा कण्डिका
- कण्डिका २
- इकारान्ते पदे पूर्व उकारे परतः स्थिते
- ह्रस्वकम्पं विजानीयान्मेधावी नात्र संशयः १
- इकारान्ते पदे चैवोकारद्वयपदे परे
- दीर्घं कम्पं विजानीयाच्छ्रग्ध्यूष्विति निदर्शनम् २
- त्रयोदीर्घास्तु विज्ञेया ये च सन्ध्यक्षरेषु वै

- मन्यापत्र्या न इन्द्राभ्यां शेषा ह्रस्वाः प्रकीर्तिताः ३
- अनेकानामुदात्तानामनुदात्तः प्रत्ययो यदि
- शिवकम्पं विजानीयादुदात्तः प्रत्ययो यदि ४
- यत्रद्विप्रभृतीनिस्युरुदात्तान्यक्षराणि तु
- नीचं चोच्चं च परतस्तत्रोदात्तं विदुर्बुधाः ५
- न रेफे वा हकारे वा द्विर्भावो जायते क्वचित्
- न च वर्गद्वितीयेषु न चतुर्थे कदा चन ६
- न चतुर्थं तृतीयेन द्वितीयं प्रथमेन तु
- आद्यमन्त्यं च मध्यञ्च स्वाक्षरेणैव पीडयेत् ७
- अनन्त्यश्च भवेत् पूर्वोऽन्त्यश्च परतो यदि
- तत्र मध्ये यमस्तिष्ठेत् स वर्णः पूर्ववर्णयोः ८
- वर्गान्त्याञ्छषसैः सार्द्धमन्तस्थैर्नापि सँय्युतान्
- दृष्ट्वा यमा निवर्त्तन्त आदेशिकमिवाध्वगाः ९
- तृतीयश्च चतुर्थश्च चतुर्थादिपरं पदम्
- द्वौ तृतीयौ हकारश्च हकारादि परं पदम् १०

- अनुस्वारोपधामूलानां न क्वचित् क्रमतेपरम्
- रहपूर्वसंयुते चाप्युत्तरं क्रमतेऽक्षरम् ११
- संयोगे स्वरितं यत्र चोद्धातैः पतने यथा
- पूर्वाङ्गमादितः कृत्वा पराङ्गादौ निवेशयेत् १२
- संयोगे यत्रदृश्येत् व्यञ्जनं विरते पदे
- पूर्वाङ्गं तद्विजानीयाद्येनारम्भस्तत्पराङ्गम् १३
- संयोगात्तु परं स्वर्यं परं संयोगनायकम्
- संयुक्तस्य तु वर्णस्य स्वरितं पूर्वमक्षरम् १४
- अनुस्वारः पदान्तश्च क्रमजः प्रत्यये स्वके
- स्वरभक्तिस्तथा रेफः सर्वं पूर्वाङ्गमुच्यते १५
- पादादौ च पदादौ च संयोगावग्रहेषु च
- यः शब्दैति विज्ञेयो योऽन्यः स य इतिस्मृतः १६
- पदादावप्यविच्छेदे संयोगान्ते च तिष्ठताम्
- वर्ज्जयित्वा रहर्याणामयादेशः प्रदृश्यते १७
- स्वसंयुक्तो गुरुर्ज्ञेयः सानुस्वाराग्रिमः स्फुटः

- अणुशेषोऽध्रिगोर्वापि युगलादिरविस्फुटः १८
- इति द्वितीया कण्डिका
- कण्डिका ३
- यदुदात्तमुदात्तं तद्यत्स्वरितं तत्पदे भवति नीचम्
- यन्नीचन्नीचमेव तद्यत्प्रचयं तदपि नीचम् १
- अयमग्निः सुतो मित्रमिदं वयमयावनाः
- प्रियं दूतं घृतं चित्रमभिशब्दश्च नीचतः २
- अर्केष्वेव सुतेष्वेव यज्ञेषु कलशेषु च
- शतेषु सपवित्रेषु नीचादुच्चार्यते श्रुतिः ३
- हरिवरुणवरुण्येषु धारा पुरुषेषु च स्वरति रेफः
- विश्वानरो नकारेषु शेषारस्वरितानराः ४
- द्वौ वरुणौ वस्वरित उदुत्तमं त्वं वरुण
- धाकारे चोरुधारायामुरुधारेव दोहने ५
- मात्रिकं वा द्विमात्रं वा स्वर्यते यदिहाक्षरम्
- तस्यादितोऽर्द्धमात्रा वैशेषं तु परतो भवेत् ६

- अदीर्घं दीर्घवत्कुर्याद् द्विस्वरं यत्प्रयुज्यते
- कम्पोत्स्वरिताभिगीतं ह्रस्वकर्षणमेव च ७
- निमेषकाला मात्रास्याद्विद्युत्कालेति चापरे
- ऋक्स्वरा तुल्ययोगा वामतिः स्यात्सोमशर्मणः ८
- समासेऽवग्रहं कुर्यात्पदं चात्रानुसंहितम्
- यतोऽक्षरादिति करणं पदान्तं तस्य तं विदुः ९
- सर्वत्र मित्रपुत्रसखिशब्दा अद्रिशतक्रतोरवग्रह्याः
- आदित्यविप्रजातवेदाश्च सत्पतिगोपतिवृत्रहा समुद्राश्च १०
- स्वर्युवो देवयवश्चारति देवतातये
- चिकितिश्चुक्रुधं चैवनावगृह्णन्ति पण्डिताः ११
- इति तृतीया कण्डिका
- कण्डिका ४
- विवृत्तयश्चतस्रो वै विज्ञेया इति मे मतम्
- अक्षराणां नियोगेन तासां नामानि मे श्रृणु १
- हस्वार्द्विवत्सानुसृता वत्सानुसारिणी चाग्रे

- पाकवत्युभयोर्ह्रस्वा दीर्घा वृद्धा पिपीलिका २
- चतसृणां विवृत्तीनामन्तरं मात्रिकं भवेत्
- अर्द्धमात्रिकमन्येषामन्येषामणुमात्रिकम् ३
- आपद्यते मकारो रेफोष्मसु प्रत्ययेष्वनुस्वारम्
- यलवेषुपरसवर्णं स्पर्शेषु चोत्तमापत्तिम् ४
- नकारान्ते पदे पूर्वे स्वरे च परतः स्थिते
- आकारं रक्तमित्याहुर्नकारेण तु रज्यते ५
- नकारान्ते पदे पूर्वे व्यञ्जनैश्च यवो हिषु
- अर्द्धमात्रा तु पूर्वस्य रज्यते त्वणुमात्रया ६
- नकारः स्वरसंयुक्तश्चतुर्युक्तो विधीयते
- रेफोरङ्गश्च लोपश्चानुस्वारोऽपि वा क्वचित् ७
- हृदयादुत्तिष्ठते रङ्गः कांस्येन समनिःस्वरः
- मृदुश्चैव द्विमात्रश्च दधन्वाँ इति दर्शनम् ८
- यथा सौराष्ट्रिका नारी तक्रँ इत्यभिभाषते
- एवं रङ्गः प्रयोक्तव्यो नारदस्य मतं यथा ९

- इति चतुर्थी कण्डिका
- कण्डिका ५
- स्वरा गडदबाश्चैव ङणनमाः सहोष्मभिः
- चतुर्णां पदजातीनां पदान्ता दशकीर्तिताः १
- स्वर उच्चः स्वरो नीचः स्वरः स्वरित एव च
- व्यञ्जनान्वनुवर्त्तन्ते यत्र तिष्ठति स स्वरः २
- स्वरप्रधानं त्रैस्वर्यमाचार्याः प्रतिजानते
- मणिवद्व्यञ्जनं विद्यात्सूत्रवच्च स्वरं विदुः ३
- दुर्बलस्य यथा राष्ट्रं हरते बलवान्नृपः
- दुर्बलं व्यञ्जनं तद्वद्धरते बलवान् स्वरः ४
- ओभावश्च विवृत्तिश्च शषसा रेफएव च
- जिह्वामूलमुपध्मा च गतिरष्टविधोष्मणः ५
- स्वरप्रत्यया विवृत्तिः संहितायां तथा भवेत्
- विसर्गस्तत्र मन्तव्यस्तालव्यो वात्र जायते ६
- सन्ध्यक्षरोपधे सन्धौ प्राप्तलुप्तौ यवौ यदि

- व्यञ्जनाख्या विवृत्तिस्तु स्वराख्या प्रतिसंहिता ७
- ऊष्मान्तं विरतं यत्र सन्धावो भवते च यत्
- विवृत्तिर्या भवेत्तत्र स्वाराख्यां तां विनिर्दिशेत् ८
- यद्योभावप्रसन्धानमुकारादि परं पदम्
- स्वरान्तं तादृशं विद्याद्यदन्यद्व्ययक्तमूष्मणः ९
- प्रथमा उत्तमाश्चैव पदान्तेषु यदि स्थिताः
- द्वितीयं स्थानमापन्नाः शषसप्रत्यया यदि १०
- प्रथमानूष्मसंयुक्तान् द्वितीयानिव दर्शयेत्
- न चैनान्प्रतिजानीयाद्यथा मत्स्यः क्षुरोऽप्सरा इति ११
- इति पञ्चमी कण्डिका
- कण्डिका ६
- छन्दोमानं न वृत्तं च पादस्थानं त्रिकारणम्
- ऋचः स्वछन्दवृत्तास्तु पादास्त्वक्षरमानसः १
- ऋवर्णं स्वरभक्तिं च छन्दोमानेन निर्दिशेत्
- प्रत्ययेन समाहारेफं मिमीत स्वरभक्तिषु २

- ऋवर्णे तु पृथग्रेफः प्रत्ययस्तु पृथग्भवेत्
- विद्याल्लघुमृकारं तु यदि तूष्माणसंयुक्तः ३
- ऊष्मणैव हि संयुक्तऋकारो यत्र पीड्यते
- गुरुवर्णः सविज्ञेयस्तृचं चात्रानुदर्शनम् ४
- ऋषभं च गृहीतं च बृहस्पतिं पृथिव्यां च
- निऋर्तिः पञ्चमा ह्यत्र ऋकारो नात्र संशयः ५
- शषसहरादौ रेफः स्वरभक्तिर्जायते द्विपदा सन्धौ
- इउवर्णाभ्यां हीना क्वचिदेकपदा क्रमवियुक्ता ६
- स्वरभक्तिस्तु द्विविधा ऋकारो रेफ एव च
- स्वरोदाव्यञ्जनोदा च विहिताक्षरचिन्तकैः ७
- शषसेषु स्वरोदायां हकारे व्यञ्जनोदयाम्
- शषसेषु विवृत्तां तु हकारे संवृतां विदुः ८
- स्वरभक्तिं प्रयुञ्जानस्त्रीन्दोषान् परिवर्ज्जयेत्
- इकारं चाप्युकारं च ग्रस्तदोषं तथैव च ९
- संयोगपरं छपरं विसर्ज्जनीयं द्विमात्रिकं चैव

- आसानिकं च न लघुसानुस्वारं घुटंतञ्च १०
- इति षष्ठी कण्डिका
- कण्डिका ७
- पथ्यापादः प्रथमो द्वादशमात्रस्तथा तृतीयोऽपि
- अष्टादशो द्वितीयः समापनः पञ्चदशमात्रः १
- पथ्यालक्षणमुक्तं या त्वन्या सा स्मृता विपुला २
- अक्षराणां लघुह्रस्वमसंयोगपरं यदि
- तत् संयोगोत्तरं विद्याद् गुरुर्दीर्घाक्षराणि तु ३
- विवृत्तिर्यत्र दृश्येत स्वारस्यैवाग्रतः स्थिता
- गुरुः स्वारः स विज्ञेयः क्षैप्रस्तत्र न विद्यते ४
- अष्टप्रकारं विज्ञेयं पदानां स्वरलक्षणम्
- अन्तोदात्तमाद्युदात्तमुदात्तमनुदातं नीचस्वरितम् ५
- मध्योदात्तं स्वरितं द्विरुदात्तमित्येता अष्टौ पदसंज्ञाः
- अग्निः सोमः प्र वो वीर्यं हविषा स्वर्वनस्पतिः ६
- अन्तमध्यमयोर्नाम्न्युदमनुदनिपाते

- आद्यात् स्वरितमुपसर्गे द्विर्नीचमाख्यात इति ७
- स्वरितात्पराणि यानि स्युर्धार्याण्यक्षराणि तु
- सर्वाणि प्रचयस्थान्युपोदात्तं निहन्यते ८
- प्रचयो यत्र दृश्येत तत्र हन्यात् स्वरं बुधः
- स्वरितः केवलो यत्र मृदुन्तत्र निपातयेत् ९
- पञ्चविधमाचार्यकन्नाम मुखं न्यासःकरणं प्रतिज्ञोच्चारणा
- अत्रोच्यते श्रेयः खलु वै स प्रतिज्ञानोच्चारणा १०
- यस्य कस्यचिद्वर्णस्य करणं नोपलभ्यते
- प्रतिज्ञा तत्र वोढव्या करणं हि तदात्मकम् ११
- तुम्बुरुनारदवसिष्ठविश्वावस्वादयश्च गन्धर्वाः
- सामसुनिभृतं करणं स्वरसौक्ष्म्यात्तेऽपि हि न कुर्युः १२
- इति सप्तमी कण्डिका
- कण्डिका ८
- कौक्षेयाग्निं सदारक्षेदश्नीयादशनं हितम्
- जीर्णाहारःप्रबुद्धः सन्नुषसि ब्रह्म चिन्तयेत् १

- शरद्विषुवतोऽतीतादुषस्युत्त्थानमिष्यते
- यावद्वासन्तिकी रात्रिर्मध्यमा पर्युपस्थिता २
- आम्रपालाशबिल्वानामपामार्गशिरीषयोः
- वाग्यतः प्रातरुत्त्थाय भक्षयेद् दन्तधावनम् ३
- खदिरश्च कदम्बश्च करवीरकरंजयोः
- सर्वे कण्टकिनः पुण्याः क्षीरिणश्च यशस्विनः ४
- तेनास्य करणं सौक्ष्म्यं माधुर्यं चोपजायते
- वर्णांश्च कुरुते सम्यक्प्राचीनौदव्रजिर्यथा ५
- त्रिफला लवणाख्येन भक्षयेच्छिक्षकः सदा
- अग्निमेधाजनन्येषा स्वरवर्णकरी तथा ६
- कृत्वा चावश्यकान् धर्मान् जठरं पर्युपास्य च
- पीत्वा धूमं घृतं चैव शुचिर्भूत्वा ततो वदेत् ७
- मन्द्रेणोपक्रमेत् पूर्वं सर्वशाखास्वयं विधिः
- सप्तमन्त्राननतिक्रम्य यथेष्टां वाचमुत्सृजेत् ८
- न तां समीरयेद् वाचं या प्राणमुपरोधयेत् ८अ

- प्राणानामुपरोधेन वैस्वर्यं चोपजायते
- स्वरव्यञ्जनमाधुर्यं लुप्यते नात्र संशयः ९
- कुतीर्थादागतं दग्धमपवर्णैश्च भक्षितम्
- न तस्य परिमोक्षोऽस्ति पापाहेरिव किल्बिषात् १०
- सुतीर्थादागतं व्यक्तं स्वाम्नातं सुप्रतिष्ठितम्
- सुस्वरेण सुवक्त्रेण प्रयुक्तं ब्रह्म राजते ११
- न करालो न लम्बोष्ठो न च सर्वानुनासिकः
- गद्गदो बद्धजिह्वश्च प्रयोगान्वक्तुमर्हति १२
- एकचित्तो निरुद्भ्रान्तस्तान्तगानविवर्जितः
- स तु वर्णान्प्रयुञ्जीत दन्तोष्ठं यस्य शोभनम् १३
- पञ्च विद्यां न गृह्णन्ति चण्डास्तब्धाश्च ये नराः
- आलसाश्चानरोगाश्च येषां च विसृतं मनः १४
- शनैर्विद्यां शनैरर्थानारोहेत पर्वतं शनैः
- शनैरध्वसु वर्त्तेत योजनानां परं व्रजेत् १५
- योजनानां सहस्राणि शनैर्याति पिपीलिका

- अगच्छन्वैनतेयोऽपि पदमेकं न गच्छति १६
- नहि पार्ष्णिहता वाणी प्रयोगान्वक्तुमर्हति
- बधिरस्येव तल्पस्था विदग्धा वामलोचना १७
- उपांशु त्वरितं चैवं योऽधीते वित्रसन्निव
- अपि रूपसहस्रेषु सन्देहेष्वेव वर्त्तते १८
- पुस्तकप्रत्ययाधीतं नाधीतं गुरुसन्निधौ
- राजते न सभामध्ये जारगर्भा इव स्त्रियः १९
- अञ्जनस्य क्षयं दृष्ट्वा वल्मीकस्य तु सञ्चयम्
- अबन्ध्यन्दिवसं कुर्याद्दानाध्ययनकर्मसु २०
- योजनानां शतं साग्रं शनैर्याति पिपीलिकाः
- अगच्छन् वैनतेयोऽपि पदमेकं न गच्छति २१
- यत्कीटैः पांसुभिः श्लक्ष्णैर्वल्मीकः क्रियते महान्
- न तत्र बलसामर्थ्यमुद्योगस्तत्र कारणम् २२
- सहस्रगुणिता विद्या शतशः परिकीर्त्तिता
- आगमिष्यति जिह्वाग्रे स्थलान्निम्नमिवोदकम् २३

- हयानामिव जात्यानामर्द्धरात्रार्द्धशायिनाम्
- नहि विद्यार्थिनां निद्रा चिरन्नेत्रेषु तिष्ठति २४
- न भोजनविलम्बी स्यान्न च नारीनिबन्धनः
- सुदूरमपि विद्यार्थी व्रजेद् गरुडहंसवत् २५
- अहेरिव गणाद्भीतः सौहृद्यं नरकादिव
- राक्षसीभ्य इव स्त्रीभ्यः स विद्यामधिगच्छति २६
- न शठाः प्राप्नुवन्त्यर्थान् न क्लीबा न च मानिनः
- न च लोकरवाद्भीता न च श्वः श्वः प्रतीक्षकाः २७
- यथा खनन् खनित्रेण भूतले वारि विन्दति
- एवं गुरुगतां विद्यां शुश्रूषुरधिगच्छति २८
- शुश्रूषारहिता विद्या यद्यपि मेधागुणैः समुपयाति
- बन्ध्येव यौवनवती न तस्य विद्या फलवती भवति २९
- द्यूतं पुस्तकवाद्यं च नाटकेषु च सक्तिका
- स्त्रियस्तन्द्रा च निद्रा च विद्याविघ्नकराणि षट् ३०
- यथा व्याघ्री हरेत्पुत्रान् दंष्ट्राभिर्न च पीडयेत्

- भीता पतनभेदाभ्यां तद्वद्वर्णान्प्रयोजयेत् ३१
- एवं वर्णाः प्रयोक्तव्या नाव्यक्ता न च पीडिताः
- सम्यग् वर्णप्रयोगेण ब्रह्मलोके महीयते ३२
- इति द्वितीयस्याष्टमी कण्डिका
- इति द्वितीयः प्रपाठकः

इति नारदीया शिक्षा समाप्ता

## 15) सामवेद प्रातिशाख्यम् (पुष्पसूत्रम्)

पुष्पर्षिप्रणीतम्

- अथ प्रथमः प्रपाठकः
- ओम्।। उच्चामही पुनारवजये प्रत्वौशनं कयादेव्यं तँ वोधसं तरोलेयं स्वादिहितं पवस्वेन्द्रमच्छसफपौष्कले पुरश्श्यावागवे अभिप्रिकावं स्वासुझेयं एह्यूसाकं वयंभरं अधार्मेधं पान्तँहव्यं प्रवश्शक्त्यं वयंकाण्वे प्रथमः ।। 1 ।।

- इन्द्राकक्षं अयन्दासौर्द्धसद्मने आतूपारं अभित्वार्षभं इदङ्गारं इदंघृतश्चुन्निधनं आत्वेतिथं योगेमेधं इन्द्रसुते कौत्सं आश्वन्द्रोणासुतासोमैकचौ प्रसोजयन्तृचे प्रसोहितं अयासफं आक्षारँ हर्य प्रसुन्वागौरी गौतममेकर्चाः वृषा-यौक्ताद्यं पुनायास्यमैडें द्वितीयः ।। 2 ।।
- एतास्वेवत्रिणिधनं वृषाशोसिष्ठं अभिप्रवःश्यैतं त्वामिदाछन्दसं यस्तेप्मतं पवस्वमच्छपूषासु शङ्कुसुज्ञानरी-वितान्येकर्चाः पूषातृचेक्रौञ्चं वृषायामं एवामही विश्वादँष्ट्रपूर्वं उच्चाक्षुष्टुभं अभिसोमद्धतमे प्रहिन्वाप्कारान्तं तिस्रस्सं-कोशः घत्वाष्टंभं तरणिरवं तिस्रः ष्ठौहे तृतीयः ।। 3 ।।
- आसोसखावाचःशोक्तएकर्चौ सुतावितत्वाष्ट्रीत्र्यन्ते स्वासुहिष्ठीयवर्णरश्च्यानि दक्षसाकामं तवदंप्ट्रोत्तराभी-शवेस्वःपृष्ठञ्च पुनासत्रा विश्वाःशोकं योरापृश्नि और्णात्तरँ स्वासु त्वँहिहत्कं आतीषासोमः पुरोनानदं वात्सप्र सोमः सैन्धुक्षितमग्निंवश्चतुर्थः ।। 4 ।।

- प्रियमिमं वितंजुषस्व अर्षांशाकलवार्षे उष्वाण मानवानूपवाम्नाग्नेयानि यत्सोशवं तनिव्यँशुः द्युम्नंप्राण वन-क्रोशे जसावितपार्थे स्पत्यमिन्दुः आतेमञ्जयं इन्द्रामित्रं असामहामित्रं इन्द्रावृधीय क्रौञ्चे पञ्चमः ।। 5 ।।
- एतास्वेववर्यः मृज्यौक्ष्णोरन्ध्रस्वारैडे जजिद्वरुणसामगोष्ठाः उत्यं हवद्देव्यं रेववन्तीयं परिस्वावैदन्वतानि तृतीयाद्यचतुर्थानि ससुतंवोदीर्घकार्ण्णे सोमागौरीमधुश्छुन्निधने तथाकौञ्चे वाङ्निधनमैडे श्नौष्टमयापवा अग्नेगूर्दः प्रवोर्चांपोद्धँ शपुत्रे षष्ठः ।। 6 ।।
- वृषातनिपर्णैडकूलीयानि पुनाकण्वतरगौङ्गवयास्यानि स्वासुप्रवदभिनिधनवैखानसानि यस्तेमौक्षं एषस्य शार्करं प्लवस्सखा पुरोवितकार्ते ज्यक्षाहविपं येसोजरा वात्समाते त्वन्नःसौश्नवसं यदि वीङ्कं अध्वर्योरूपे सप्तमः ।।

- एतास्वेवाशुमार्गीमित्रटतसाकलम्बानि अभिसोद्विहिङ्का पार्श्वहन्मगतहाराच्छिद्राणि। प्रहिन्वादुक्थं उद्धर्ता यदि नैपातिथं उभयंवैयश्वं युषक्सुरूपाद्यभासकाक्षीवतासितान्यष्टमः ।। 8 ।।
- द्युम्नमैषिरं प्राणात्रैतं अभीनोवितकौत्सशुद्धाकौञ् रयिष्ठौदलानि स्वासुधर्म हिन्वविशीयं स्वासुशनसांवर्त मारुतानि स्वासुधर्म हिन्वविशीयं स्वासुशनसांवर्त मारुतानि जिघ्नतइत्यदारसुरोपोत्तरँ हरिश्रीनिधनसैन्धुबाभ्रवैडा-नांसंक्षार ऋषभश्चेति नवमः ।। 9 ।।
- तोषिंपृष्ठकौल्मपृष्पदैर्धवैयश्वाद्याभीशवानि श्रीणन्तो वासिष्ठं। असासामराजं स्वासुश्रायन्तीयं यतः समन्तं त्वँ सोमाश्वसूक्तशाम्मदावचीनेडविष्कृतानि त्वंपर्णं पवस्वमनसं परित्यंवितनिहवहिष्ठीयानि दशमः ।।
- एतास्वेवासितसाघ्न पाराणि स्वासूविधर्म उपोषुश्रुध्यं स्वास्वैध्मवाहककुभोद्वँशीयानि उच्चाजिगाभीके पुनो-त्सेध ह्नीयनिपेधानि आजावितं माचितिथं उदुत्येवर्तः

अच्छकूलोयंपर्यूषुश्यावागवे धन्वहविष वाङ्निधनमेकादश सूर्यस्याग्निं वाजजिद्देव्ये दशरात्रः ।। 11 ।।

- वृषामही पूनामन्तं उत्सःप्लवः प्रत्नंदैर्घं प्रकापार्थं चिद्वर्तः यस्तेजरा अच्छसुज्ञानं पुरःकौञ्चं प्रोकावं अग्निंवः-सत्रा प्रसोमाश्वं प्रसोमदेपज्रं स्वासुवर्त्तः पवते ज्ञानकाशीते प्रसुवितं आजाम्योकोनिधनं सवीरौदलं प्रसून्वा साध्ने प्रथमः ।। 12 ।।
- वृषाष्मतयौक्तोत्तरे तोषिञ्छन्दसमृचि ऐडमायास्यं तृचे श्रीणन्तस्त्रिणिधनं वृषाशोपार्थं अभिप्रवर्त्तः शंक्रुविते पवस्वायंपूषा अभ्रामही विश्वादँष्ट्रोत्तरं उच्चारूपम् अभिसोरौरवं प्रहिन्वाग्नेयं आत्वावर्त्तः स्वासुक्षुल्लकवाचे सखाज्ञा-नदासे सुताऽऽन्धी द्वितीयः ।। 13 ।।
- पविराजं पवस्वादारतोषिपृश्न्येकस्यां तृचेभीशवोत्तरं यौधाश्रीणं उहुवाअस्यसिष्ठं योरावर्त्तः स्वास्वौर्णाद्यसु-ज्ञाने पुरस्त्वाष्ट्र्यर्द्धैडं स्वासुलौशाद्यैडशुद्धीये अर्षा सन्तनि अभिसोमानवानूपवाम्नाणि

अभित्रिसंपा यशावर्त्तः असा-गौषूक्तं प्राणाज्ञाने तृतीयः।। 14 ।।

- एतास्वेवदासं पवस्ववारयिष्ठं असालौशोत्तरं यजिष्ठं साध्यं इन्द्राऽ1श्वसूक्तं मृज्यमन्तत्रिणिधनायास्ये साकं-सिष्ठं पिबा वर्त्तः परिस्वैध्मवाह तंवर्चिज्ञानकाशीते स्वासुरुतान्धेतु प्रसोर्चि वर्त्ते उत्सःप्रत्नं वर्त्तलेये तथाऽभिसोमत्स परिधीन्दुहेति च चतुर्थः।। 15 ।।
- हाउनित्रं प्रतेलौशाद्यं मन्द्रग्धा वर्तलेये इन्दुः संपा पवस्वत्वाष्ट्री द्विरभ्यस्तं गोविल्लौशोत्तरं पवमावृषो वर्त-लेये अयापवासिष्ठं ज्योतिर्मरुतां उच्चासत्रा पुनावर्त्तः अभिवायुंपार्थं पुरोमधुश्चुज्ञीयबृहदाग्नेयं अभिसोगौङ्गवं प्रहिन्वा-यौधा स्वादिक्षुष्टंभं पञ्चमः ।। 16 ।।
- आजातमं अभ्यंडंकावं तोषिमन्तं यऔसितं वृषा याममैडं घत्वावर्त्तः तिस्रोहितं सहत्वाष्ट्री अस्यसत्रा तवो त्सेधः दुहापृश्नि

शिशुंपार्थं द्युम्नम्प्राणासफश्रुध्येकर्चौ इन्दुर्निषेधः धर्ताकावं क्रतुंष्टुंभं सखापौष्कलं कतुंश्यैतं अच्छश्रु-ध्ये षष्ठः ।। 17 ।।

- कतुंधसं पवतेपौष्कलं अस्यामही तोषिलेयमृचि। अयं सोपार्थं स्वानोहितं पवसत्रा पर्यूदेव्यम् इन्दुर्यद्वा परिप्रधवारं सूर्यस्यकावंतृचे पवमापौरुमीढं मन्द्रनवाद्यं परिधीनित्रं अभिसोद्वाजं उत्सःसिष्ठंयद्वयमेनमिति प्रसो , गवशुद्धीय एकर्चाः कतुंमोढं तंवर्चिंश्रुध्ये सप्तमः ।। 18 ।।
- कतुंमानवाद्यं प्राणापौष्कलं कतुंनित्रं सोमःश्रुध्यं कतुंद्वाजं अभिसोतिथं तोषिदुक्थं यस्तेसोमसामाध्यर्धेडं अदब्धस्सुमाण्डवं अस्वजरा तोषिरवं श्वेदेवानिहवः संवत्सरः ।। 19 ।।
- प्रतिनानदं आनोविश्वाश्यैतं पुरोदलं स्वादोःश्यैतं पवस्वेडानांकर्चः प्रत्नयौधा। शिशुन्देव्यं कयास्वारं परि-प्रधन्वसफमेकस्यां। उच्चास्वारसौपर्णशाक्वरे पुना ष्टंभलेये। श्रायभरं तरोवारं अच्छैकस्यां पुरस्तृचे यास्यमैडं स्वा-नोजरा वर्णिषं पुना वषद्कर्चे प्रथमः ।। 20 ।।

- तृचेमच्छौपगवं निषेधःश्रायं अयापार्श्वं इन्द्रामहीकर्चाः पवस्वमलेयंतृचे त्वेसोयौधादैर्घं अधाद्यौतानं इन्दु-मारुतं स्वादिजरा नदंवःश्रुध्यं देवोऽर्दीशिङ्गीयं उत्तेमही मन्द्रजरा। पाहिरवंतृचे दैर्घं विश्वस्मात्समन्तं तास्वेव जयं इनऔशने द्वितीयः।। 21 ।।
- कयातेदेव्यं अन्नआयाधसं अच्छलेयं अदास अदासँहितं भद्रोऽग्नेवाजसफष्कलेकर्चौ तृचैश्रुध्यं विशोवाश्व-मृचि तृचेन्धीगवङ्गीये समिद्धंङ्गीयकावे उपत्वावारं उच्चेषन्तोकेजरा स्वासवषट् प्रसोतृचोगौङ्गवं शग्धूहारा त्वंकौ-ल्मल आशु मदच्युतः कर्चे तृतीयः ।। 22 ।।
- प्रधसत्रा प्रसुवाश्वंकर्चौ औदलंतृचे प्रदैङ्गीयं स्वासुदैर्घं शग्ध्यूवर्त्तः स्वादिष्कृतं अस्यष्मतं यस्तेहितं अयंपू-वाश्वं विपश्चितोभार्गवं स्वासुयौक्तस्त्रुचं प्रसुन्वा गौतमंतृचे वृषाजिगस्वारपर्णे पुनादैर्घं यस्तेसुरूपौत्तरं त्वंहिशंक्रु सुझापवस्वदेव आसितमयंपूषेति चतुर्थः ।। 23 ।।

- उच्चात्र्रृषभषूक्ते अभिसोमोत्सेधः स्वानोवारं प्राणाश्रुध्यं पुरोनिषेधः प्रधन्ववर्यः जिह्ममही साकंपार्थं इमाउ-त्वाश्यैतं यस्यलेयं पवमासँहितं। आसोगोमन्नः सफश्रुध्ये भीनोवाश्यावागवे। अञ्जतेकावं तोषिदँष्ट्रोत्तरं अभित्वा-कण्वरं आनोदोविशीयं पञ्चमः ।। 24 ।।
- परित्यंश्यावागवे पवित्रंकावं स्वादिमौक्षं ज्ञीयर्क्षु विशीयं त्वन्नश्चिवारं उच्चास्वारसौन्धुक्षितं तोषिवरुणसाम यस्तेकाक्षी अच्छादासं पुरोवाघ्र्यवैतहव्यसोम त्रासानि अग्नेत्वंसत्रा अभिसोदोविशीयं स्वासुवारं प्रतूर्तिषुवर्तः त्वामृ-षभः तोष्युत्सेधे षष्ठः ।। 25 ।।
- उत्सेधएवश्रीणं अच्छविशीयं अयंपूनिषेधः इन्दु पुष्पं च्यावनमेकस्यां पवस्वतंवःपुरोजनित्रे पुनातिथं। तवःशुद्धापदान्तं स्वादिमच्छगौषूक्ताश्वसूक्तैकर्चौ यज्ञैह्मूषु तन्तेश्रुधीतिचवाराणि पिबोत्सेधनिषेधौ उच्चापर्णमैडं दुहा-समन्तंपङ्क्यां पुनावरुणसाम्नि सप्तमः ।। 26 ।।

- तवाहंमन्तजये रेवतीर्देव्यं स्वासुसत्राभरं तवत्यत् पुरोजागतँसोमसामयद्भित्यमिति प्रत्नंमहो इन्द्रंपर्मंमैडं वसुरुचःसत्रा अधयदोविशीयं प्रत्नमुत्सेधः तदिदाश्यैत रक्षःसुरुपोत्तरं सुमन्मवारं पुनावैयश्वंकर्चः वषडन्तमुत्सः यस्तेसत्रा पवस्व काचीनेडं एकाहाः ।। 27 ।।
- इति प्रथमः प्रपाठकः ।।
- अथ द्वितीयः प्रपाठकः
- पन्यंकक्षं आत्वाविदँष्ट्रंपूर्वं परिस्वासुरूपोत्तरं स्वासु हविषजरामार्गीयवानि इदंवारं पवस्वसाकमृचि अभि-सोतं वोजनित्रे अच्छजरा प्रसोजरासोमसामरोहितकूलीयानि प्रसोक्षारान्तंजयं उद्धेस्वारंपर्णं अच्छाक्षारं अभिप्रिखा-नसं अस्यप्रत्नाऽऽशुमार्गीयवे प्रथमः ।। 1 ।।
- एतास्वेवमित्रटसाकलंबानि अभिसोदैर्घं प्रहिद्विहंकादेव्यं एवमेवतनिहन्मे मोषुत्वापाश्वं अस्तासन्तनि यस्ते-

सुरूपाद्यभासासितानि अभिद्युवाचः सखातृचेशौक्तं
इन्द्राऽऽसितकौत्सशुद्धाकौञ्चरयिष्ठानिद्वितीयः ।। 2 ।।

- इन्द्रापविज्ञीये स्वासुविशीयं उच्चासुरूपोत्तरादारसंक्षाराः तोषिपृश्नि तथाश्रीणं स्वानोहाविष्मशाम्मदाव चीनेडविष्कतानि अयंपूज्ञीयहिष्ठीये धर्ताज्ञीयं प्रसुपारं अयंपूकौञ्चाद्यं कस्तंदेव्यं तिस्रःसैन्धुक्षिते तृतीयः ।। 3 ।।
- सुतात्वाष्ट्रीसारे पुनापृशन्याभीशवोत्तरे सिष्ठमयं एदु देव्यं स्वानोगौषूक्तं प्राणावारं दक्षसत्रा परिप्रिद्वाजं अमिं-णाक्रोशं तोषिवाम्रमानवानूपानि श्रीणाऽऽग्नेयं सोमाः श्यावागवनिषेधाः पवस्वश्यावागवे चतुर्थः ।। 4 ।।
- एतास्वेवाकूपारं सोमाःकौञ्चाद्यं सुतात्वाष्ट्रूर्ध्वेडं पुरः शुद्धापदान्तं असाक्षितंऐडं तोषियौधाद्वैगते श्रीहन्मनं परः पारसाध्रे पवस्ववात्रेयं परिप्रिषूक्तमेकस्यां प्रत्यस्मैवितं इन्द्राच्युतं प्रसुदासोत्तरमृचि अभिप्रिज्ञीयं नमस्तेजरा वृषाज्ञीयं स्वासुभरं एनामित्रे पञ्चमः ।। 5 ।।

- पवस्वदत्वाष्ट्रीयदीङ्ख्यन्त्यां अभिसोदँष्ट्रोत्तरमृचि तृचेभीशवोत्तरं स्वःपृष्ठंहिन्वा पयमेसिष्ठं पुरःक्षुल्ललेयं त्वमिन्द्रद्विहिंकादेव्यं प्राणावार्शं पवस्वङ्गीयं बृहदाग्नेयंनरः तोदःश्रीणं पिबापृष्ठं अध्वर्योपर्णैंडकूलीये तवहन्मगतगौ-ङ्गवयास्योनि स्वासु वाराहवाशे षष्ठः ।। 6 ।।
- पवस्वदेक्षितमैडं गोमन्नस्त्रैतं पुरःकौञ्चाद्यगौतमे प्रो सारथि आतेस्त्रौग्मतं हाउहुवाइशिशुंसिष्ठं परित्यंऊर्ध्वेडं त्वाष्ट्रीङ्गीये पुनामद्वकाण्वे अभीनोनिषेधसाध्रङ्गीयानि स्तोममन्तं पुनासोमसाम आत्रेयंपुरः शिंशुउहुवाइसिष्ठं कौत्सं-अभीनः स्वारं दर्ताशार्ङ्गं सप्तमः ।। 7 ।।
- हाउहुवाअकान्वासिष्ठं परित्यमासितोत्तरं इन्द्रापार मथ्यस्तंकर्चौ असायाममैडं आजागृशनं परिप्रधन्ववा-जजिदहीनाः ।। 8 ।।
- विशोवितमृचि तंवःतृचेश्रूध्यं यजिष्ठमैध्मा जिघ्न पर्णैंडकूलीयसन्तीनि पुनादुक्थं पवमानोजराश्रवसे भीनः कार्तं

प्रसोमार्गीं प्रसोमदेगतहन्महारायणानि स्वादिकाक्षी भासे प्रसुशुद्धापदान्तं वृषासुरूपोत्तरऋषभे पुनापृष्ठे प्रथमः ।। 9 ।।

- एतास्वेवकौल्मलं एषस्यशंकु काण्वमाष्कृतमभिसो पुनावाशँ औशनंसाकं इमाधसं गोमपौष्कलं उभयंवाशं त्वामिमानवोत्तरं कईंकाण्वमाष्कृतं अभिशग्धिमानवाद्यं आत्वाद्वाजं योरानित्रं यशस्त्वमिन्द्र अग्निर्मूंसत्रा पिबा जम-वर्त्तः काण्वमामन्द्रैरभिनिधनं यथामनाज्यं त्वमङ्गमीढे द्वितीयः ।। 10 ।।
- आत्वेन्द्रसुतोद्धँशीयं प्रतिष्यैषोजरा श्रुध्यमुषस्ताश्वि प्रतुज्योतिषंयत्प्रगायतेति अबोइदमाभाइतिऔशनानि आशुउच्चा त्वंसत्रा श्रुध्यंपवस्व अभिप्रिसिष्ठंयदेषप्रकोश इति जनस्यैताऽबोकावानि तोषिकण्वतरं तन्तेमभरं पुना छन्दसमेकस्यां तृतीयः ।। 11 ।।
- तवाहंपृश्निएकस्यां अप्सामार्गी गोमानाग्नेयंपङ्क्त्यां सन्तनीन्द्रः गोष्ठःपुनापङ्क्त्यां तन्वामार्गी वयंघ सन्तनि प्रहिन्वाछिद्रं

अभीनस्त्वाष्ट्र्येकस्यां त्र्यन्तंहिन्वन्तीडानां उपोचीडं उत्सोवितं गृविःञ्जीयं पवमाकण्वं प्रसोमाभीकपर्मैडे प्रसोद्विर्हिकादेव्यं स्वादिशवं प्रसुवैश्वामित्रं स्वारकौत्से चतुर्थः ।। 12 ।।

- एतास्चेवौरुक्षयं वृषाहरिश्री यस्तेशाम्मदावाश्वसूक्तानि अयंपूकौत्समैडं उच्चामित्रटतसाकलंबानि औशनवै-रूपेतिस्त्रः सुतासाध्रवाश्वे तवाहुंपुष्पदुक्थमाण्डवानि विदावस्विति यस्य निधनं परिप्रिया मार्गीयवंईनिधनं पुरः शुद्धीयंऐडं उष्वावैष्णवाद्ये पञ्चमः ।। 13 ।।

- उष्वा वैष्णवं द्वितीयमेकस्यां तृचेस्त्रुचं असासोमसामाध्यर्धैडं पवस्ववासदस्यवं परित्यंवाङ्निधनंकौञ्चं पर्यू वितमृचि ऒकोनिधनमजी। मृज्यकण्वतरमेकस्यां तृचेपुष्पोत्तरं वृषाषक्तकले पुनोभयतःस्तोभङ्गौतमं पुरःत्वाष्ट्री-स्वारान्तं आकारान्तंच उच्चामार्गी पुनाद्विर्हिकादेव्यगतपुष्पाणि अयंपूमधुश्चुद्ययोजिपुष्पोत्तरेषष्ठः स्वाद्याश्वसूक्तमेक-स्यांसत्राणि ।। 14 ।।

- प्रत्नमुद्वत् उपशिक्षासकं इन्द्रविश्वालेयं तंवोभरं त्वमङ्गककुभं वरिवःसाहीयं उत्सोऽभिनिधनंकाण्वं एष ब्रह्मालेयं आष्कृतंतंवो वयमुत्वालेयं उपदविपवज्ञीयानि ससुशिक्षासकष्कलेकर्चौ मत्स्यलेयंतृचे स्वासुधसं उत्तरयोः ककुप् आत्वालेयं परिप्रधन्वपौष्कलमेकस्यां स्वादि कौत्समैडे प्रथमः ।। 15 ।।
- सखा कौञ्चमयंपूषेतियद्वितीयं एवाभरं इन्द्रंविश्वार्मैधं इन्द्रायाहिधिये गायन्तिलेयं आयःपुरमग्नेतकमश्वं एना प्रत्यु इमाउवामिति चैकैकस्मिन्वारदेव्य श्रुध्यानिसन्धौ अग्ने विवस्वेतिचतानि यज्ञा महावैश्वामित्रे द्वितीयः ।। 16 ।।
- एतास्वेव दैर्घं अचिकहितं पवस्ववषद्धर्चः पुरो ज्ञीयं उत्तरेगायत्र्यां विधुंवषट् बण्मकिमित्तेविते श्रायन्तीयं पवस्व आन्धीपवस्वसोम उत्सोद्यौतानमेकर्चाः प्रायश्चित्तानि ।। 17 ।।
- अभित्वा कण्वरंउत्तरेककुभौ इन्दुःनौधसश्यैते सनः कौत्समैडं उत्सोधसं पुरःतृचे पारमभ्यस्तंयत् पुरउ-त्सः श्यैते

पुरोधसंकर्चाः तंवोनौधसश्यैतं अभिप्रववःश्यतनौधसं अभित्वात्वामिद्धिवारे तंवोदाभिप्रवःकौञ्चे अभि-त्वापूर्वकण्वरं त्वामि त्वँ ह्महि कण्वबृहत् यद्या यदि महावैष्टंभे प्रथः ।। 18 ।।

- पिबाश्रुधीति च तमसं एतास्वेवमरायं रेवाँ इद्वावारं प्रसोप्रसुकण्वतरं पुनाऽयंपूषाकण्वबृहत् अभिसोसुतासो-ष्टम्भे तवपुरः इतितमसं एतास्वेवमरायं इन्द्रायेन्दोवारं इममासितं असात्वाष्ट्री यदिन्द्रचिप्रियं पुरांभिन्दुः महावैश्वा-मित्रेद्वितीयः ।।
- गायन्तित्वाअभ्यासंत्वाष्ट्री एन्द्रयाकौञ्चाद्यं इममसागायएन्द्रयाचवितानि देवः कण्वरं यज्ञाकण्वबृहत् पुरो-वात्सप्रंजनिताज्ञीयं स्वासुमरायं त्वान्ध्यांशुद्धा सुष्वापारंकर्चौं सोमाः पवन्तज्ञीयं स्वासुवाराद्यं , जनिताश्यावाश्वं प्रतेशैखण्डिनं गोवित्श्येनः तन्वाहवद्देव्यं रसंमार्गीयवे तृतीयः ।। 20 ।।

- अयपवावार्ततुरं ज्योतिर्जागतं वरुणसाम प्रवत्प्रका शिशुमुद्धत् अकासामराजं प्रकारथईयम् शिशुंज्योतिषं अकान्ज्योतिष वात्सप्रे श्रृङ्गंआजा पुनायामे अत्रैवगोराङ्गिरसं सोमीयमेतमुत्यमिति प्रोवाराहं उहुवाउधर्ता हाउहवा-असाविसिष्ठे प्रोअपामीवधर्ता कन्दे असाविसिमानां निषेधे चतुर्थः ।। 21 ।।
- प्रवाजिबोधीयं अदृश्यात्वाऽभिनिधनंकाण्वं अग्नआइन्द्र बण्मनैपातिथानि अच्छा श्रायन्तीयंक्षुद्राः श्राय-न्तीयं क्षुद्राः ।।

- स्वासुतरं एनाप्रत्युइमाउवामिति च त्वामत्बृहत् अभिसोऽन्तरिक्षं यद्यावैरूपं पवित्रमरिष्टं पवस्वदाथर्वणं पिबामहावैराजं अर्षायण्वं इन्द्रोबृहद्गिरंश्मे स्वादोर्वाजीयं पवस्ववाऋषभाष्टेडौ इन्द्रायेन्दोरेवत्यः सुरूपऋषभे उभेयच्छयेनं इमानुभद्रं

यस्तेऽग्नेरर्कः पवस्वदेशिरामर्कः तोषिस्थानसङ्कृतिभर्गयशाँसि सुषाऽसाविसोतमसोर्कः कयातरं दशरात्रः ।। 23 ।।

- पुनातरं अभिसोऽङ्गोरूपं तोष्यांवणं अर्षापत्यशाक्वरे यज्ञायज्ञा च तारं मत्स्यबृहत् प्रत्यस्मै तरं यज्ञाप्रसु-स्वरञ्चतुर्थं मत्स्ययंपूषाद्वितीयं एतास्वेवतृतीयं प्रत्यस्मैसुतासः प्रथमं अस्यप्रत्नांभ्राजं विभ्राड्वबणमेन्द्रमिद्दे श्रायन्तः कीर्त्यं इन्द्र कपुरःश्रायविकर्णं परिस्वानआभ्राजं उच्चाऽग्नेर्वतं मूर्द्धापुरोभासे तवाहन्तरं पुरोजि बृहत् परीतस्तरं रेवतीरेवत्यः त्वमग्ने बृहत् अभिसोपरितोवार्कजंभाद्योत्तरे तदिदात्रिकराजनदेव्यं परिस्वानःशिरामर्क अग्नेतवषड्चे इलान्दंसंवत्सरः ।। 24 ।।
- पुरोवणं स्वादिशिरामर्कः अर्षायस्तेवार्षाहरे अभित्वात्वामित् तरबृहत्द्विपदोत्तरे पर्यूषु नदँ सँस्तोभः पुनास-सहमेकस्यां धतदीर्घतमसोर्कः अयंपूभर्गः स्वासुवत्साः माभेमबृहत् यस्तेस्वाशिरामर्कः किमिबृहत् पवतेयस्तेबल-भिदेकर्चौ

त्वमिन्द्रयशः पुरोजिभर्गः पुनास्थानं स्वासु सप्तहल्येसामनी पुरः इन्दुरेकर्च एकाहाः ।। 25 ।।

- आज्यदोहानिप्रतिलोमानिप्रसुन्वाऽयँ सोतिस्रोवाच इति श्रायकृतिः स्वासुरश्मं अश्वव्रतंअभिवाजी व्याहृति-सामानिपञ्चभूर्भुवःस्वःसत्यंपुरुष इति स्वर्णिधने च अयंपूतमसः कर्चः श्रीणास्थानं तिस्रोऽग्नेरर्कः परिप्रधन्वदीर्घत-मसोर्कः अभित्वावृषभतरं यज्ञाबृहत् अभिप्रिवृषापवित्रधर्त्राइतिस्तोमाद्विरिडचतुरिडषडिडाष्टेडानि पुनावणं परिप्रि-यास्वाशिरामर्कः सुताबृहत् पुरोवार्कजंभाद्यं आसोमान्तरिक्षं अभिसोवणं अग्निंवोवाजीयं स्वाद्यग्नेरर्कः द्विर्यदीर्घत-मसोऽर्कः परिस्वापयोहीनाः ।।
- माभेमतरं अग्निंमहेनः प्रतिवाजीयानि अभिप्रियादीर्घतमसोर्कः उत्सोभर्गः परिधीनाथर्वणं श्रीणन्तस्तमसः परित्यँसङ्कृत्येकर्चाः पुनायशः पुरोजंभोत्तरं उत्सःसँसपउत्तमः अभिप्रवाद्यं पुरो द्वितीयं सत्राणि ।। 27 ।।

- तंवोवणं अभिप्रिवणं वृषाचैकवृषञ्च पुनाश्विनोर्व्रतं पुरउत्तमे तास्वेवापांव्रते पुनागवांव्रतं स्वाद्युत्तरं एनाप्रत्यु-इमाउवां अग्नेविवस्वत्त्रिकद्रुकेषुबृहत् अग्नेविवस्वत्तरं प्रत्नंसखा तौरश्रवसेप्रतिलोमे याममायज्ञौः प्रायश्चित्तानि ।। 28 ।।
- यज्ञेन्दुरेकर्चः सखायोधाबृहत् , द्विःसखा , त्रिःपरितन्दुः, योधाद्वौद्वौपादौद्विरम्यस्येत् पुनातरं उत्सःप्रत्नं द्विरभ्यस्तं अभित्वातरबृहत् त्वामित्बृहत्तरं त्वामित्त्वँह्येहिजंभं स्वासुह्नस्वा यदिन्द्रयेति च यद्यायदिन्द्रयान्तरिक्षे स्वासुषभः श्रुधीहवमिति च त्रिकप्रोषुवत्साः अतीषङ्गोयदिन्द्रेन्द्रायाहि पुनापूषा जंभाद्यं अभिसोह्नस्वा सुतासोह्नस्वा-न्तरिक्षे तवपुर इति वैराजत्रृषभं सोमउष्वापवस्ववत्साः तयोरेवातीषङ्गः प्रसोप्रसुतरं पनापूषाबृहन् अभिसुतासोरूपे तवपुरइतिमहावैराजं परिस्वारेवत्यः अभिसोसुतातरं तवबृहत् सोमउष्वापवस्वतरं मृज्यसोमाबृहत् पवस्वश्रेयः सुतासोरिष्टं अग्नआयाह्यन्तरिक्षं

होतारंवत्साः अक्रान्तमसः सोमउष्वा पवस्वसिमाः क्षुद्रा इति क्षुद्राः ।। 29 ।।

- इति लघुस्तोत्रीयाधिकारः ।
- इति द्वितीयः प्रपाठकः ।
- अथ तृतीयः प्रपाठकः
- सू ।। अथ, तालव्यं आइ यद्वृद्धम्।।
- उच्चा ते इत्यामहीयवे - उच्चाता 3 इ जात मन्धसाः।।
- (नात्र वैयाकरणरूढो वृद्धशब्दः। अत्र सामलक्षणग्रन्थे वृद्धशब्दः प्लुतपर्यायः।)
- सू ।। अवृद्धं प्रकृति ।।

- सू ।। ए इ ऐ ई इत्येतानि ।। ( तालव्यानि )
- सू ।। आइ प्राप्तमोइ भवति हि शब्द एवाहि सौभरामहीयवयोः ।।

- सू ।। एहीमिहवर्द्दवोदासे ।।
- व्वा ।। एहीमस्यद्रवेत्यत्र , हीशब्दे , आइप्राप्तं , ऒइ भवति - इहवद्दैवोदासे ।। ऐ होइमा23 स्या ।। 5 ।।
- सू ।। त्वँ हि कौल्मले ।।
- सू ।। एकारश्च प्रकृतिप्राप्त ऐ भवति इहवद्दैवोदासे पुनश्चा
- सू ।। अवृद्धमप्याइ, भवति , ईशानकण्वतरे स्तावे ।।
- सू ।। पवन्ते कौञ्चे ।।
- सू ।। वसोनिकेऽभिनिधने ।।
- सू ।। यद्वृद्धं प्रकृति भवति तस्य ग्रहणं ।।
- सू ।। निधने हीषीस्थं सर्वत्र ।।
- सू ।। नजिनं वृषासन्तनिति ।।
- सू ।। शिशुं तिस्रो हिते ।।
- सू ।। चवि प्रत्नंपी जये ।।
- सू ।। भिर्न्न त्वेसोम जये ।।

- सू ।। निमा यस्ते हिते ।।
- सू ।। ममद्रि परीतायां मानजययौः ।।
- सू ।। विषदिन्द्रोम सन्तनिनि ।।
- इति प्रथमः खण्डः ।।
- सू ।। यौधा देव स्तावे ।। 1 ।।
- सू ।। शने षीद इन्दुः ॠषिः येना ।। 2 ।।
- सू ।। देव्ये खीनां ।। 3 ।।
- सू ।। धसेऽभि षुधे रिन्न ।। 4 ।।
- सू ।। सँहिते योनिं द्रोणेसर्वत्र पर्षि ।। 5 ।।
- सू ।। सफे पीत्वा स्तावे कमीत् नाए ।।
- सू।। ष्कले ताइ सइ विदे इन्द्रः अप्सुजित्सर्वत्र।

  नान्त्योद्वँशीयश्रुध्य जराबोधीयेषु ।।

- सू ।। वाश्वे जिति श्नथि घजि योवृद्धाद्दी सर्वत्र न कार्तयशोपद्रव षेध सोमसाम साध्रेषु श्वाचि ।।
- सू ।। धीगवे धजि न स्तावे अभि ।।
- सू ।। कावे धिर तार्त्त्री अधितृतीयायां ।।
- सू ।। ज्ञीये पप्री सर्वत्र सिषं दाशे जेषु ।।
- सू ।। नार्मे मई दमिः व्याभिः तिशू ह्माणि ।।
- सू ।। काण्वे तवेत् यन्ति। यन्ति प्रथमः ।।
- सू ।। कक्षे सुते ।।
- सू ।। रात्रिदासे षि ।।
- व्या ।। इहद्दैवोदासे अधिबर्हिषीत्यत्र षिशब्दः प्रकृतिर्भवति ।। उदा – अधिबर्हिषी। धिबर्हा23इषी ।। 2 ।।
- सू ।। रात्रिपारे कूर्मिम् ।।
- व्या ।। रात्र्याकूपारे तुविकूर्मिमित्यत्र मिशब्दः प्रकृतिर्भवति ।। उदा – विद्माहित्वातुवि – कूऽ3र्मीम् ।। 3 ।।
- सू ।। आर्षभे माकीम् ।।

- सू ।। गारे भयिन् ननि गोभिः त्वास्मिन् ।। 5 ।।
- उदा – आनाभा3यीन् ।। अश्वोना3नी ।। यथागोभी3रे ।।
  आइन्द्रात्वा3स्मीन् ।। 5 ।।
- सू ।। सौमेधे तये हुवे निधनयोः ।।
- सू ।। कौत्से मेषु मनि ।।

- सू ।। यौधा देव ।।

- सू ।। सफे षि ।।
- सू ।। ऐडयास्ये षसि दसि नोद्गीथादौ देवो द्वीतीयः ।।
- प्रथमे द्वितीयः खण्डः
- अथ तृतीय खण्डः
- सू ।। सिष्ठे षिपृ थिवीं षिम एषि ।।
- सू ।। त्राणि ।।

- सू ।। छन्दसे गहि नान्त्ये ती वे ।। 3 ।।

- सू ।। ष्मते पूर्वं स्थाभिः नधे ।। 4 ।।
- सू ।। शङ्कुनि महि ।। 5 ।।
- सू ।। कौञ्चे अभि ।। 6 ।।
- सू ।। यामे पूर्वी ।।
- व्या ।। वृषामतायां यामे पूर्व्यः कविरित्यत्र विकर्षे विशब्दः प्रकृतिर्भवति ।। उदा – वी॑3यःकविः ।। 7 ।।
- सू ।। दँष्ट्रे पतिंद्वितीयं अभि ।।
- सू ।। क्षुष्टंभे ददे वोवित्सर्वत्र नाम, रूप , मित्र, विलंबेषु ।।

- सू ।। मद्गे मनी ।।

- सू ।। संकोशे चई विह्वः तीब्र मनी धेन वस्ति मदे ।।
- उदा-ई3रय ।। तिप्रवह्वीः ।। ती3म् ब्रह्म ।। णोमनीषां ।।
धे3नवः ।। नस्सवस्ती ।। तामदेना ।। 11 ।।
- सू ।। ष्टंभे स्वब्दी ।।

- सू ।। रवे सति ।।

- सू ।। ष्ठौहे तिक यन्तीः। तृतीयः ।।

- इति प्रथमे तृतीयः खण्डः ।
- अथ चतुर्थः खण्डः
- सू ।। शौक्ते श्रिये ।।

- सू ।। प्रम ताम्रे द्युम्नी भवी भिः ।।

- सू ।। हारिवर्णें सहिं दिथ पत्नीः ।।

- सू ।। रश्व्ये पूर्द्धि असिप्युषी ।।

- सू ।। दँष्ट्रे मे धनि ।।

- सू ।। शवे वे पूर्वं – परि तेदि ।।
- सू ।। साहीये विप्रं ध्रुवे ।।
- सू ।। शोके मुरीं ओजि कर्णे स्विनः यदि ।।
- सू ।। पृश्निनि स्यद्विस्तावे ।।

- सू।। औऽर्णायवे याती माही ।।
- सू।। हत्के वँही नविस्तावे
- सू।। षादीये वाती अग्रे अभि ।।
- सू।। वात्सप्रे वते दवीः एति राणि ।।
- सू।। सैन्धुक्षिते नम्रे। चतुर्थः ।।
- इति प्र. प्रभा. चतुर्थः खण्डः ।।
- अथ पञ्चमः खण्डः
- सू।। प्रिय इन्द्र ज्येष्ठं हरी ब्रवी त्सुरिन्द ।।
- सू।। विते हेरा ।।
- सू।। ध्यश्वे तृभिः येव पेगो ।।
- सू।। वाम्रे मन्दी ।।

- सू।। यानि ध्यश्वे ताण्यग्नेस्त्रिणिधने मन्दी च ।।
- सू।। शैशे यूँषी पतीपूर्वं नापि ।।

- सू ।। वने श्पतिः ।।
- सू ।। कोशे प्रिया त्रीणि तेसर्वस्त्र विवृत्तमकारप्रत्ययं न ममृज्यन्ते हिते, पवते दाशस्पत्ये ।।
- सू ।। पार्थे जभ्रिसर्वत्र ।। 9 ।।
- सू ।। दाशस्पत्ये दाति साखी ।। 10 ।।
- सू ।। सञ्जयेद्यवि ।। 11 ।।
- सू ।। मित्रे कृते चिते स्यवे अपिपूर्वम् ।। 12 ।।
- सू ।। महामित्रे गहि हरि ।।
- सू ।। कौञ्चे चोविसर्वत्र। पञ्चमः ।। 14 ।।
- इति तृ-प्र-पंचमः खण्डः
- अथ षष्ठः खण्डः
- सू ।। रयिँरन्ध्रे
- सू ।। न्वसि रयिँरुणसाम्नि ।। 2 ।।
- सू ।। भिर्वन्तीये ।। 3 ।।

- सू ।। विश्वे असिनिधने, दन्वतेः प्रथमेपरि, त्रेसोसर्वत्र तुवेसःपीद्वितीये कविः तुवेश्वेसः सःपी असितृतीये ।। 4 ।।
- सू ।। दीर्घ इन्द्रः आये नमि ।। 5 ।।
- सू ।। कार्णश्रवसइव।
- सू ।। वितेरेसर्वत्र ।।
- सू ।। कौञ्चे धीयाः
- सू ।। श्नैष्टे सूनि जति सूनि।
- सू ।। गूर्दे ष्ठदी, षष्ठः ।।
- इति तृ-प्र-षष्ठः खण्डः
- अथ सप्तमः खण्डः
- सू ।। तनि पर्ण कूलीयेषुन्वेना।
- सू ।। ण्वतरे षसि पूर्वम् ।।
- सू ।। अभ्यन्ते वणे , सुते , रेके स्वब्दो , कण्वे , दर्षि।
- सू ।। खानसे सहिमभभ्यासे माने।
- सू ।। मौक्षे स्थाभिः।

- सू ।। शर्कर इवोद्गीथे वर्मी ।।
- सू ।।  प्लवे समी आभि यवी ।।
- सू ।। कार्तयशे तीवो, यित्वे योदी ।।
- सू ।। हविषे याहि ।।
- सू ।। वात्से त्राहि ।।
- सू ।। वीङ्के स्ति वीवी ।।
- सू ।। रूपे पवि तवे इन्दो पीयूसर्वत्र सप्तमः ।।
- इति तृ-प्र-सप्तमः खण्डः समाप्तः
- अथ अष्टमः खण्डः
- सू ।। हीन्द्रा तवे यवे ।।
- सू ।। पवि टते ।।
- सू ।। तवे पर्णे ।।
- सू ।। पार्श्वोऽभि ।।
- सू ।। हन्म गतयोः मनी ।।
- सू ।। हदुक्थेभिर्ये ।।

- सू ।। उद्वद्धार्गवे भ्रे ।।
- सू ।। नैपे तृभिः नवे, र्वशे नस्तावेऽष्टमः ।।
- इतिप्रकृतिः ।। इति तृ. प्र. अष्टमः खण्डः
- अथ नवमः खण्डः
- सू ।। एर्षिरे दीद्वितीयम् देपूर्वं श्पतिः स्वरी ।।
- सू ।। धर्मणितादे धर्तासि ।।
- सू ।। विशोवीन्दुमही-नीया-ष्टुतिं ।।
- सू ।। शनेथिम् तींये ।।
- व्या ।। औशने प्रेष्ठंव इत्यत्र – अताऽ23इथीम् , इति थीशब्दः-निमार्तीऽ3येऽ3। अत्र यीशब्दश्च प्रकृतिः ।।
- सू ।। मारुते कविः यसी ।।
- सू ।। भ्रवे स्तोत्रे ।।
- सू। संक्षारे नावी नवमः ।।
- इति तृतीय प्र-नवमः खण्डः ।
- अथ दशमः खण्डः

- सू। भीशवे सुते ।।
- सू। सामराजे षि वीते षिमायासि ।।
- सू। श्रायन्तीये नदी प्रति  प्रथमायां ।।
- सू। मन्तेषोवि नोद्दीथेस्यसि।
- सू। काशीते त्राजित्।
- सू। निहवे रेणसर्वत्र दशमः।
- इति तृ. प्र. दशमः खण्डः ।
- अथ एकादशः खण्डः
- सू। सिते योदे सर्वत्र मदे नरे सर्वत्र।
- सू। विधर्मणिजन्ति।
- सू। त्रैककुभे विवापामी।
- व्या त्रैककुभे यएकइद्विदायां – सुतावाँआवीऽ3वा अत्र वी शब्दः पदाक्षुम्पामीऽ3वा अत्र मीशब्दश्चप्रकृतिः ।
- सू। वँशीयेमीरे शामी।
- सू। जिगे तेजा ।।

- सू। आभीके ददे।
- सू। ज्ञीयेषसिपूर्वं ।।
- सू। वर्तेत्येमधीतम्।
- सू। रोहिते साई स्वर्वि स्यचे विदे , प्सुजित्।
- सू। वाश्वे नाई गोजी जिये अभि।
- सू। धीगवे पारि नाई महे अभि।
- सू। सौहपर्यभ्यासे।
- सू। देव्ये प्रेद्धो दशरात्रः।
- इति तृतीय प्र, एकादश खण्डः ।
- इति दशरात्रपर्वसमाप्तम् ।
- अथ तृतीयः
- संवत्सरम्
- प्रथमः खण्डः
- सू। पार्थे वक्ति ति तिसा जूतिं मते ।।
- सू। बोधीये स्थाभिः ।।

- सू। कावे भिधे।
- सू। साहीये नम्रे ।।
- सू। श्वे महि ।।
- सू। वर्तें भिर्न ।।
- सू। दले त्रे सर्वत्र विवृत्तमकारप्रत्ययं ।।
- इति प्रथमः खण्डः ।
- अथ द्वितीयः खण्डः
- सू। हिन्वे ष्मते ।।
- सू। हविर्दसे ।।
- सू। यानिसिष्ठे तानि पार्थे ।।

- सू। वर्तें हस्त्रे स्तावेणे ।।
- सू। शङ्कुनि महि ।।
- सू। दँष्ट्रे पतिम् ।।

- सू। रूपे तेजा ।।
- सू। अग्नेस्त्रिणि धने भिर्ये ।।
- सू। ये ष्ठौहे ते ष्टंभे ।।
- सू। दासे समी।
- सू। धीगवे वे पूर्वम् ।।
- इति तृ. प्र. द्वितीयः खण्डः
- अथ तृतीयः खण्डः
- सू। सामराजे सइत् वन्ति पवि धिरो मी रे।
- सू। भीशवे सूते।
- सू। उहुवाइसिष्ठे हेम भिस्सं पर्योतिरे मन्ति क्षैतः ।।
- सू। पूर्व और्णायवे कविः शुचिः येचोत्तरे ।।
- सू। लौशे नाति।
- सू। शुद्धीये द्धेन शीर्वान् गहि रयिं मद्धि रयिं।
- सू। ध्र्यश्वेऽभि ।।
- सू। भ्रे ष्टपे ।।

- सू। संपायां वाणीः वारी नानि व्यूनिः चीने रन्धी ।।
- संवत्सरस्य प्रकृतिभावे तृ. प्र. तृतीयः खण्डः ।।
- अथ चतुर्थः खण्डः
- सू। दासे त्रीणि ।।
- सू। रयिष्ठे र्मणि पूर्वम् ।।
- सू। द्यभ्यालौशे राजे ।।
- सू। साध्ये श्रेष्ठ ।।
- सू। मन्ते वारे ।।
- सू। सिष्ठे तुत्रीः त्रक्षे धन्वे स्त्रिया भिस्स चते सुमे णन्ति ।।
- सू। वर्त्ते दिये ।।
- सू। मरुतांधेनौ मनि यदि नषी ।।
- सू। वर्त्ते देव गृविस्सर्वत्र नाजावितज्ञीययोर्जनकावे प्रसोतर योश्च ।।

- सू। उत्सवर्ले देवः ।।
- इति तृ. प्र. चतुर्थः खण्डः ।।
- अथ पञ्चमः खण्डः
- सू।  हाउनित्रे वते तीनां द्वीः कवी ति मनी राणि ।।
- सू। लौशयन्ति यन्ति।
- सू। संपायां वाजी रातिं तानि वते वान्त्स्वे रसे माणि ।।
- सू। सिष्ठे नए स्नेह श्नौष्टे च यानि ।।

- सू। मरुतामिन्द्री ।।
- सू। वर्त्ते देवस्तावे ।।
- सू। पार्थे युंवी धीज रथे सूनि षैंयं ।।

- इति तृ. प्र. पञ्चमः खण्डः ।
- अथ षष्ठः खण्डः

- सू। एडकावे बृहन्नधि ।।
- सू। सिते रयिम् ।।
- सू। ऐडयामे मती सखी ।।
- सू। वर्त्ते स्वब्दी कण्वे ।।
- सू। सँहिते हरिः ।।
- सू। पार्थे णेन ति दवोः कवी ।।
- व्या। शिशुंजज्ञायां पार्थे एतेषां चतुर्णां प्रकृतिभावः ।।

  तोगणेना। ती3राऽ5इभा656न्। वीःकवीनाम् ।
- सू। सफे दिदी ।।
- सू। कावे दभ्रे माहि ।।
- सू। ष्टंभे मनि सर्वत्र न मीढे ।।
- सू। ष्कले निषी श्रिये यवी।
- व्या। सखायआ पौष्कले एतेषां त्रयाणां प्रकृतिभावः ।।

  षीदा234ता। षतश्रिये2345। यावीता234याइ ।।
- इति संवत्सरस्यप्रकृतिभावे षष्ठः खण्डः ।।

- अथ सप्तमः खण्डः
- सू। धसे त्रे भी ।।
- सू। ष्कले वते।
- सू। पार्थे पाहि योजि रूणि सूनि थाविट् ।।
- सू। सँहिते सःपी ।।
- सू। वन्तीय इन्द्रा महे स्यपे ।।
- व्या। परिप्रधन्वायां वारवन्तीये एतेषां प्रकृतिभावः ।।

  न्वाई234न्द्रा ।। यामा234हे ।। स्यपेया234द्धाइ ।।
- सू। कावे नेन्द्रात् निक्तम् ।।
- सू। मीढे ज्योतिः ।।
- सू। ष्कले धि तिं पत्रि त्रित ।।
- सू। हदुक्ते सुते ।।
- इति संवत्सरस्य प्रकृतिभावः सप्तमः खण्डः समाप्तः ।।
- अथ प्रथमः कण्डः
- सू। श्यैते सि ईशा ।।

- सू। यौधा दसी सर्वत्र पूषायाञ्च न स्तोभे प्रत्यये यूथे ।।
- सू। स्वारेपर्णे स्वीनाम् ।।
- सू। सफ इन्द्रा पूष्णे ।।
- सू। बोधीये सःपी ।।
- इति एकाहस्य प्रकृतिभावे प्रथमः खण्डः ।।
- अथ द्वितीयः खण्डः
- सू। पार्श्वे क्वभिः पूर्वं सी ये ।।
- सू। लेये पीत्वास्तावे नए ।।
- सू। यौधा तुवे महे तीया ।।
- सू। द्यौताने मई यवी याभिः ह्माणि दिवेपूर्वं युगे ।।
- सू। मारुत एन्दुं धाँसि महि श्रुधि आश्वी जज्ञे ।।
- सू। बोधीये योनिम् ।
- सू। ज्ञीये सिचं प्रचे वह्नि ।।
- सू। अदर्शि ज्ञीये तानि त्यानि ।।
- सू। मन्ते द्धि ।।

- सू। यौधा महे ।।
- सू। शने दर्शि तीरुश तीं सुभिः ए वर्णैः ।।
- इति एकाहस्य प्रकृतिभावे द्वितीयः खण्डः ।।
- अथ तृतीयः खण्डः
- सू। देव्येग्ने।
- सू। धसे ष्मती बर्हिः रन्ति केशं अग्निम् ।।
- सू। सँहिते ग्निः तूर्णिः अग्निः ।।
- सू। वाश्वे दूरी ।।
- सू। ज्ञीये प्रियं दूरी ।।
- सू। परे ज्ञीये कविं जसी समी यत्ते ।।
- सू। कावे कविं जसी ।।
- सू। वन्तीये भिः ।।
- सू। हारायणे नहि ।।
- सू। कौल्मे स्त्राणि ।।
- इति एकाहस्य प्रकृतिभर्भावे तृतीयः खण्डः

- अथ चतुर्थः खण्डः
- सू। दलेत्के ।।
- सू। ज्ञीये प्रदै त्यानि तानि ।।
- व्या। प्रदैवोदासायां यज्ञायज्ञीये एतेषां प्रकृतिभावः ।। प्रदैऽ2वः ।। नी3कार्ण्वा3ताः ।। नी3आदा3धूः ।।
- सू। वर्त्तें देवस्तावे ।।
- सू। ष्मते दुह्रे सर्वत्र ।।
- सू। सँहिते स्थाभिः ।।
- सू। वाश्वे प्रियाः र्षणीः ।।
- सू। स्त्रुचे न्द्रेह द्रेस्वा ।।
- सू। जिगे हिन्वे ।।
- सू। सिते रयिम् ।।
- इति एकाहस्य प्रकृतिभावे चतुर्थः खण्डः
- सू। षमे ददे ।।
- सू। वन्तीये कविः ।।

- सू। यानि वारे तानि वरीयेषु त्त्वे च ।।
- सू। यानि सिष्ठे तानि पार्थे ।।
- सू। लेये यें तुभ्येत् ज्यते अस्मे ।।
- सू। सँहिते ज्योतिः ज्योतिः ।।
- सू। सफे देवा ।।
- सू। कावे नक्की ज्योतिः ।।
- सू। ण्वतर इन्द्र नोद्गीथे ।।
- इति पञ्चमः खण्डः
- अध षष्ठः खण्डः
- सू। कावे सइत् ।।
- सू। मौक्षे योनि ।।
- सू। विशीये वाजे ।।
- सू। वन्तीये त्वभिरन्त्ये ।।
- सू। रुणसाम्नि सुते ।।
- सू। दासेऽस्येत् ।।

- सू। वन्तीये मोभिः ।।
- सू। वर्त्तें यादी ।।
- इति एकाहस्य प्रकृतिभावे षष्ठः खण्डः ।।
- अथ सप्तमः खण्डः
- सू। षेधे रयिं।
- सू। उत्तरे नित्रेऽभि ।।
- सू। एह्यूवारे न्दुभिः ।।
- सू। तन्ते वारे षि पत्नीः ।।
- सू। श्रुधीहवारे नवी प्युषीम् ।।
- सू। षेधेऽभि ।।
- सू। रुणसाम्नि नृभिः ।।
- सू। यौधा पर्युद्गीथे ।।
- सू। देव्ये रेव ।।
- सू। चित्पर्णे ।।
- सू। वारे रन्ती गहि अभि ।।

- सू। साहीये यस्ते ।।
- सू। काशोते नाए ।।
- इति एकाहस्य प्रकृतिभावः सप्तमः खण्डः समाप्तः
- इति तृतीयः प्रपाठकः ।।
- अथ चतुर्थः प्रपाठकः
- सू। कक्षे मादी नारे ऊतिः ।।
- सू। स्वर्वन्निधने परि पूष्णे महे पेयात् कत्वे श्वेच ।।
- सू। बोधीये शेय घिये ।।
- सू। मार्गीयवे किने ।।
- सू। जये आक्षारान्ते दिवे ।।
- सू। वैखानसे प्रिया ।।
- इति अहीनस्य प्रथमः खण्डः ।।
- अथ द्वितीयः खण्डः
- सू। तनिन्यभि ।।
- सू। पार्श्वे गाहि ।।

- सू। वाचस्साम्नि दीद्वितीयं देव वह्निस्स्तावे स्वरी ।।
- सू। शौक्ते श्रिये ।।
- सू। सिते सने मदे ।।
- इति अहीनस्य प्रकृतिभावे द्वितीयः खण्डः ।।
- अथ तृतीयः खण्डः
- सू। ज्ञीये परि नन्ति ।।
- सू। परे ज्ञीये षी सइत्।
- सू। विशीये प्रियं सन्ति ।।
- सू। सँक्षारे भूमि श्वानि।
- व्या। उच्चातेजायां इडानाँसँक्षारे एतयोः प्रकृतिभावः ।।

  दिविसद्भू3मी3याददाइ। एनाविश्वा3नी3अर्यआ ।।
- सू ।। ष्मते सः पी ।।
- सू। धर्ताज्ञीये त्वीयो मादी।
- सू। देव्ये येद पिया।
- इति अहीनस्य प्रकृतिभावे तृतीयः खण्डः ।।

- अथ चतुर्थः खण्डः
- सू। भीशवे सीद नृभिः ।।
- सू। यानि पार्थे तानि वासिष्ठे ।।
- सू। देव्य एदु ।।
- सू साहीये सन्दे ।।
- सू। बृहद्धारे माहि ।।
- सू। कोशे धीभिः ।।
- सू। ध्र्यश्वे सुते ।।
- सू। धीगवषेधयोः धीया ।।
- इति चतुर्थः खण्डः ।।
- अथ पञ्चमः खण्डः
- सू। त्रेये देवे ।।
- सू। ज्ञीयेऽभि तृतीयायां ।।
- सू। बोधीये देव संवे ।।
- सू। ज्ञीये दीया ।।

- इति अह्निनस्य प्रकृतिभावस्य पञ्चमः खण्डः ।।
- अथ षष्ठः खण्डः
- सू। त्वाष्ट्री यवै ।।
- सू। भीशवे मनी।
- सू। सिष्ठे मथिः गाहि ।।
- सू। वार्शौ प्रिया।
- सू। ज्ञीये चाती सर्वत्र नवाश्वान्धीगवयोः ।।
- सू। हदाग्नेये दूरे ।।
- सू। निधनं च तदंगं स्यात्।
- सू। द्विरेकवृषे।
- सू। त्रिर्वा पदस्तोभेषु।
- सू। इलान्दाद्ये त्रिरुक्तं।
- सू। यथोक्तमितरेषु।
- सू। अन्त्ये वा द्व्यक्षरः।
- सू। महानाम्नोषु द्विपदासु प्रस्तवश्शाक्करप्रथमेषु अध्यासपुरीषपदेषु च यथोपदिष्टं।
- सू। वैच्छन्दसेषु गीत प्रास्ताविकमेव स्यात्।
- सू। यण्वादीनां अप्रस्ताव्या उत्तरः।
- सू। प्रस्ताव्ये वा सन्तनिनः प्रस्ताव्ये वा सन्तनिनः।
- इति दशमस्य एकादश खण्डः दशमः प्रपाठकः समाप्तः ।।
- इत्यजातशत्रुभट्टोपाध्याय विरचिते पुष्पभाष्ये प्रस्तावस्समाप्तः ।।

## 16) अथर्ववेद प्रातिशाख्यम्

### अथ प्रथमप्रपाठके प्रथमपादः

1. अथातो न्यायाध्ययनस्य पार्षदं वर्तयिष्यामः १
2. पदानां संहितां विद्यात् २
3. पदविधिरिति ३
4. द्विरुदात्तं बृहस्पत्यादीनाम् ४
5. प्रत्यञ्चां द्वे उपोत्तमे ५
6. अवर्णमध्य आकार एकादेशो विशेषः ६
7. अवर्णान्ताच्च ७
8. इकारादौ च ८
9. एकारादौ च ९
10. कृदन्ते ह्युपसर्गे १०
11. गतिपूर्वो यदा धातुः ११
12. उपसर्गपूर्व.माख्यातम् १२

13. वचने वचने पूर्वम् १३

14. एकेन द्वे १४

15. द्विनतिकानि वा १५

16. परकारणानि १६

17. परयोगीनि १७

18. अर्धपादादिषूदात्त.माख्यात.मामन्त्रितं पदम् १८

19. व्याघ्रादीन्यनुदात्तानि पादादीना.मपोदितम् १९

20. वाक्यविपर्यये पदलोपेषु पादादिवत् स्वरः २०

21. चयोगा.दनिघातः २१

22. वायोगा.दनिघातः २२

23. आमन्त्रिता.दाद्युदात्तात् २३

24. लुप्तकरणान्यकरणानि वा २४

25. अन्ययोगा.दनिघातः २५

26. नहीत्यनेन युक्तानि २६

27. यदित्येनेन समस्तेन २७

28. वचनात्परेण च सर्वत्र युक्तं वाऽपवादो वा लुप्तं वा तत्पदं येन योगः २८

इति प्रथमः पादः

## अथ प्रथम प्रपाठके द्वितीयः पादः

1. द्विषो बहुवचनम् २९
2. आमन्त्रितं दैवं दैवीरिति सर्वत्र ३०
3. अर्धस्यासमविभागे ३१
4. नपुंसक.न्तस्येदमिति वा जाति.रन्तोदात्तम् ३२
5. द्वितीयोदात्तानि ३३
6. अकारा.त्प्रतिषेधा.त्पर.मुदात्त.मजरादीनामिति ३४
7. अकारान्तो ब्रह्मा ब्रह्मण इत्यस्मिन्नर्थे ३५
8. नपुंसक.माद्युदात्तं ब्रह्म ३६
9. अन्तोदात्तानि ३७
10. काव्येति संज्ञाया.मग्रन्थे ३८

11. दक्षिणा तद्धितान्तम् ३९

12. आशा.माशिषि ४०

13. अर्वाचीन.मिति प्रत्ययान्तरं वा ४१

14. महो देवस्य महतो देवस्येति ४२

15. तवर्णलोपोऽन्तोदात्तत्वञ्च ४३

इति द्वितीयः पादः

## अथ प्रथम प्रपाठके तृतीयः पादः

1. पूर्वपदप्रकृतिस्वर.स्तस्यापवादः ४४
2. अनुदात्तानि ४५
3. आख्यातानि नामसदृशानि ४६
4. कमिति निपातः ४७
5. यथेति निपातः ४८
6. आख्याता.न्युपसर्ग.सदृशानि ४९
7. आमन्त्रितानि स्वरविशिष्टानि ५०

8. पादादीना.मपवादः ५१

9. आदि.स्वरितानि ५२

10. एकाक्षराणि स्वरितानि ५३

11. अनुदात्तानि स्वरितानि ५४

12. द्वि.यकाराण्युत्तमे ५५

13. सर्वलिङ्गवचनेष्वसमासे तन्वोप.स्पृशतेति ५६

14. चत्वारि क्षैप्रश्च पञ्चपद्या.मन्तोदात्ताऽऽदीनि या.दुकारस्य सर्वत्र ५७

इति तृतीयः पादः

आथर्वणे प्रातिशाख्यमूलसूत्रे प्रथमः प्रपाठकः समाप्तः

## द्वितीयः प्रपाठकः

### अथ द्वितीय प्रपाठके द्वितीयः पादः

1. कन्यला १

2. एकारो विभक्त्यादेश.श्छन्दसि २

3. सचति.रन्यत्र ३

4. आक.मिति मकारलोपः ४

5. शकल्येष्यादिषु पररूपम् ५

6. ईकारोकारौ च सप्तम्यर्थे ६

7. पूर्वमित्यस्मि.न्नर्थे सयकारम् ७

8. यकारलोपः प्रत्ययान्तरं वा ८

9. अपवादो वा ९

10. वृषभ इति देवताऽऽख्यानम् १०

11. अस्तेः प्रैषण्या मध्यमस्यैकवचनम् ११

12. इत्येते.रिहीत्यन्यत्र १२

13. परस्तात् पुरस्ता.दन्यानि १३

14. ऐकारान्ता.न्याकाराबाधे १४

15. यान्याकारोपधानि मकारान्तानि तानि स्त्रियैकवचनानि, ह्रस्वोपधानि पुंवचनानि १५

इति प्रथमः पादः

## अथ द्वितीय प्रपाठके द्वितीयः पादः

1. ऊष्मान्तानि स्वरान्ताबाधानि १६
2. लोपसन्देहे १७
3. तृतीयासन्देहे सान्ताच्च १८
4. आकारान्ताच्च प्रत्ययलोपिनः १९
5. आख्यातं गकारान्तादेव २०-१
6. भूतेऽद्यतन्या मध्यमस्यैकवचनम् २०-२
7. एना अनुदात्तम् २१
8. ऊष्मान्तानि सकारे परतः संयोगादौ च २२
9. शकारादौ च २३
10. विश्वा विसर्जनीयान्ताः २४
11. स्वरान्ता.न्यूष्मान्ताबाधानि २५
12. एना अन्तोदात्तम् २६
13. स्वरान्तानि सकारे परत.स्संयोगादौ च २७
14. गोपा मे स्त.मभूतं गोपा इति द्विवचने २८

15. एकवचन- द्विवचन- बहुवचना.न्यूष्मान्तानि २९

16. प्रपा-कृपा-देवगोपेत्यतोऽन्यानि पा इत्यूष्मान्तानि ३०

17. भूरिधारा-शतधारा-मधुधारा इत्येकवचनानि ३१

18. स्त्रीबहुवचना.न्यूष्मान्तानि ३२

19. स्तनय.न्नेति वृष्ट्या- पर्जन्यस्य वृष्ट्या-ऽभीपतो वृष्ट्या इति तृतीयान्तानि ३३

20. ग्राह्यामित्रान्- ग्राह्या गृहा- ग्राह्यैनं विध्यामीति ३४

21. एना पृथिव्या पृथिव्योरसा सं त्वादधामि पृथिवीं पृथिव्या दिवा पृथिव्या इति ३५

22. ता वो नामानि सिन्धव-स्त्वं ता- विश्वा यस्ता- विजानादा घा ता- गच्छान्त्सर्वा ता- यम आर्पिता- इति नपुंसकबहुवचनानि ३६

इति द्वितीयः पादः

## अथ द्वितीय प्रपाठके तृतीयः पादः

1. प्रो दीर्घः ३७

2. भूतेऽङ्गस्यादितः ३८

3. छन्दसि ३९

4. अदन्तस्य ४०

5. एष सव्यञ्जने ४१

6. एकादेशे तु ४२

7. आकारात् ४३

8. कृदन्ते अन्यवर्णान्ताच्च ४४

9. ए॒ना ए॒हा आदयः प्रकृत्या ४५

10. ते प्रगृह्यमध्ये भूतादिभ्यः पति.रुत्तरपद.माद्युदात्तम् ४६

11. द्वि.यकाराणि ४७

12. द्वि.जकारे ४८

13. द्वि.लकारम् ४९

14. द्वि.पकाराणि ५०

15. द्वि.तकाराणि ५१

16. द्वि.नकाराणि ५२

17. एकारान्तानि ५३

18. नानापदानि ५४

19. अभ्यासस्य ५५

20. अकारान्तानि प्रैषण्या मध्यमस्यैकवचनानि ५६

21. नैगमी तकाराबाधे ५७

22. स्वरितान्ता.न्युदात्तसंहिता.न्युदात्तेनैकादेशे ५८

23. प्रतिषेधे उदात्तोऽस्म.दादेशे ५९

24. ङकारावग्रहाणि ६०

25. नकारावग्रहे प्रकृतिभावश्च ६१

26. मकारावग्रहाणि ६२

27. सु इत्येतेनोपसर्गेण ६३

28. स्व.शब्देन ६४

इति तृतीयः पादः

# अथ द्वितीय प्रपाठके चतुर्थः पादः

1. ददातेः ६५
2. इति सार्वधातुके ६६
3. रयिं दा इति भूते ६७
4. समानाधिकरणे समानार्थे पद.व्यवायेऽप्यस्मै शतादीनि चान्तोदात्तानि ६८
5. लुप्तशेषेणावग्रहः प्रकृत्यादेशश्च ६९
6. दन्त-पाद-हृदयोदक-नासिका-सह-समान-रात्रि-जाया-दारु-मासः पुंसि शे कृच्छ्र-माव-द्गम्भीर.मिति ७०
7. नलोपे च पादस्य ७१
8. दीर्घायुत्वायादिषु च ७२
9. पातयते.र्दीर्घोपधस्य ७३
10. पादयति रन्यत्र ७४
11. पद्यति.रन्यत्र ७५
12. स.यकाराणि ७६

13. तमित्यस्मि.न्नर्थे ७७

14. अञ्चत्यन्तं प्रथमान्त.मुत्तमे परतो द्विधा, उत्तमा उत्तमेष्विति ७८

15. तकारान्ते ७९

16. नकारान्तानि मकाराबाधे ८०

17. मकारान्तानि ८१

18. नकारान्तानि ८२

इति चतुर्थः पादः

आथर्वणे प्रातिशाख्यमूलसूत्रे द्वितीयः प्रपाठकः समाप्तः

## अथ तृतीयः प्रपाठकः

अथ तृतीय प्रपाठके प्रथमः पादः

1. रेफप्रकृति.घोषवत्स्वरेषु १
2. अव्ययानि च २
3. आमन्त्रित- ओकार- इतावनार्षे प्रकृत्या ३
4. अपिपूर्वो दधातिः ४

5. आम्रेडित.समासस्य ५

6. अनाम्रेडिता.न्याम्रेडितसदृशानि ६

7. षत्व-णत्वोपाचार-दीर्घत्व-समापत्तेः ७

8. कृणोत्विति ८

9. मतौ ह्रस्वः ९

10. संहितायां विसर्जनीयस्य १०

11. उत्तम.मुदात्तम् ११

12. उत्तरपदे ह्रस्वः १२

13. आद्यक्षर वृद्धिः १३

14. यकारादौ बहुलं दीर्घः १४

15. गविष्टौ गवेषण इति न लोपो वकारस्य १५

16. शपथेय्यं सहशेय्याये.त्येकारा.त्परो यकारः १६

17. पूर्वपरौ ह्रस्वौ १७

18. अकारेकारा.वागमौ पूर्वस्य १८

19. विधेमे.त्यन्यत्र १९

20. अकारान्तान्विति २०

21. एकारान्ताच्च २१

22. ओकारान्ताच्च २२

इति प्रथमः पादः

## अथ तृतीये प्रपाठके द्वितीयः पादः

1. उत्पूर्वो हृषिः २३

2. एकवचना.न्यन्यत्र २४

3. तकारान्तानि २५

4. ञ्यन्ताद्वा सुर्न लुप्यते कृदन्ताद्वा २६

5. एकारादी.न्येते.र्ह्यस्तन्याम् २७

6. आख्यातेन विग्रह उपसर्गेण च २८

7. अव्ययेन च २९

8. यथाशास्त्रं क्रम स्संयोगे ३०

9. रेफमध्ये तकारः ३१

10. रेफमध्ये सकारः ३२

11. ख्यातौ ख्य्ययौ शुश्रुषीति बाधौ शुचेः ३३

12. यकारान्त स्संयोगः ३४

13. हकारान्त स्संयोगः ३५

14. तमौ ३६

15. गमौ ३७

16. कनौ ३८

17. पनौ ३९

18. ककारादि स्संयोगः ४०

19. रेफादि स्संयोगः ४१

20. कृत्ती.र्दूर्शानी.तीकारः ४२

21. यो अश्व्येनेति यकारः ४३

22. विकारेऽवयवे वा ४४

23. हैरण्यै.रिति ण्यौ ४५

24. ताम्र-धूम्रा इति मरौ ४६

25. नद्यो वेशन्त्या इवे.त्ययकारम् ४७

26. त्वष्ट्रेव रूपमिति तृतीयान्तम् ४८

27. अपरुध्म इति धमौ ४९

28. कल्मलिः कुल्मल.मिति लमौ ५०

29. सत्ते द्वितकारम् ५१

30. आर्द्रहस्ता समङ्क्ष इति रेफ.ङकारादि स्संयोगः ५२

31. तिर्यमिति तिरौ ५३

32. ऋभ्वाणं मातरिभ्वरीति भवौ ५४

33. अन्तवच्चा समन्ते- प्र यद्धन्दिष्ठो- जिह्वां नि तृन्धीति नकारादिः ५५

इति द्वितीयः पादः

अथ तृतीय प्रपाठके तृतीयः पादः

1. नकारस्य विसर्जनीयः ५६
2. नकारस्य रेफः ५७
3. ह्रस्वोपधस्य तवर्गे प्रकृत्या ५८

4. दीर्घोपध स्सप्तधा तु विसर्जनीयस्य ५९

5. यथापरु समासे सकारः कपयोः ६०

6. पञ्चम्याः परौ ६१

7. विसर्जनीयस्य सकारः ६२

8. षत्वस्यापवादः ६३

9. अनुपसर्गात् षकारः ६४

10. पूर्वपदात् ६५

11. उपसर्गस्योत्तरपदे दीर्घः ६६

12. अनिङ्ग्येषूत्तरपदे दीर्घ इङ्ग्येषु च ६७

13. अभ्यासस्य दीर्घ.श्छन्दसि ६८

14. अश्वादीनां मतौ ६९

15. सर्वलिङ्ग.वचनेषु च ७०

16. प्रथमस्य ७१

17. द्वितीयस्य ७२

18. सात्रासाहादीना.मुत्तरपदाद्यस्य ७३

19. नामेत्यस्य ह्रस्वान्त.मसमासे ७४

20. निपाताव्ययाना.मुत्तरपदाद्यस्य ७५

इति तृतीयः पादः

अथ तृतीय प्रपाठके चतुर्थः पादः

1. अञ्चतौ लुप्तप्रत्ययेनेञ्चते ७६
2. देवताद्वन्द्वे दीर्घाद् भिर्भ्याँभ्यस्सु ७७
3. समस्त.मेकाक्षरं वृद्ध्या ७८
4. एकाक्षर.मवर्णान्तम् ७९
5. स्वर.लिङ्ग-स्वर.विभक्ति-वचनविशेषेषु ८०
6. वर्ण-लिङ्ग-स्वर-विभक्ति-वाक्य.व्यत्यय-श्छन्दसि ८१
7. वर्णलोपाऽऽगम-ह्रस्व-दीर्घ-प्लुतात्मनेभाषा-परस्मैभाषा-

अपियन्त्यपियन्ति ८२

इति चतुर्थः पादः

इति तृतीयः प्रपाठकश्च

आथर्वणे संहितालक्षणग्रन्थे प्रातिशाख्यमूलसूत्रं समाप्तम्

इत्यथर्ववेद प्रातिशाख्यं समाप्तम्

## 17) अथर्ववेदीय माण्डूकी शिक्षा

(1) प्रथम खण्डः

- तिस्रो वृत्तीरनुक्रान्ता द्रुतमध्यविलम्बिताः।
- यथाऽनुपूर्वं प्रथमा द्रुता वृत्तिः प्रशस्यते।। 1।।
- मध्यमैकान्तरा वृत्ति.-र्द्व्यन्तरा हि विलम्बिता।
- नैनां बुधः प्रयुञ्जीत- यदीच्छे.द्वर्णसम्पदम्।। 2।।
- अभ्यासार्थे द्रुता वृत्ति-रुपलब्धौ विलम्बिता।
- मध्यमा तु प्रयोगार्थे न तद्वचन.मन्यथा।। 3।।
- ऐन्द्री तु मध्यमा वृत्तिः- प्राजापत्या विलम्बिता।
- अग्निमारुतयो.र्वृत्ति-स्सर्वशास्त्रेषु निन्दिता।। 4।।
- दोषाः प्रकाशास्तु विलम्बितायां - वर्णा द्रुतायाञ्च न सूपलक्ष्याः।
- तस्मा.द्रुता.ञ्चैव विलम्बिताञ्च त्यक्त्वा नरो मध्यमया प्रयुञ्ज्यात्।।

5।।

- सर्वा एव तु निर्दोषा- वृत्तय.स्समुदाहृताः।
- स्वधीतस्य सुवक्रस्य- शिक्षुकस्य विशेषतः।। 6।।
- सप्तस्वरास्तु गीयन्ते सामभि.स्सामगै.र्बुधैः।
- चत्वार एव छन्दोभ्य-स्त्रय.स्तत्र विवर्जिताः।। 7।।
- षड्ज.ऋषभ.गान्धारौ- मध्यमꣳ पञ्चम.स्तथा।
- धैवतश्च निषादश्च- स्वरा.स्सप्तेह सामसु।। 8।।
- षड्जे वदति मयूरो गावो रम्बन्ति चर्षभे।
- अजा वदति गान्धारे क्रौञ्चनादस्तु मध्यमे।। 9।।
- पुष्पसाधारणे काले कोकिलꣳ पञ्चमे स्वरे।
- अश्वस्तु धैवते प्राꣳह- कुञ्जरस्तु निषादवान्।। 10।।
- कण्ठा.दुत्तिष्ठते षड्ज- ऋषभ.श्शिरस.स्तथा।
- नासिकायास्तु गान्धार- उरसो मध्यम.स्तथा।। 11।।
- उर.श्शिरोभ्यां कण्ठाच्च- पञ्चम.स्स्वर उच्यते।
- धैवतश्च ललाटा.द्वै निषाद.स्सर्वरूपवान्।। 12।।
- पद्मपत्रप्रभ.ष्षड्ज ऋषभ.श्शुकपिञ्जरः।

- कनकाभस्तु गान्धारो मध्यमꣳ कुन्दसप्रभः।। 13।।
- पञ्चमस्तु भवे.त्कृष्णꣳ पीतवर्णस्तु धैवतः।
- निषाद.स्सर्ववर्णाभ- इत्येते स्वरवर्णकाः।। 14।। ।। 1।।
- (2) द्वितीयꣳ खण्डः
- बाह्याऽङ्गुष्ठन्तु क्रुष्टं स्या-दङ्गुष्ठे मध्यम.स्स्वरः।
- प्रादेशिन्यान्तु गान्धारो- मध्यमायान्तु पञ्चमः।। 1।।
- अनामिकायां षड्जस्तु कनिष्ठाया.न्तु धैवतः।
- तस्याऽधस्ता.त्तु योऽन्य.स्स्या.-न्निषाद इति तँ विदुः।। 2।।
- प्रथमा.वन्तिमौ चैव- वर्तन्ते छन्दसि स्वराः।
- त्रयो मध्या निवर्तन्ते मण्डूकस्य मतँ यथा।। 3।।
- द्वितीयं स्वरितं प्राहु-ष्षष्ठꣳ प्रचित उच्यते।
- उच्चँ विद्या.न्निषाद.न्तु- नीचं षड्ज.मुदाहृतम्।। 4।।
- उदात्तश्चाऽनुदात्तश्च स्वरितꣳ प्रचित.स्तथा।
- चतुर्विध.स्स्वरो दृष्ट-स्स्वरचिन्ता.विशारदैः।। 5।।
- स्वरे ज्ञात्वा यथास्थानं हस्तस्य स्यन्दनं स्मृतम्।

- निष्कृष्य हस्तं विन्यस्तं पाणौ दृष्टि.न्निवेशयेत्।। 6।।
- किञ्चि.द्यो नभस.स्स्वांसा-द्वाहौ दृष्टि.न्निपातयेत्।
- प्रसार्य चाऽङ्गुली.स्सर्वा- रोपये.त्करमण्डलम्।। 7।।
- न चाङ्गुलीभि.रङ्गुष्ठ-मुपेया.द्दोषवि.त्ततः।
- ऊर्ध्व.मायस्त.माकुञ्च-मङ्गुष्ठं स्थापये.द्बुधः।। 8।।
- नाऽधश्शिरा नाऽवनता- नाङ्गुल्यꣳ प्रतरा.स्स्मृताः।। 9।।
- उत्तानं सोन्नतं किञ्चित्- सुव्यक्ताङ्गुलिरञ्चितम्।।
- स्वरविद्धं करं कुर्यात्- प्रदेशोद्देश.गामिनम्।
- अङ्गुष्ठस्योत्तरे पर्वे यवस्योपरि य.द्भवेत् ।। 10।।
- प्रादेशस्य तु तद्देश-स्त.न्मात्र.ञ्चालये.त्करम्।
- चलु.र्नावा स्फुटी दण्डी स्वस्तिको मुष्टि.रेव च।। 11।।
- एते वै हस्तदोषा.स्स्युꣳ- परशुछेदस्तु सप्तमः।
- कूर्मोऽङ्गानीव संहृत्य- चेष्टा दृष्टिपरं मनः।। 12।।
- न कम्पये.च्छिरꣳ पादौ मुखदोषांश्च वर्जयेत्।
- नासिकाया.स्तु पूर्वेण- हस्तं सञ्चालये.द्बुधः।। 13।।

- सूक्ष्मान् वर्णा.न्प्रयुञ्जानो- दक्षिणं श्रवणं प्रति।
- श्रुतिं वाचोऽनुगा.ङ्कृत्वा- वाच.ङ्कृत्वा मनोऽनुगाम्।।
- दृष्टिं हस्तानुगा.ङ्कृत्वा- ततः पदवि.दारभेत्।। 14।। ।। 2।।
- (3) तृतीयखण्डः
- यथा वाणी तथा पाणी- रिक्तन्तु परिवर्जयेत्।
- यत्रैव तु स्थिता वाणी पाणि.स्तत्रैव धार्यते।। 1।।
- स्वर.श्चैव तु हस्तश्च द्वा.वेतौ युगप.द्भवेत्।
- हस्ता.द्भ्रष्टः स्वरा.द्भ्रष्टो- न वेदफल.मश्नुते।। 2।।
- हस्तहीनन्तु योऽधीते- स्वरवर्ण.विवर्जितम्।
- ऋग्यजु.स्साम.निर्दग्धो- वियोनि.मनुगच्छति।। 3।।
- ऋग्यजु.स्सामगाऽऽदीनि हस्तहीनानि यः पठेत्।
- अनृचो ब्राह्मण.स्ताव-द्याव.त्स्वार.न्न विन्दति।। 4।।
- हस्तेनाऽधीयमानो य-.स्स्वरवर्णा.न्प्रयोजयेत्।
- ऋग्यजु.स्सामभिः पूतो- ब्रह्मलोकं स गच्छति।। 5।।
- स्वरा.त्स्वरं सङ्क्रमते स्वरसन्धि.मनुल्बणम्।

- अविच्छिन्नं सम.ङ्कुर्या-त्सूक्ष्म.ञ्छायाऽऽतपोपमम्।। 6।।
- अक्षरज्ञो विरामज्ञꣳ- प्रत्यारम्भी तथैव च।
- स्वरमात्रा.विभागज्ञ-स्स विप्रो मान.मर्हति ।। 7।।
- (4) चतुर्थखण्डः
- आम्र.पालाश.बिल्वाना-मपामार्ग.शिरीषयोः।
- खदिरस्य करञ्जस्य कदम्बस्य तथैव च।। 1।।
- अर्कस्य करवीरस्य कुटजस्य विशेषतः।
- वाग्यतꣳ प्रात.रुत्थाय भक्षये.द्दन्तधावनम्।। 2।।
- तेनाऽऽस्यकरणं सूक्ष्मं माधुर्य.ञ्चोपजायते।
- न चाऽस्य वदतो दोषा-न्कश्चि.दप्युपलक्षयेत्।। 3।।
- नाऽत्युच्चै.र्नाऽति वा नीचै.-र्निषण्ण.स्सदने सुखम्।
- प्रब्रूया.न्नाऽतितीक्ष्णेन कण्ठेन मृदुनाऽऽदिना।। 4।।
- प्रात.र्वदे.न्नित्य.मुरस्स्थितेन स्वरेण शार्दूलरुतोपमेन।
- मध्यन्दिने कण्ठगतेन चैव चक्राऽऽह्व.सङ्कूजित.सन्निभेन।। 5।।
- तारन्तु विद्या.त्सवन.न्तृतीयं शिरोगतं तच्च सदा प्रयोज्यम्।

- मयूरहंसादि मृदुस्वराणां तुल्येन नादेन शिरस्स्थितेन।। 6।।
- यथा व्याघ्री हरेत्पुत्रान् दंष्ट्राभि.र्न च पीडयेत्।
- भीता पतनभेदाभ्यां तद्वद्वर्णा.न्प्रयोजयेत्।। 7।।
- एवं वर्णाः प्रयोक्तव्या न मुक्ता न च पीडिताः।
- सम्यग्वर्णप्रयोगेन ब्रह्मलोके महीयते।। 8।।
- शनैरध्वसु वक्रेण न परं योजनाद् व्रजेत्।
- न हि पार्ष्णिहता वाणी प्रयोगा.न्वक्तु.मर्हति।। 9।।
- मान्ते मुष्ट्याकृतिं कुर्या-त्तकारान्ते निवेशयेत्। (विश्लेषयेत्)
- नखस्य दक्षिणे पार्श्वे नकारान्तं निवेदयेत्।। 10।।
- कटान्तयोस्तु कर्त्तव्य-मङ्गुल्यग्रप्रकुञ्चनम्।
- ङणनान्ते तथैव स्या-त्पान्ते त्वङ्गुलिपीडनम्।। 11।।
- ऊर्ध्वक्षेपाऽपि या मात्रा अधःक्षेपाऽपि या भवेत्।
- एकैका.मुत्सृजे.द्धीरꣳ प्रचिते तूभय.न्तथा।। 12।।
- ह्रस्वानुस्वारकरणे त्वङ्गुष्ठाग्रप्रकुञ्चनम्।
- दीर्घे तु सूरयꣳ प्राहुꣳ- प्रादेशिन्याः प्रसारणम्।। 13।।

- पदान्तर.न्न कुर्वीत संहितायां प्रयोगवित्।
- मांसे मांसँ विजानीया-त्पांसे पांसं विनिर्दिशेत्।। 14।।
- यथा नौ.स्स्रोतसां मध्ये सम.ङ्गच्छति सँयुता।
- तैलधारेव वा वक्रं तद्व.द्वर्णा.न्प्रयोजयेत्।। 15।। 4।।
- (5) पञ्चमखण्डः
- उदात्ताच्च न कर्तव्य-मुदात्तं स्वरित.न्तथा।
- नीचा.न्नीचतर.न्ना-ऽस्त्युच्चा.दुच्च.न्न विद्यते।। 1।।
- उच्चा.दुच्चतर.न्नाऽस्ति नीचा.न्नीचतर.ङ्कुतः।
- स्वरिता.त्स्वरित.न्नाऽस्ति कम्पिता.च्चैव कम्पितम्।। 2।।
- यदुदात्त.मुदात्तं त-द्य.त्स्वरित.न्तत्पदे भवति नीचम्।
- यन्नीच.न्नीच.मेव त.-द्यत्प्रचयस्थ.न्तदपि नीचम्।। 3।।
- स्वरिताना. मनह्राद.-मुदात्ताना.मताडनम्।
- अनुदात्तमनाधिष्ठं शषसाना.मरोमशम्।। 4।।
- षड्वा तु स्वरिताऽऽदेशे उदात्तश्च चतुर्विधः।
- द्विविध.श्चाऽनुदात्त.श्चैत.च्छास्त्रेण चोदितम्।। 5।।

- स्वरितप्रभवं प्रचिता.-त्स्वरितँ विद्यत उदात्तँ वा।
- अनुदात्त.मेव तद्विद्या-द्यद्दतञ्च तद्विद्धि यत्प्रचितम्।। 6।।
- स्वरिता.त्पराणि यानि स्यु.-रनुदात्तानि कानिचित्।
- सर्वाणि प्रचयँ यान्ति- ह्युपोदात्त.न्न विद्यते।। 7।।
- स्वरितावधृत उदात्ते पर.स्त्रिपूर्वो विक्रमोच्युते। (विक्रमः उच्यते)
- स्वरितावधृत उदात्ते पाद.स्स्या.त्स हि विक्रमः।। 8।।
- ननु धारये.द्धृत.मुपस्पर्श-मुपोदात्त.न्निपातयेत्।
- एकाक्षरे पतन.न्न च धृत.-मुच्चारये.त्स्वरे वाऽपि।। 9।।
- न्यास.मेवाऽऽदितः कुर्या-न्नीयते सुबहुष्वपि।
- शेष.माद्यव.दुक्त्वा तु- तत्पदेषु समेषु च।। 10।।
- स्वर उच्च.स्स्वरो नीच-स्स्वर.स्स्वरित उच्यते।
- व्यञ्जना.न्यनुवर्तन्ते यत्राऽसौ तिष्ठति स्वरः।। 11।। ।। 5।।
- (6) षष्ठः खण्डः
- स्वर उच्च.स्स्वरो नीच-स्स्वर.स्स्वरित एव तु।
- स्वरप्रदान.न्त्रैस्वर्य्य.-माहु.रक्षरचिन्तकाः।। 1।।

- द्वयो.स्तु स्वरयो.स्सन्धा-वेकीभावो यदा भवेत्।
- उदात्तोऽथाऽनुदात्तस्य वश.ङ्गच्छति सन्धिषु।। 2।।
- दुर्बलस्य यथा राष्ट्रं हरते बलवा.न्नृपः।
- स्वरो व्यञ्जन.मासाद्य हरते नाऽत्र संशयः।। 3।।
- आख्यातानां प्रयोगेषु पूर्वस्वर.मुपस्थितम्।। 4।।
- षोडशाक्षरमर्यादँ यद्योगे स्वर.मुद्धरेत्।
- नीच.न्तु स्वरपूर्व.न्तु नीचाऽवग्रहमेव च।
- हन्तव्य.न्त.द्विजानीया-दुच्चाऽवग्रहवर्जितम्।। 5।।
- नाऽतिहन्या.न्न निर्हन्या-न्न प्रगाये.न्न कम्पयेत्।
- एतौ द्वौ युगप.त्साध्या-वेतच्छास्त्रेण चोदितम्।। 6।।
- अष्टौ स्थानानि वर्णाना.मुरꣳ कण्ठ.श्शिर.स्तथा।
- जिह्वामूलञ्च दन्ताश्च- नासिकोष्ठौ च तालु च।। 7।।
- वर्णाना.न्तु प्रयोगेषु करणं स्या.च्चतुर्विधम्।
- सँवृतँ विवृत.ञ्चैव स्पृष्ट.मस्पृष्ट.मेव च।। 8।।
- स्पर्शाना.ङ्करणं स्पृष्ट-मन्तस्थाना.मतोऽन्यथा।

- यमानां सँवृतँ प्राऽऽहु-र्विवृतञ्च स्वरोष्मणाम्।। 9।। 6।।
- (7)
- सप्तस्वरा.न्प्रवक्ष्यामि तेषा.ञ्चैव बलाबलम्।
- लक्षणानि च सर्वेषां युक्त.स्तानि निबोध मे।। 1।।
- अभिनिहितः प्राक्छ्लिष्टो जात्यः क्षैप्रश्च पादवृत्तश्च।
- तैरोव्यञ्जन.ष्षष्ठ.-स्तिरोविरामश्च सप्तमः।। 2।।
- ए ओ आभ्या.मुदात्ताभ्या-मकारो रेफितश्च यः।
- अकारँ यत्र लुम्पन्ति- तमभिनिहितँ विदुः।। 3।।
- इकारँ यत्र पश्येयु-रिकारेणैव सँयुतम्।
- उदात्तोऽप्यनुदात्तस्य प्राक्छ्लिष्टोऽभीन्धता.मपि।। 4।।
- सयकारं समँ वाऽप्यक्षरं स्वरितं भवेत्।
- न चोदात्तं पुरस्ता.त्स्या-ज्जात्य.स्स्व.र्दूत्य एव तु।। 5।।
- इ उ वर्णौ यदोदात्ता-वापद्येते यवौ क्वचित्।
- अनुदात्तप्रत्यये स्या.द्विद्धि क्षैप्रस्य लक्षणम्।। 6।।
- स्वरिते स्वरितँ यत्र विवृत्या यत्र संहिताः।

- तं पादवृत्त.ञ्ज्ञानीया-त्ते त्वस्मि.न्यव.मादधुः।। 7।।
- उदात्तपूर्वं सार्धे तु द्वितीये अक्षरे तु यः।
- तैरोव्यञ्जन इत्येष- सार.स्स्या.द्दधि मध्विति।। 8।।
- अवग्रहा.त्परँ यत्र स्वरितं स्या.दनन्तरम्।
- तिरोविराम.ञ्ज्ञानीया-त्प्रजापते.र्निदर्शनम्।। 9।।
- द्वयो.रुदात्तयो.र्मध्ये नीचो य.स्स्या.दवग्रहः।
- ताथाभाव्यो भवे.त्कम्प-स्तनूनपा.न्निदर्शनम्।। 10।। ।। 7।।
- (8) अष्टमꣳ खण्डः
- ताथाभाव्यस्तु तालव्यो न कम्प.स्स्वरसञ्ज्ञकः।
- स तालव्यो भवे.त्कम्प एजातीति?? निदर्शनम्।। 1।।
- सर्वतीक्ष्णोऽभिनिहित-स्ततꣳ प्राक्छ्लिष्ट उच्यते।
- ततो मृदुतरौ स्वारौ- जात्यः क्षैप्रश्च तावुभौ।। 2।।
- ततो मृदुतर.स्स्वार-स्तैरोव्यञ्जन उच्यते।
- पादवृत्तो मृदुतर इति स्वारबलाबलम्।। 3।।
- उपन्यासस्तु कर्त्तव्यꣳ- कण्ठे निक्षेपसञ्ज्ञकः।

- उपन्यासा.त्परं हन्याद्- भूमौ शङ्कुपदँ यथा।। 4।।
- प्राक्छ्लिष्ट जात्यक्षैप्राणाँ य.श्चाऽभिनिहितश्च यः।
- उदात्तोपस्थिते तेषा-मेकदेशं प्रकम्पयेत्।। 5।।
- हलन्ता.दुत्तरो यस्तु- पदा.दवग्रहेषु च।
- मिश्र.स्तस्याऽऽद्य इत्येषो- योऽन्य.स्स य इति स्मृतः।। 6।।
- पादादौ च पदादौ च सँयोगावग्रहेषु च।
- य.श्शब्द इति विज्ञेयो योऽन्य.स्स य इति स्मृतः।। 7।।
- पुनरन्तश्च सवितश्च प्रातर्या रेफिता च संहिता यत्र।
- रेफवन्ति पदा.न्यत्र रेफे तद्रेफितं पदम्।। 8।।
- अन्त.श्शब्दस्तु य꣡ कश्चि-दाद्युदात्तो भवे.द्यदि।
- न तत्र रेफ.मिच्छन्ति संहितायां पदेषु च।। 9।।
- अनुस्वारं हि दोष.स्तु हकाराऽऽदिषु वर्जितः।
- अंहोमुचो वातरंहा दृँहश्चेति निदर्शनम्।। 10।।
- अनुस्वारास्तु कर्तव्या ह्रस्वदीर्घप्लुता.स्त्रयः।
- अयँ राजा पशो.र्माँसं क्षत्रियाणा.न्धनूँषि च।। 11।।

- (9) नवमः खण्डः
- विवृत्तयस्तु विज्ञेया-श्चतस्त्र.स्त्वनुपूर्वशः।
- नामभिस्तु पृथग्ज्ञेया-स्तासाँ वक्ष्यामि लक्षणम्।। 1।।
- पिपीलिका पाकवती तथा वत्सानुसारिणी।
- अनुसृतवत्सा चैव चतस्त्रो हि विवृत्तयः।। 2।।
- वत्सानुसृता ह्रस्वा जघने वत्सानुसारिणी चाऽग्रे।
- पाकवती चोभयतः पिपीलिकमध्याऽप्युभयदीर्घा।। 3।।
- पूर्वं ह्रस्वं पर.न्दीर्घ-मक्षरँ यत्र दृश्यते।
- सा वत्सानुसृता ज्ञेया व्यत्यासे.त्यनुसारिणी।। 4।।
- उभाभ्यामेव ह्रस्वाभ्यां यवमध्याँ विनिर्द्दिशेत्।
- ताभ्यामेव तु दीर्घाभ्याँ विज्ञेया सा पिपीलिका।। 5।।
- अभ्रमध्ये यथा विद्यु-द्दृश्यते मणिसूत्रवत्।
- एषच्छेदो विवृत्तीनाँ यथा बालेषु कर्त्तरि।। 6।।
- आपद्यते मकारो यरवोष्मसु प्रत्ययेष्वनुस्वारम्।
- न भवति लकारे परसवर्णं स्पर्शेषु चोत्तमाऽऽपत्तिः।। 7।।

- ऊष्मस्थौ यत्र दृश्येते स्वरवर्णौ स्वरोदयौ।
- ऋल्वर्णौ तथा ज्ञेयौ स्वरभक्तीति संस्थितौ।। 8।।
- तां ह्रस्वां प्रतिजानीया-द्यथा मात्रा भवे.द्यदि।
- सम्य.गेनाँ विजानीया-द्वौ दोषौ परिवर्जयेत्।। 9।।
- सम्य.गेनां यदा पश्ये-च्छतवल्शेति निदर्शनम्।।
- अकारश्चाऽप्युकारश्च विच्छिन्नँ विवृत.न्तथा।। 10।।
- करिणी कर्विणी चैव हरिणी हारितेति च।
- तथा हंसपदा नाम पञ्च ता.स्स्वरभक्तयः।। 11।।
- करिणीं रहयो.र्विद्या-त्कर्विणीँ लहकारयोः।
- हरिणीं रषयो.र्विद्या-द्धारिताँ लशकारयोः।। 12।।
- या तु हंसपदा नाम सा तु रेफ.षकारयोः।
- या तु रेफशकारी स्या-त्काकिनी.न्ताँ विनिर्दिशेत्।। 13।। 9।।
- (10) दशमः खण्डः
- ऋकारप्रत्ययो रेफ-स्सँयुक्त.श्शषसै.स्सह।
- आद्य.स्तत्र क्रमो ज्ञेयो न परो बोधितो बुधैः।। 1।।

- रेफोष्मणां सँयोगे स्वरभक्ति.रक्रम.श्चैव।
- तत्रोदाहरणानि प्रदर्शनँ वर्ष.बर्हिश्च।। 2।।
- रेफं स्वरोदये विद्या-द्दकार व्यञ्जनोदये।
- स्वरव्यञ्जनयो.र्मध्ये रेफ.मेव विनिर्दिशेत्।। 3।।
- ओभावश्च विवृत्तिश्च शषसा रेफ एव च।
- जिह्वामूल.मुपध्मा च गति.रष्टविधोष्मणः।। 4।।
- यद्योभाव प्रसन्धान-मुकाराऽऽदि परं पदम्।
- स्वरान्त.न्तादृशँ विद्या-द्यदन्य.द्व्यक्त.मूष्मणः।। 5।।
- षत्व.णत्व.मुपाचारो दीर्घीभाव.स्तथैव च।
- यस्मिन् पदे निपद्यन्ते तत्समासाद्यलक्षणम्।। 6।।
- नकारान्ते पदे पूर्वे स्वरे च परसंस्थिते।
- रक्तँ वर्णँ विजानीया-न्न ग्रसे त्पूर्व.मक्षरम्।। 7।।
- रक्तँ वर्णँ यदा पश्ये-द्विवृत्त्या सह संस्थितम्।
- व्यञ्जनान्तँ विजानीया-द्रोमाँ इति निदर्शनम्।। 8।।
- यथा सौराष्ट्रिका नारी अराँ इत्याभिभाषते।

- एवं रङ्गाः॰ प्रयोक्तव्या ङकारपरिवर्जिताः।। 9।।
- नासा.दुत्पद्यते रङ्गः॰ कांस्येन समनिस्वनः।
- मृदुश्चैव द्विमात्रं स्याद्- वृष्टिमाँ इति निदर्शनम्।। 10।।
- सँयुक्तस्य तु यत्पूर्व-न्तद्ध्रस्वं लघुं विजानीयात्।
- तत्सँयोगोत्तरं विद्याद् गुर्वन्यत्र नियोगतः।। 11।। 10।।
- (11) एकादशः खण्डः
- मात्रैकँ लघु विज्ञेय-न्तत्सँयोगपर.ङ्गुरुम्।
- सपरँ व्यञ्जनान्तञ्च दीर्घस्तु प्लुत एव च।। 1।।
- स्पर्शाना.मुत्तमै.स्स्पर्शै-स्सँयोगा.श्चे.दनुक्रमात्।
- आनुपूर्व्या यमांस्तत्र जानीया.च्चतुर.स्तथा।। 2।।
- रुक्मेति प्रथमँ विद्या-न्नृचक्षे.त्यपरँ विदुः।
- तृतीयं पद्म.मित्याहु-श्शार्ङ्ग्ध्म.मिति चोत्तमम्।। 3।।
- वर्गान्ता श ष स प्रथमा-स्सँयुक्ता यदा स्यु.रभिधेयाः।
- लघुशास्त्र.दोषतत्त्वज्ञै-र्यमदोषा.स्तथा हि परिहार्याः।। 4।।
- वर्गान्ता यत्र दृश्यन्ते शषसै.स्सह सँयुताः।

- यमा.स्तत्र निवर्तन्ते श्मशाना.दिव बान्धवाः।। 5।।
- सँयोगस्य परं स्वार्य- परं सँयोगनायकम्।
- सँयुक्तस्य तु वर्णस्य न स्वरं पूर्व.मिष्यते।। 6।।
- स्वरणं पतन.ञ्चैव वोत्थानेषु समेषु च।
- एव.मेव पदे दृष्ट-न्न पूर्वाङ्गे क्वचि.द्भवेत्।। 7।।
- दारुसङ्घातव.च्छ्लिष्टं सँयोगवशवर्त्तिनाम्।
- वर्णानां युगसम्पन्न-मेकँ वर्ण.मिवोत्सृजेत्।। 8।।
- वर्णा विंशतिरेक.श्च येषा.न्द्विर्भाव इष्यते क्वचित्।
- प्रथमा मध्यमा चाऽन्त्या- यवला.श्श.ष.सा.स्तथा।। 9।।
- न रेफे वा हकारे वा द्विर्भावो जायते क्वचित्।
- न च वर्गद्वितीयेषु न चतुर्थे कदाचन।। 10।।
- चतुर्थन्तु तृतीयेन द्वितीयं प्रथमेन तु।
- आद्य.मन्त्य.न्तृतीयञ्च स्वाक्षरेणैव पीडयेत्।। 11।। 11।।
- (12) द्वादशः खण्डः
- द्रप्सोऽप्सराया.मप्शब्दे विश्वप्स्न्या च विरप्शिने।

- काश्यपोऽभिनिधानाना-मागमं प्रतिषेधते।। 1।।
- यत्र चोभयत.स्स्पर्शा.-स्सँयुक्ता.श्शाषसै.स्सह।
- आद्य.स्तत्र क्रमो ज्ञेयो- न परो बोधितो बुधैः।। 2।।
- ऋवर्णरेफसँयुक्तं स्वरितं स्या.दनन्तरम्।
- ऋकाररेफसँयुक्तँ- यत्पूर्वं व्यञ्जनोदये।। 3।।
- ऋकारे लघु त.द्विद्या-द्रेफे तद्गुरुसञ्ज्ञकम्।
- न क्रमते स्वरयमयो.र्न च वर्गसवर्णयो.र्न च विरामे।। 4।।
- न च रेफाऽनुस्वारे विसर्जनीये तु सर्वत्र।
- ब्रुवन् भ्रुवौ कर्णललाटनासिका, न कम्पये.दोष्ठचलु.र्न निर्भुजेत्।
- मुख.न्न विक्लिश्य न नम्रवक्रजो, न चाऽपि सन्दष्टहनु.र्न बाह्यवाक्।। 5।।
- न रूक्षवा.क्स्या.न्न च उत्स्वरं वदे-न्न चाऽनिमेषो न च गर्व.माचरेत्।
- गजव्यवेषी बलवा.नतन्द्रितो, व्यपेतरोष श्रमशोकहर्षभीः।। 6।।
- न चानुकूजे.त्पद.मादितो ब्रुवन् न नासिका नित्य.मनुष्ठितं वदेत्।

- न चाऽपदान्ते श्रमपीडित.श्श्वसे-न्न
  चोच्छ्वसे.दुक्तपदोऽप्यभीक्ष्णशः।। 7।।
- नाऽतिनिष्पीडये.द्वर्णा-न्न चाऽव्यक्ता.नुदाहरेत्।
- समा.न्श्लक्ष्णा.नसन्दिग्धा-न्वर्णा.नुच्चारये.द्बुधः।। 8।।
- प्रथमाऽनूष्मसम्पन्ना-न्द्वितीयानिव दर्शयेत्।
- तथैता.न्प्रतिजानीया-द्यथा मत्स्यान् क्षुरोऽप्सरान्।। 9।।
- तथैव पञ्चमा.नाहु-रागमो यत्र दृश्यते।
- द्वितीयानेव ता.न्कुर्या-द्यस्मि.न्सीतेति निदर्शनम्।। 10।। ।।
  12।।
- (13) त्रयोदशः खण्डः
- अक्ष्णो.र्निमेषमात्रेण यो वर्ण.स्समुदीर्यते।
- स एक मात्रो द्वि.स्तावा-न्दीर्घ.स्तु प्लुत उच्यते।। 1।।
- अवग्रहेऽर्द्धमात्रं स्या-त्कालो मात्रा पदान्तरे।
- अर्द्धर्चे द्वे तथा पादे त्रिमात्रं स्या.दृगन्तरम्।। 2।।
- चाषस्तु वदते मात्रं द्विमात्रं वायसोऽब्रवीत्।

- शिखी त्रिमात्रं विज्ञेय एष मात्रापरिग्रहः।। 3।।
- क्वचि.त्पादविभागेन क्वचि.दर्द्धे क्वचि.त्पदे।
- क्वचिदर्थे क्वचिच्छब्दे विरामꣳ पञ्चधा स्मृतः।। 4।।
- छन्दस्येते प्रयुज्यन्ते क्रमेण क्षेपसञ्ज्ञकाः।
- सविरामं प्रयोक्तव्या येन वृत्ति.र्न विद्यते।। 5।।
- सञ्ज्ञाने भूयसो दोषा-न्प्रवक्ष्यामि निबोधत।
- स्वरस्य ?सन्दर्शन-मनुस्वार यमा.वपि।। 6।।
- विच्छिन्नत्वं विक्षणत्वं सुशीमं सोमसत्सरु।
- ईकारेणाऽवगृह्णीया-त्प्रतिशुक्रेति पञ्चमम्।। 7।।
- विश्वाना.मूष्मसन्देहे अर्द्धर्चे स्या.न्नपुंसकम्।
- पुरस्ता.दुपरिष्टा.द्वा सर्वे विश्वा निरूष्मकाः।। 8।।
- वसुधामानि रूपाणि विश्वानि भुवनानि च।
- येषां पश्चा.दुपरिष्टा.द्वा सर्वे विश्वा निरूष्मकाः।। 9।।
- नकारान्ते पदे पूर्वे स्वरे च परसंस्थिते।
- ह्रस्वोदात्तꣳ प्रयोक्तव्य-श्शाषसैꣳ प्रत्ययेषु च।। 10।। 13।।

- (14) चतुर्दशः खण्डः
- द्वौ तकारौ थकारौ च यमो नेति च पञ्चमः।
- श्रत्स्ना इति च सँयोग-माहु.रक्षरचिन्तकाः।। 1।।
- ककारान्ते पदे पूर्वे ङकारे प्रत्यये परे।
- ङकारस्याऽऽगम.ङ्कुर्या-द्वाङ्म इति निदर्शनम्।। 2।।
- टकारान्ते पदे पूर्वे णकारे प्रत्यये परे।
- णकारस्याऽऽगम.ङ्कुर्याद्- बण्महाँ इति निदर्शनम्।। 3।।
- तकारान्ते पदे पूर्वे नकारे प्रत्यये परे।
- नकारस्याऽऽगम.ङ्कुर्या-द्यन्न इति निदर्शनम्।। 4।।
- पकारान्ते पदे पूर्वे मकारे प्रत्यये परे।
- मकारस्याऽऽगमं कुर्यात्- त्रिष्टुम्म इति निदर्शनम्।। 5।।
- अन्त्यं कटतप.न्द्दष्ट्वा परं ङणनम.न्तथा।
- आत्मपञ्चमसँयोग-माहु.रक्षरचिन्तकाः।। 6।।
- आम्नाया.त्प्रपदो? प्रपदो भवति निर्भयः।
- निर्भयो मधुरो भवति माधुर्या.त्सिद्धि.माप्नुयात्।। 7।।

- आम्नायकरणं श्रेष्ठँ वर्णाना.ञ्चाऽवधारणम्।
- अप्रमत्तश्च स्वार्येत एत.दाचार्यशासनम्।। 8।।
- आम्नायशास्त्रसम्पन्नं शास्त्र.माम्नायसारवित्।
- पय.श्शङ्खे यथा तद्व.च्छिर.श्छन्दसि सारथिः।। 9।।
- दन्त्योष्ठकरणं सूक्ष्मं माधुर्य.न्तरुणँ वचः।
- स्वभावं शिक्षुकस्याऽऽहु-रन्य.द्गुरुकृतं भवेत्।। 10।। 14।।
- (15) पञ्चदशꣳ खण्डः
- तरुणं शिक्षुकं प्राऽऽहु-र्वृद्ध.मक्षरचिन्तकम्।
- नैयायकं परिश्रुतं बहुधा यन्ति याचकम्।। 1।।
- न करालो न लम्बोष्ठो न च सर्वानुनासिकः।
- गद्गदो बद्धजिह्वश्च प्रयोगा.न्वक्तु.मर्हति।। 2।।
- प्रकृति.र्यस्य कल्याणी दन्तोष्ठौ यस्य शोभनौ।
- अधीतँ येन तत्त्वेन स शिक्षां पारयिष्यति।। 3।।
- आगमै.रधिकाꣳ केचि-द्विज्ञानै.रपरेऽधिकाः।
- प्रयोगसौष्ठवा.दन्ये नाऽह.मस्मीति विस्मयः।। 4।।

- सुतीर्था.दागतं व्यक्तं स्वाम्नातं सुव्यवस्थितम्।
- सुस्वरेण सुवक्रेण प्रयुक्तं ब्रह्म राजति।। 5।।
- कुतीर्था.दागतं दग्ध.-मपवर्णैश्च भक्षितम्।
- न तस्य परिमोक्षोऽस्ति पापाहे.रिव किल्बिषात्।। 6।।
- येषा.न्तीर्थागता विद्या नित्य.मभ्यासनिर्जिता।
- ते भवन्ति दुराधर्षा-स्ससिंहा इव पर्वताः।। 7।।
- न भोजनविलम्बी स्या-न्न च स्या.त्स्त्रीनिबन्धनः।
- स दूरमपि विद्यार्थी व्रजे.द्गरुडहंसवत्।। 8।।
- हयानामिव जात्याना-मर्द्धरात्राऽर्द्धशायिनाम्।
- न विशेषार्थिना.न्निद्रा चिर.न्नेत्रेषु तिष्ठति।। 9।।
- अहेरिव जना.द्भीत-स्स्त्रीभ्यश्च नरका.दिव।
- मिष्टाच्च विषव.द्भीत.स्स विद्यां पारयिष्यति।। 10।। 15।।
- (16) षोडशः खण्डः
- सहस्त्रगुणिता विद्या शतशः परिवर्त्तिता।
- आगमिष्यति जिह्वाऽग्रे स्थला.न्निम्न.मिवोदकम्।। 1।।

- शतेन गुणिता भवति सहस्रेण तु धारिता।
- शताना.न्तु सहस्रेण प्रेत्य चेह च तिष्ठति।। 2।।
- उपांशु त्वरित.ञ्चैव योऽधीतेऽवत्रस.न्निव।
- अपि रूपसहस्रैस्तु संशयेष्वेव वर्तते।। 3।।
- येषाञ्च न ग्रहणशक्ति.रतिप्रचण्डा, लुब्धाश्च ये न शतशः परिवर्तयन्ति।
- निद्राञ्च ये प्रियसखीमिव न त्यजन्ति, ते तादृशा गुरुकुलेषु जराँ व्रजन्ति।। 4।।
- पञ्च विद्या.न्न गृह्णन्ति लुब्धा.श्चण्डा.श्च ये नराः।
- अलसा.श्चाऽनुरोगाश्च येषा.ञ्च विकृतं मनः।। 5।।
- ऊर्ध्वं सहस्रा.दाम्नातं सतत.ञ्चान्ववेक्षणम्।
- आप्तै.स्तु सह सम्पाठ-स्त्रिविधा धारणा स्मृता।। 6।।
- यथा खन.न्खनित्रेण भूतले वारि विन्दति।
- एव.ङ्गुरुगताँ विद्यां शुश्रूषु.रधिगच्छति।। 7।।
- योजनानां सहस्र.न्तु शनै.र्याति पिपीलिका।

- अगच्छ.न्वैनतेयोऽपि पद.मेक.न्न गच्छति।। 8।।
- पदेनैकेन मेधावी पदानाँ विन्दते शतम्।
- मूर्खꣳ पदसहस्रेण पद.मेक.न्न विन्दति।। 9।।
- पदं पाद.न्तथाऽर्द्धर्चं सञ्चेतव्यं प्रयत्नतः। (सञ्चितव्यम्)
- अप्राज्ञꣳ प्राज्ञताँ याति सरिद्भि.स्सागरो यथा।। 10।।
- अनिर्वेदी श्रियो मूलं लोहबद्धञ्च कुण्डलम्।।
- अहोरात्राणि दीर्घाणि क.स्समुद्र.न्न शोषयेत्।। 11।।
- जल.मभ्यासयोगेन शैलाना.ङ्कुरुते क्षयम्।
- कर्कशानां मृदुस्पर्श-ङ्कि.मभ्यासो न साधयेत्।। 12।।
- आचार्या.स्सम.मिच्छन्ति पदच्छेद.न्तु पण्डिताः।
- स्त्रियो मधुर.मिच्छन्ति विक्रुष्ट.मितरे जनाः।। 13।।
- आचार्योपाꣳसना.द्योगा-त्तपसा प्राज्ञसेवनात्।
- विगृह्यकथना.त्काला-त्षड्भि.र्विद्या प्रपद्यते।। 14।।
- आलस्या.न्मूर्खसँयोगा-द्भया.द्रोगनिपीडनात्।
- अत्यशक्याच्च मानाच्च षड्भि.र्विद्या विनश्यति।। 15।।

- मण्डूकेन कृतां शिक्षाँ विदुषां बुद्धिदीपिनीम्।
- यो हि तत्त्वेन जानाति ब्रह्मलोकं स गच्छतीति।। 16।। 16।।

इति शिक्षा समाप्ता मण्डूककृता।।

## 18) शौनकीया चतुराध्यायिका

- चतुर्णां पदजातानां नामाख्यातोपसर्गनिपातानां सन्ध्यपद्यौ गुणौ प्रातिज्ञम् १
- एवमिहेति च विभाषाप्राप्तं सामान्ये २
- पदान्त्यः पद्यः ३
- अन्लृकारः स्वरः पद्यः ४
- लकारविसर्जनीयौ च ५
- स्पर्शाः प्रथमोत्तमाः ६
- न चवर्गः ७
- प्रथमान्तानि तृतीयान्तानीति शौनकस्य प्रतिज्ञानं न वृत्तिः ८
- अधिस्पर्शं च ९

- द्वितीयचतुर्थाः सोष्माणः १०
- उत्तमा अनुनासिकाः ११
- श्वासोऽघोषेष्वनुप्रदानः १२
- नादो घोषवत्स्वरेषु १३
- समानयमेऽक्षरमुच्चैरुदात्तम् १४
- नीचैरनुदात्तम् १५
- आक्षिप्तं स्वरितम् १६
- स्वरितस्यादितो मात्रार्धमुदात्तम् १७
- मुखे विशेषाः करणस्य १८
- कण्ठ्यानामधरकण्ठः १९
- जिह्वामूलीयानां हनुमूलम् २०
- तालव्यानां मध्यजिह्वम् २१
- मूर्धन्यानां जिह्वाग्रं प्रतिवेष्टितम् २२
- षकारस्य द्रोणिका २३
- दन्त्यानां जिह्वाग्रं प्रस्तीर्णम् २४

- ओष्ठ्यानामधरौष्ठम् २५
- नासिक्यानां नासिका २६
- अनुनासिकानां मुखनासिकम् २७
- रेफस्य दन्तमूलानि २८
- स्पृष्टं स्पर्शानां करणम् २९
- ईषत्स्पृष्टमन्तःस्थानाम् ३०
- ऊष्मणां विवृतं च ३१
- स्वराणां च ३२
- एके स्पृष्टम् ३३
- एकारौकारयोर्विवृततमम् ३४
- ततोऽप्याकारस्य ३५
- संवृतोऽकारः ३६
- संस्पृष्टरेफमृवर्णम् ३७
- दीर्घप्लुतयोः पूर्वा मात्रा ३८
- सलकारम् लृवर्णम् ३९

- संध्यक्षराणि संस्पृष्टवर्णान्येकवर्णवद्वृत्तिः ४०
- नैकारौकारयोः स्थानविधौ ४१
- विसर्जनीयोऽभिनिष्टानः ४२
- व्यञ्जनविधारणमभिनिधानः पीडितः सन्नतरो हीनश्वासनादः ४३
- स्पर्शस्य स्पर्शेऽभिनिधानः ४४
- पदान्तावग्रहयोश्च ४५
- लकारस्योष्मसु ४६
- ङणनानां हकारे ४७
- आस्थापितं च ४८
- अतोऽन्यत्संयुक्तम् ४९
- पूर्वरूपस्य मात्रार्धं समानकरणं परम् ५०
- ह्रस्वं लघुसंयोगे ५१
- गुर्वन्यत् ५२
- अनुनासिकं च ५३
- पदान्ते च ५४

- परस्य स्वरस्य व्यञ्जनानि ५५
- संयोगादि पूर्वस्य ५६
- पद्यं च ५७
- रेफहकारक्रमजं च ५८
- एकमात्रो ह्रस्वः ५९
- व्यञ्जनानि च ६०
- द्विमात्रो दीर्घः ६१
- त्रिमात्रः प्लुतः ६२
- षड्वुरसोरुकारोऽन्त्यस्य दशदाशयोरादेशश्च मूर्धन्यः ६३
- कृपे रेफस्य लकारः ६४
- न कृपादीनाम् ६५
- लकारस्य रेफः पादमङ्गुलिमित्येवमादीनाम् ६६
- नकारमकारयोर्लोपे पूर्वस्यानुनासिकः ६७
- यरोष्मापत्तौ च ६८
- अनुनासिकस्य च पूर्वेणैकादेशे ६९

- पुरुष आ बभूवां इत्यवसाने ७०
- ऋवर्णस्य रेफात्परं यत् ७१
- उकारस्येतावपृक्तस्य ७२
- दीर्घः प्रगृह्यश्च ७३
- ईकारोकारौ च सप्तम्यर्थे ७४
- द्विवचनान्तौ ७५
- एकारश्च ७६
- अस्मे युष्मे त्वे मे इति चोदात्ताः ७७
- अमी बहुवचनम् ७८
- निपातोऽपृक्तोऽनाकारः ७९
- ओकारान्तश्च ८०
- आमन्त्रितं चेतावनार्षे ८१
- आर्त्वी इवादिष्विवादितिः परः ८२
- अनुनासिकोऽन्तःपदे ह्रस्वः ८३
- दीर्घो नपुंसकबहुवचने ८४

- पांसुमांसादीनाम् ८५
- हनिगम्योः सनि ८६
- शान्मान्दानाम् ८७
- वस्वन्तस्य पञ्चपद्याम् ८८
- ईयसश्च ८९
- विदेश्च ९०
- पुंसश्च ९१
- वर्णादन्त्यात्पूर्व उपधा ९२
- स्वरोऽक्षरम् ९३
- सोष्मणि पूर्वस्यानुष्मा ९४
- आन्तर्येण वृत्तिः ९५
- खण्वखा३
- इ खैमखा३
- इ इत्याकारादिकारोऽनुदात्तः ९६
- अवशा आबभूवाँ इतीतावेकारोऽप्लुतः ९७

- व्यञ्जनान्यव्यवेतानि स्वरैः संयोगः ९८
- समानपदेऽनुत्तमात्स्पर्शादुत्तमे यमैर्यथासंख्यम् ९९
- हकारान्नासिक्येन १००
- रेफादूष्मणि स्वरपरे स्वरभक्तिरकारस्यार्धं चतुर्थमित्येके अन्यस्मिन्व्यञ्जने चतुर्थमष्टमं वा १०१ - १०२
- तदेव स्फोटनः १०३
- पूर्वस्वरं संयोगाविघातश्च १०४
- खण्वखा३
- इ खैमखा३
- इ मध्ये तदुरीदं भूया३
- इदा३
- मित्यूर्ध्वो नु सृष्टा३
- स्तिर्यङ् नु सृष्टा३
- ः! सर्वा दिशः पुरुष आ बभूवाँ३
- पराञ्चमोदनं प्राशी३

- ः! प्रत्यञ्चा३
- मिति
- त्वमोदनं प्राशी३
- स्त्वामोदुना३
- इति वशेया३
- मशे३
- इति यत्तदासी३
- दिदं नु
- ता३
- दितीति प्लुतानि १०५
- चतुराध्यायिकायां च प्रथमोऽध्याया समाप्ता

- संहितायाम् १
- पदान्तानामनुत्तमानां तृतीया घोषवत्स्वरेषु २
- पदान्ते चाघोषाः ३

- अघोषेषु च ४
- उत्तमा उत्तमेषु ५
- द्वितीयाः शषसेषु ६
- तेभ्यः पूर्वचतुर्थौ हकारस्य ७
- टकारात्सकारे तकारेण ८
- ङणनेभ्यः कटतैः शषसेषु ९
- नकारस्य शकारे ञकारः १०
- चवर्गीये घोषवति ११
- टवर्गीये णकारः १२
- तकारस्य शकारलकारयोः परसस्थानः १३
- चटवर्गेयोश्च १४
- ताभ्यां समानपदे तवर्गीयस्य पूर्वसस्थानः १५
- षकारान्नानापदेऽपि १६
- तवर्गीयाच्छकारः शकारस्य १७
- लोप उदः स्थास्तम्भोः सकारस्य १८

- रेफस्य रेफे १९
- स्पर्शादुत्तमादनुत्तमस्यानुत्तमे २०
- स्वराद्यवयोः पदान्तयोः २१
- नाकाराद्वकारस्य २२
- गविष्टौ गवेषण इति च २३
- लेशवृत्तिरधिस्पर्शं शाकटायनस्य २४
- पुमो मकारस्य स्पर्शेऽघोषेऽनूष्मपरे विसर्जनीयोऽपुंश्चादिषु २५
- नकारस्य चटतवर्गेष्वघोषेष्वनूष्मपरेषु विसर्जनीयः २६
- आकारोपधस्योपबद्धादीनां स्वरे २७
- वृक्षां वनानीति वकारे २८
- नाम्युपधस्य रेफ ऋतूँरुत्सृजते वशीत्येवमादीनाम् २९
- न समैरयन्तादीनाम् ३०
- मकारस्य स्पर्शे परसस्थानः ३१
- अन्तःस्थोष्मसु लोपः ३२
- ऊष्मस्वेवान्तःपदे ३३

- नकारस्य च ३४
- उभयोर्लकारे लकारोऽनुनासिकः ३५
- न समो राजतौ ३६
- संध्ये च वकारे ३७
- वर्गविपर्यये स्फोटनः पूर्वेण चेद्विरामः ३८
- न टवर्गस्य चवर्गे कालविप्रकर्षस्त्वत्र भवति तमाहुः कर्षण इति ३९
- विसर्जनीयस्य परसस्थानोऽघोषे ४०
- स्वरे यकारः ४१
- नाम्युपधस्य रेफः ४२
- घोषवति च ४३
- आवः करकश्च वि वरबिभरसर्वनाम्नः ४४
- द्वार्वारिति ४५
- अजहातेरहाः ४६
- एकामन्त्रिते रौद्विवचनान्तस्य ४७
- अन्तः पुनः प्रातः सनुतः स्वरव्ययानाम् ४८

- स्वर्षाश्च ४९
- अहर्नपुंसकम् ५०
- न विभक्तिनूपरात्रिरथंतरेषु ५१
- ऊधोऽम्नोभुवसाम् ५२
- अकारोपधस्योकारोऽकारे ५३
- घोषवति च ५४
- आकारोपधस्य लोपः ५५
- शेपहर्षणीं वन्दनेव वृक्षम् ५६
- एषः स व्यञ्जने ५७
- न सस्पदीष्ट ५८
- दीर्घायुत्वायादिषु ५९
- दुर उकारो दाशे परस्य मूर्धन्यः ६०
- श्रुति तकारः ६१
- समासे सकारः कपयोरनन्तःसद्यःश्रेयश्छन्दसाम् ६२
- निर्दुराविर्हविरसमासेऽपि ६३

- त्रिः ६४
- कुरुकरंकरत्कृणोतुकृतिकृधिष्वकर्णयोः ६५
- ततस्परौ ब्रह्मपरे ६६
- पञ्चम्याश्चाङ्गे भ्यःपर्यादिवर्जम् ६७
- दिवस्पृथिव्यां सचतिवर्जम् ६८
- पृष्ठे च ६९
- यः पतौ गवामस्याःपरवर्जम् ७०
- षष्ठ्याश्चाशच्याः ७१
- इडायास्पदे ७२
- पितुः पितरि ७३
- द्यौश्च ७४
- आयुः प्रथमे ७५
- प्रे मुषिजीवपरे ७६
- परिधिः पतातौ ७७
- निवतस्पृणतौ ७८

- मनस्पापे ७९
- रायस्पोषदिषु च ८०
- अत्र नाम्युपधस्य षकारः ८१
- सहेः साङ्भूतस्य ८२
- तद्धिते तकारादौ ८३
- युष्मदादेशे तैस्त्वमादिवर्जम् ८४
- तत्तानग्रादिषु च ८५
- स्तृतस्वस्वपिषु ८६
- नामिकरेफात्प्रत्ययसकारस्य ८७
- स्त्रैषूयम् ८८
- नलोपेऽपि ८९
- उपसर्गाद्धातोः ९०
- अभ्यासाच्च ९१
- स्थासहिसिचीनामकारव्यवायेऽपि ९२
- अभ्यासव्यवायेऽपि स्थः ९३

- परमेभ्योऽनापाके ९४
- अपसव्याभ्यां च ९५
- अग्रेः स्तोमसोमयोः ९६
- सुजः ९७
- त्र्यादिभ्यः ९८
- ऋकारात्तात्सदेः ९९
- बर्हिपथ्यप्सुदिविपृथिवीति च १००
- हिदिविभ्यामस्तेः १०१
- न सृपिसृजिस्पृशिस्फूर्जिस्वरतिस्मरतीनाम् १०२
- गोसन्यादीनां च १०३
- अध्यभिभ्यां स्कन्देः १०४
- परेः स्तृणातेः १०५
- रेफपरस्य च १०६
- अभि स्याम पृतन्यतः १०७
- इति द्वितीयोऽध्यायः समाप्तः

- सहावाडन्ते दीर्घः १
- अष्ट पद्योगपक्षपर्णदंष्ट्रचक्रेषु २
- व्यधावप्रत्यये ३
- उञ इदमूष्वादिषु ४
- ओषधेरपञ्चपद्याम् ५
- जीवन्तीमोषधीम् ६
- साढः ७
- बहुलं रात्रेः ८
- विश्वस्य नरवसुमित्रेषु ९
- शुनः पदे १०
- उपसर्गस्य नामिनो दस्ति ११
- वर्तादिषु १२
- अकारस्याभ्यासस्य बहुलम् १३
- जीहीडाहम् १४

- साह्याम १५
- विद्मादीनां शरादिषु १६
- बहुलं मतौ १७
- इछायां च यकारादौ १८
- तृतीयान्तस्य १९
- रलोपे २०
- नारकादीनां प्रथमस्य २१
- दीदायादीनां द्वितीयस्य २२
- सात्रासाहादीनामुत्तरपदाद्यस्य २३
- ऋत वृधवरीवानेषु २४
- अध त्यंधीःपरवर्जम् २५
- पदान्ते व्यञ्जनं द्विः २६
- ङणना ह्रस्वोपधाः स्वरे २७
- संयोगादि स्वरात् २८
- न विसर्जनीयः २९

- सस्थाने च ३०
- रेफहकारौ परं ताभ्याम् ३१
- शषसाः स्वरे ३२
- प्रगृह्याश्च प्रकृत्या ३३
- एना एहा आदयश्च ३४
- यवलोपे ३५
- केवल उकारः स्वरपुर्वः ३६
- नमौ संध्यौ ३७
- आकारः केवलः प्रथमं पूर्वेण ३८
- स्वरे नामिनोऽन्तःस्था ३९
- संध्यक्षराणामयवायावः ४०
- पूर्वपरयोरेकः ४१
- समानाक्षरस्य सवर्णे दीर्घः ४२
- सीमन्ते ह्रस्वः ४३
- अवर्णस्येवर्ण एकारः ४४

- उवर्ण ओकारः ४५
- अरमृवर्णौ ४६
- उपर्षन्त्यादिषु च ४७
- उपसर्गस्य धात्वादावारम् ४८
- भूतकरणस्य च ४९
- एकारैकारयोरैकारः ५०
- ओकारौकारयोरौकारः ५१
- शकल्येष्यादिषु परत्रपम् ५२
- एकारौकारान्तात्पूर्वः पदादेरकारस्य ५३
- क्वचित्प्रकृत्या ५४
- एकारौकारौ पदान्तौ परतोऽकारं सोऽभिनिहितः ५५
- इकारयोः प्रश्लिष्टः ५६
- अनुदात्तपूर्वात्संयोगाद्यवान्तात्स्वरितं परमपूर्वं वा ज्ञात्यः ५७
- अन्तःस्थापत्तावुदात्तस्यानुदात्ते क्षैप्रः ५८
- अन्तःपदेऽपि पञ्चपद्याम् ५९

- ऊकारस्य सर्वत्र ६०
- ओण्योश्च ६१
- व्यञ्जनव्यवेतस्तैरोव्यञ्जनः ६२
- विवृत्तौ पादवृत्तः ६३
- अवग्रहे सविधः ६४
- अभिनिहितप्राश्लिष्टजात्यक्षैप्राणामुदात्तस्वरितोदयानामणुमात्रा निघाता वि-
- कम्पितं तत्कवयो वदन्ति ६५
- एकादेश उदात्तेनोदात्तः ६६
- उदात्तादनुदात्तं स्वर्यते ६७
- व्यासेऽपि समानपदे ६८
- अवग्रहे च ६९
- नोदात्तस्वरितपरम् ७०
- स्वरितादनुदात्त उदात्तश्रुतिः ७१
- व्यासेऽपि समानपदे ७२

- अवग्रहे च ७३
- स्वरितोदात्तेऽनन्तरमनुदात्तम् ७४
- ऋवर्णरेफषकारेभ्यः समानपदे नो णः ७५
- पूर्वपदाद्द्रुघणादीनाम् ७६
- अकारान्तादह्नः ७७
- विभक्त्यागमप्रातिपदिकान्तस्य ७८
- उपसर्गाद्द्चातोर्नानापदेऽपि ७९
- प्रपराभ्यामेनः ८०
- पुनर्णयाम सि ८१
- नवतेश्च ८२
- पूर्याणः ८३
- दुर्णान्मः ८४
- अवग्रहादृकारात् ८५
- न मिनाति ८६
- भानोश्च ८७

- परेर्हिनोतेः ८८
- पदान्तस्पर्शयुक्तस्य ८९
- नशेः षान्तस्य ९०
- स्वरलोपे हन्तेः ९१
- क्षुभ्नादीनाम् ९२
- व्यवाये शसलैः ९३
- चटतवर्गैश्च ९४
- पदेनावर्जिते च ९५
- तुविष्टमः ९६
- इति तृतीयोऽध्यायः

- उपसर्ग आख्यातेनोदात्तेन समस्यते १
- अनेकोऽनुदात्तेनापि २
- अनर्थकर्मप्रवचनीयान्ययुक्तौर्विग्रहोऽभिवितन्वादिषु ३
- पूर्वेणाभिविपश्याम्यादिषु ४

- योनावध्यैरयन्तादिषु च ५
- आशीर्बभूवेति प्लुतस्वरस्य सिद्धत्वात् ६
- पूर्वेणावग्रहः ७
- यातुमावत् ८
- समासे च ९
- उपजाते परेण १०
- सुप्राव्या च ११
- अनिङ्गेन पूर्वेण १२
- तद्धिते धा १३
- त्राकारान्ते १४
- थानेकाक्षरेण १५
- तरतमयोः १६
- मतौ १७
- वकारादौ च १८
- शसि वीप्सायाम् १९

- तातिलि २०
- उभयाद् द्युभि २१
- मात्रे च २२
- विश्वाद्दानीमि २३
- मयेऽसकारात् २४
- के व्यञ्जनात् २५
- त्वे चान्तोदात्ते २६
- कृत्वे समासो वा नानापदद्र्शनात् २७
- जातीयादिषु च २८
- यादाविछायां स्वरात्कर्मनामतन्मानिप्रेप्सुषु २९
- वस्ववस्वप्नसुम्नसाधुभिर्या ३०
- भिर्भ्याभ्यः सु ३१
- सौ च ३२
- न दीर्घात् ३३
- विनामे च ३४

- वसौ ह्रस्वात् ३५
- तेनैवोपसृष्टेऽपि ३६
- उपसर्गेणावकारे ३७
- समन्तः पूरणे ३८
- अनतौ विसंभ्यां प्राणाख्या चेत् ३९
- काम्याम्रेडितयोः ४०
- इवे च ४१
- मिथोवगृह्ययोर्मध्यमेन ४२
- समासयोश्च ४३
- द्विरुक्ते चावगृह्ये ४४
- वसुधातरः सहस्रसातमेति वसुसहस्राभ्याम् ४५
- सुभिषक्तमस्तमे ४६
- न तकारसकाराभ्यां मत्वर्थे ४७
- यत्तदेतेभ्यो वतौ ४८
- देवताद्वन्द्वे च ४९

- यस्य चोत्तरपदे दीर्घो व्यञ्जनादौ ५०
- षोडशी संदेहात् ५१
- अहोरात्रे ५२
- अञ्चतिजरत्पर्वसु ५३
- समुद्रादिषु च ५४
- वृद्धेनैकाक्षरेण स्वरान्तेन ५५
- अवर्णान्तेनैकाक्षरेण प्रतिषिद्धेनाप्रयावादिवर्जम् ५६
- प्राणति प्राणन्ति ५७
- संपरिभ्यां सकारादौ करोतौ ५८
- सर्वस्मिन्नेवागमसकारादौ तुविष्टमवर्जम् ५९
- विश्पतिर्विश्पत्नी ६०
- ददातौ च तकारादौ ६१
- उदो हन्तिहरतिस्थास्तम्भिषु ६२
- दधातौ च हकारादौ ६३
- जास्पत्यम् ६४

- मनुष्यत् ६५
- त्रेधा ६६
- संज्ञायाम् ६७
- व्यधौ ६८
- दृशौ सर्वनाम्नैकारान्तेन ६९
- सहावाडन्ते ७०
- अव्ययानाम् ७१
- आशा दिशि ७१
- प्रकृतिदर्शनं समापत्तिः ७३
- षत्वणत्वोपाचारदीर्घटुत्वलोपान्पदानां चर्चापरिहारयोः समापत्तिः ७४
- पूर्वपदनिमित्तानां च ७५
- इंग्यानाम् ७६
- अन्येनापि पर्वणा ७७
- क्रमे परेण विगृह्यात् ७८

- दीर्घस्य विरामे ७९
- चतूरात्रोऽवग्रह एव ८०
- पदान्तविकृतानाम् ८१
- अभ्यासविनतानां च ८२
- स्त्रैषूयं नार्षदेन दुष्टरं त्रैष्टुभं त्रैहायणाज्जास्पत्यम् ८३
- अभ्यासस्य परोक्षायाम् ८४
- वावृधानप्रभृतीनां च ८५
- कृपिरुपिरिषीणामनह्वानाम् ८६
- जीहीडाहम् ८७
- साह्याम ८८
- दीदायत् ८९
- नारकादीनाम् ९०
- च्यावयतेः कारितान्तस्य ९१
- यावयतेराख्याते ९२
- वनियमिश्रथिग्लापि ९३

- नाष्टनः ९४
- हिनोतेः ९५
- बोधप्रतीबोधौ केसरप्राबन्धाया अभ्यघायन्ति पनिष्पदातिष्ठिपं दाधार जागार
- मीमायेति ९६
- प्रपणः पणतेरेव ९७
- इदमूष्वादिषु पदत्वात् ९८
- ब्रह्मण्वत्यादीनाम् ९९
- दीर्घायुत्वादीनां च १००
- वेदाध्ययनं धर्मः १०१
- प्रेत्य ज्योतिष्ट्वं कामयमानस्य १०२
- याज्ञिकैर्यथासमाम्नातम् १०३
- यज्ञततिर्न पृथग्वेदेभ्यः १०४
- यज्ञे पुनर्लोकाः प्रतिष्ठिताः १०५
- पञ्चजना लोकेषु १०६

- पदाध्ययनमन्तादिशब्दस्वरार्थज्ञानार्थम् १०७
- क्रमाध्ययनं संहितापददाढ्यार्थम् १०८
- स्वरोपजनश्चादृष्टः पदेषु संहितायां च १०९
- द्वे पदे क्रमपदम् ११०
- तस्यान्तेन परस्य प्रसंधानम् १११
- नान्तगतं परेण ११२
- त्रीणि पदान्यपृक्तमध्यानि ११३
- एकादेशस्वरसंधिदीर्घविनामाः प्रयोजनम् ११४
- आकारौकारादि पुनः ११५
- उकारः परिहार्य एव ११६
- प्रगृह्यावगृह्यसमापाद्यान्तगतानां द्विर्वचनं परिहार इतिमध्ये ११७
- द्वाभ्यामुकारः ११८
- अनुनासिकदीर्घत्वं प्रयोजनम् ११९
- प्लुतश्चाप्लुतवत् १२०
- अनुनासिकः पूर्वश्च शुद्धः १२१

- यथाशास्त्रं प्रसंधानम् १२२
- प्रगृह्यावगृह्यचर्चायां क्रमवदुत्तरस्मिन्नवग्रहः १२३
- समापाद्यानामन्ते संहितावद्वचनम् १२४
- तस्य पुनरास्थापितं नाम १२५
- स एकपदः परिहार्यश्च १२६

इति शौनकीये चतुराध्यायिके चतुर्थः पादः।।

त्वदीयं वस्तु गोविन्द तुभ्यमेव समर्पये।।

नाहं कर्ता हरिः कर्ता तस्मै नित्यं नमोनमः।।

एवं छन्दोभाषा ग्रन्थसङ्कलनं समाप्तम्।

---

निवेदनम्- सर्वेषां वेदग्रन्थानां दिङ्मात्रप्रदर्शकमिदं सङ्कलनम्।

मुख्यसम्पादकः – वंशीकृष्ण घनपाठी

मैसूरु